ब्रह्मसूत्र वृत्तिः of Umachigi Śankara Śāstrī – 1st chapter only – Edited by M. G. Nanjundaradhya Mysore, 1974.

(12)

Subject Added Topical Entries (650)	0 1 2	0L CS H 4U nS	$a Topical subject heading Hinduism $v Form subdivision $v Sacred books $x General subdivision $y Chronological subdivision $a Brahmanism
Subject Added (Geog.Entries) (751)	0 1 2	0L CS H 4U nS	$a Geographic Name $v Form subdivision $x General subdivision $y Chronological subdivision
Added Entries Personal(700)	0Forenam 1Surname 3Familyna me	#1 2A n E	$a Personal name नन्जुनदाराध्येया, एम.जी., ed. $b Numeration $c Titles and other words $d Dates
Added Entries Corporate (710)	1 Jurisdiction name 2 Direct order	# 2 An E	$a Entry element $b Subordinate Unit
Added Entries Conference (711)	1 Inverted name 2 Direct order	# 2 An E	$a Meeting name $c Location of meeting $d Date of meeting $e Subordinate Unit $n Number of meeting
Uniform Title Conference (730)	0-9 Non filing characters	# 2A nE	$a Uniform Title $f Date of work $k Form subheading $l Language of work $n Number of part/section of a work $p Name of part/section of a work
Analytical Title (740)	0-9 Non filing characters	# 2 An E	$a Uncontrolled title $n Number of part/section of a work $p Name of part/section of a work
Acceesion No. incl. Date (901)			$a Accession No. R-508. $b Date of Accessioning 26-03-08.
Alternate Title(904)			$a Title Bramha sutra Vrithi $b Remainder of the title

Indira Gandhi National Centre for the Arts
Kala Nidhi-Reference Library
Date input Sheet-Monograph

ACCESSION NO. R-508

PROJECT ....

LEADER

Ldr/05 [ ] Rec.Status

Ldr/06 [ ] Type of Record

Ldr/07 [ ] Bibliog. level

Ldr/08 [ ] Desc. Cat. format

CONTROL FIELDS (Tag 008)

Data entered on file:

2	0	0	8	0	6	0	3
y	y	y	y	m	m	d	d

Publl. date 1: 1 9 7 4

Publ. date 2: [ ]

Place of (Pub./Prod.Exec.) [ ]

Illustration [ ]

Target Audience [ ]

Form of Item [ ]

Nature of Content [ ]

Gov't Pub. [ ]

Conference Publication [ ]

Festchriften [ ]

Index [ ]

Language: s a n

Literary Form [ ]

Biography [ ]

Collection [ ]

Cat.Source [ ]

Catalogued by (Initials): u s

Date of Cataloguing [ ]

Input by: [ ]

Revised by: [ ]

Approved by: [ ]

Proof: [ ]

VARIABLE FIELDS

Name of the field incl. Marc Tags	Indicators		Data with subfield identifiers
ISBN (020)-R	#	#	$a Number: $c Terms of availability
Cat.Agency (040)-NR			$a Original Cat. Agency $b Lang. of Cataloging
Language (041)	0 1	#	$a For computer files, music and visual mat. $h Lang. code for original translation of txt.
Country of Pub Code (044)-NR	#	#	$a Name of the country where originally published ii
DDC No. (082)	0 1		$a Class No. SAN 294.5926 $b Book No. SHA-
Main Entry-Personal Name (100)	0 forename 1 surname 3 family name	#1	$a Personal name शास्त्री, उमचिगी शङ्कर $d Dates $q Fuller name
Main Entry-Corporate Name(110)	0 inverted name 1jurisdiction name 2 name in direct order	#	$a Corporate Name as entry $b Subordinate unit $c Location of meeting $d Date of meeting $n Number of Parts/Sections/Meetings
Conference name (111)	0 inverted name 1 jurisdiction name 2 name in direct order		$a Corporate Name as entry $b Subordinate unit $c Location of meeting $d Date of meeting $n Number of Parts/Sections/Meetings
Uniform Title (130)	0-9 non-filing characters		$a Uniform title $f Date of work $k Form subheading $l Language of work $n Number of parts/sections of a work $p Name of the parts/sections of a work
Uniform Title (subordinate to personal name) (240)	0 J	0- - 9	$a Uniform title $f Date of work $k Form subheading $l Language of work $n Number of parts/sections of a work $p Name of the parts/sections of a work
Title/Statement of Responsibility (245)	0 no ttl entry 1 ttl added entry	0- 9	$a Title ब्रह्मसूत्र वृत्तिः $b Remainder of title $c St. of responsibility उमचिगी शङ्कर शास्त्री ; edited by एम. जी. नन्जुनदाराध्य
Varying form of Title (246)	0 note, no addd entry 1 note, addd entry 2 no note noAE	# 0 - 5	$a Title proper $b Remainder of ttl. $f Designation of vol./issue/date of work $n Number of part/section of work

	3 no note, AE		$p Name of part/section of work
Edition St.(250)	#	#	$a Edition $b Remainder to edition
Imprint Statement (260)			$a Place of publication Mysore $b Name of publisher shivprakash $c Date of publication 1974.
Collation (300)			$a No. Pages-R 218p. $b Other physical details $c Dimension-R 17.5cm. $e Accompanying material
Series Statement (uncontrolled) (490)	0 series not traced 1 series tracd differently	0	$a Title $v Volume number $x ISSN
Note Section(500)			$a General note
Note Section (Bibliography) (504)			$a Bibliography note $b Number of references
Note Sec.(Contnt) (505)	0 contnt 1 incomp cntnt 2prtl.contnt	# 0	$a Formatted content notes
Note Sec (Summ) 520			$a Summary etc. notes
Note Sec (Reproduction note) 533			$a Type of reproduction $b Place of reproduction $c Agency responsible for reproduction $d Date of reproduction $e Physical description of reproduction
Note Sec (Language) 546			$a Language of the text $b Script different than original
Subj.Added Entries (Personal Names)(600)	0 Forename 1 Surname 3 Family name	0L CS H 4U nS	$a Personal Name $b Numeration $c Titles and other words associated with a name $d Dates associated with name
Subj.Added Entries (Corporate Name)(610)	1 Jurisdctn name 2 Direct order	0L CS H 4U nS	$a Entry element $b Subordinate Unit- R
Subj.Added Entries (Conference Name)(611)	1 Inverted name 2 Direct order	0L CS H 4U nS	$a Meeting name $c Location of meeting $d Date of meeting $e Subordinate Unit $n Number of meeting
Subj.Added Entries (Uniform Title) (630)	0-9 Non filing characters	0L CS H 4U nS	$a Uniform Title $f Date of work $k Form subheading $l Language of work $n Number of part/section of a work $p Name of part/section of a work

with Financial assistance from the Ministry
of Education, Govt. of India

लिं ॥ उमचिगी शङ्करशास्त्रि विरचिता

ब्रह्मसूत्रवृत्तिः

BRAMHA SUTRA VRITHI

Edited By

Asthana Vidwan, Sahitya Ratnam,
Sivadvaita Vidyabhushana,

M. G. NANJUNDARADHYA

Professor of Shakti Vishishtadwaita Vedanta
Maharaja's Samskrit College, Mysore

प्रकाशकाः
श्री श्री विद्वान् शिवप्रकाशशिवाचार्याः
शङ्करविळास संस्कृत पाठशालाध्यक्षाः
शङ्करमठ वीथिका, मैसूर--४

Number of copies Printed 1100
Date 10—8—1974

Book available at :—
Sri Shankaravilasa Samskrita Pathasha
Shivaprakasha Mandira,
Shankarmutt Road, Mysore-4

with Financial assistance from the Ministry
of Education, Govt of India.

लिं ॥ उमचिगी शङ्करशास्त्रि विरचिता

ब्रह्मसूत्रवृत्तिः

BRAMHA SUTRA VRITHI

Edited By

**Asthana Vidwan, Sahitya Ratnam,
Sivadvaita Vidyabhushana,
M. G. NANJUNDARADHYA**

*Professor of Shakti Vishishtadwaita Vedanta
Maharaja's Samskrit College Mysore*

प्रकाशकाः
श्री श्री विद्वान् शिवप्रकाशशिवाचार्याः
शङ्करविळास संस्कृत पाठशालाध्यक्षाः
शङ्करमठ वीथिका, मैसूर--४

Sri Vinayaka printing Works,
550, 2nd Ramachandra Agrahara
MYSORE-4



Sri Kashi Jagadguru
Vishwaradhya Simhasanadheeshwara
Sri Sri 1008 Jagadguru
Shivacharya Visweswara Mahaswamiji

श्री ज. विश्वाराध्यो विजयतेतराम्

श्री काशी जगद्गुरु विश्वाराध्य सिंहासनाधीश्वर श्री श्री श्री १००८ जगद्गुरु विश्वेश्वरशिवाचार्य महास्वामिनां शुभाशीर्वचनम् ।

दर्शनप्रधानेऽस्मिन् भारते वर्षे सन्ति बहूनि किल दर्शनानि, तेषु दर्शनीयतमं वीरशैवदर्शनम् । तदुक्तं पारमेश्वरागमे "न वीरशैवसदृशमतमस्ति जगत्रये" इति । अष्टावरण-पञ्चाचार-षट्स्थलात्मकमिदं दर्शनं युगे युगे संस्थापितं श्री रेणुकादि पञ्चभिराचार्यवर्यैः । क्रियाज्ञानसमुच्चयात्मकमिदं शक्तिविशिष्टाद्वैत-द्वैताद्वैता-भेदाभेद-विशेषाद्वैताद्यभिधानैरभिधीयते हि लोके ।

इह खलु केचनदार्शनिकाः जीवेश्वरयोः सर्वदा भेदं प्रतिपादयन्तः ईश्वरप्राप्त्युपायं उपासनादिरूपक्रियां अङ्गीकुर्वन्ति । अपरे तु जीवेश्वरयोः सर्वदा अभेदं प्रतिपादयन्तः अज्ञानेन प्रतीयमानभेदनिरसनार्थं ईश्वरभावाप्त्यर्थं विज्ञानमेव मुख्यं साधनमिति प्रतिपादयन्ति । तयोः एतादृश विरोधपरिहारेण सामरस्यप्रतिपादनाय क्रियाज्ञान समुच्चयात्मकं भेदाभेदरूपं दर्शनं आविश्चक्रुर्वीरशैवाचार्याः । तदुक्तं सिद्धान्तशिखामणौ—

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम् ॥ इति ।

अत एव वीरशैवमतं विश्वमतमिति प्रसिद्धम् ।

अत्र केचन अविचारितमीमांसाः, परदर्शनाऽसहिष्णवः, पण्डितं मन्यमानाः एवं आक्षिपंति यत् वीरशैवमतं न वैदिकमिति । तेषां तद्वचनं अविचारितरमणीयमेव । एतन्मतस्य वैदिकत्वं प्रतिपादितं क्रियासारकारैर्नीलकण्ठशिवाचार्यैः —

" तथैव वीरशैवानामागमाः वैदिकाः मताः " ॥ इति ।

(क्रियासारः)

ईसवीय अष्टमे शतके वीरशैवीयाः विद्वद्वरेण्याः आचार्य प्रवराः श्री नीलकण्ठशिवाचार्यभगवत्पादाः व्यासीय ब्रह्मसूत्राणामुपरि शक्तिविशिष्टाद्वैतसिद्धान्तप्रतिपादकं नीलकण्ठभाष्यमकार्षुः । तदुक्तं क्रियासारे—

इति तेन प्रार्थितस्सन् दयालुः पार्वतीपतिः ।

नीलकण्ठशिवाचार्यं नाम्ना भाष्यमचीकरत्
विशिष्टाद्वैतसिद्धान्तप्रतिपादनमुत्तमम् ॥ इति ।

क्रि.सा. उ १, २८-३२)

मतेऽस्मिन् द्वौ नीलकण्ठशिवाचार्यौ वर्तेते । तत्राद्यः भाष्यकर्ता द्वितीयश्च भाष्यार्थस्य कारिकारूपेण क्रियासाराभिधानेन संगृहीता ।

आद्यानां श्री नीलकण्ठशिवाचार्याणां आद्य श्री शङ्कराचार्याणां च मिथः शास्त्रार्थः सम्पन्न इति शङ्करदिग्विजयस्य पञ्चदशसर्गतो अवगम्यते । यथा—

इति युक्तिशतैः स नीलकण्ठः कविरक्षोभयदद्वितीयपक्षम् ।
निगमान्तवचः प्रकाश्यमानं कलभः पद्मवनं यथाप्रफुल्लम् ॥४९॥

एतेन इदमवगम्यते यत् श्री नीलकण्ठशिवाचार्याः आद्य श्री शङ्कराचार्याश्च समकालीनाः आसन् इति ।

एतन्नीलकण्ठभाष्य काठिण्यपरिहारार्थं आधुनिक नीलकण्ठ-शिवाचार्याः नीलकण्ठभाष्योपरि सरलया सुरगिरा कारिकाः विरचयामासुः । तदुक्तं क्रियासारे—

मयापि तस्य तात्पर्यं श्रोतृणां सुखबुद्धये ।
कारिकारूपतः सर्वं क्रमेणैव निबध्यते ॥ इति ।

(क्रि. सा १-३३)

एतत् क्रियासारानुसारेण व्यासीय ब्रह्मसूत्राणामुपरि मैसूरभूपतिकृपा-च्छायाश्रिताः, पण्डितप्रकाण्डाः, उमचिगिमठेमठीयाः श्री शङ्करशास्त्रिणः

" व्यासीयाखिल ब्रह्मसूत्रविवृत्तिं कुर्वे शिवप्रीतये " इति ।

स्वकृत प्रतिज्ञानुसारेण ब्रह्मसूत्राणां शाङ्करीवृत्तिं कृतवन्तः ।

एते शास्त्रिणः स्वजीवनकाले उपनिषदाद्यनेक ग्रन्थानामुपरि संस्कृतभाषया, कर्नाटकभाषया च व्याख्यां कृत्वा सुप्रसिद्धाः बभूवुः । तैर्लिखिताः अनेके ग्रन्थाः नाद्यावधि मुद्रापिताः । "प्रतिबन्धकोऽपसारयति लक्ष्यान्महान्तमपी ते" वचनानुसारेण शास्त्रिणां अर्थाभाव एव प्रतिबन्धक आसीत् ग्रन्थरचनायां रचितानाञ्च मुद्रणे .

अस्मद्विद्यार्थिदशायां द्विवारं शास्त्रिणां सन्दर्शनमभूत् । तदा तैः सह सम्भाषणे तैरेवमुक्तं "यः कोऽपि वा विषयो भवतु शास्त्रप्रामाण्यं विना नाऽहमङ्गीकरोमि, भवद्भिरपि एवमेव व्यवहर्तव्यमिति" । तेषां तद्वचनं नाद्यावधि विस्मृतमस्माभिः ।

शास्त्रिणां ब्रह्मसूत्र शाङ्करीवृत्त्याख्योऽयं ग्रन्थः नाद्यावधि मुद्रापितः, अधुना विद्यानुरागिणो विद्वांसः श्रीमन्तः शिवप्रकाश शिवाचार्याः एतद्ग्रन्थस्य मुद्रणं कृत्वा वीरशैवधर्मप्रचारकार्यं कुर्वन्तः सन्तीति सन्तोषास्पदमेव । एते च बेंगळूरु चामराजेन्द्र संस्कृत महाविद्यालये विद्वान् इति उपाधिना सम्भाविताः सन्ति । एतेषामेतत्कार्यं अत्यन्तं श्लाघनीयं वर्तते ।

वृत्तिरियं महीशूरनगरी विद्योतमान श्रीमन्महाराजसंस्कृतमहाविद्यालयस्य शक्तिविशिष्टाद्वैत प्राध्यापकानां, मुण्डककैवल्याद्युपनिषत्प्रकाशकानां आस्थानविदुषां वे. ब्रं. श्री. एम्. जि. नजुण्डाराध्यमहोदयानां सम्पादकत्वे सम्यक् परिशोध्य प्रकाशितेत्यतीवप्रमोदास्पदमस्माकम् ।

वयन्तु आशास्महे एतेषां हस्तेन ईदृशानि शास्त्रप्रचारकार्याणि भवितव्यानि इति ! येन एतद्ग्रन्थाध्ययनपरिशीलनाभ्यां मुमुक्षवः लिङ्गाङ्गसामरस्यस्वरूपं सुदुर्लभं मोक्षं प्राप्नुयुः । एतेन जिज्ञासुच्छात्रकुलमपि अत्यन्तमुपकृतं स्यादिति ।

प्रमादीचसंवत्सरे आश्वीजशुक्ल विजयदशमी शनिवासरे (दि. ६-१०-१८७३)

शिवम् भूयात् इत्याशिषः

ग्रन्थकर्तॄणां प्रस्तावना

विदितमेव खलूपनिषद्ब्रह्मसूत्रादिभाष्याणि वीरशैवसिद्धान्तपराणि दुःखार्णवनिमग्नजगदुद्धिधीर्षुभिः परमकारुणिकैः रेणुकादि भगवत्पादैः प्रणीतानीति श्रीकरभाष्यादिना । तथापि तेषामनुपलभ्यमानत्वात्, विद्यमानानां च श्रीकरभाष्यादीनामनवलोकनात्, वीरशैवसिद्धान्तपर प्रस्थानत्रय भाष्याणामेवाभावात् नैवेदं वीरशैवमतं वैदिकमिति मोमुह्यमानानां स्वसाम्याधिक्यशून्य वीरशैवसिद्धान्तगन्धाघ्राणकविवर्जितानां केषांचित् शिवेतरदेवतासु तत्साम्याधिक्यवादिनां शिवविद्वेषिणां पण्डितमानिनां मोहशमनाय वीरशैवतत्त्वाध्यवसायनैव लोकयात्रां निर्वहन्तो वयं श्री पूर्वाचार्यकृपया द्वैताद्वैत-विशिष्टाद्वैत परोपनिषद्भाष्यादिकस्य सिद्धान्त (शिवागम) विरुद्धत्वात् वेदवेदान्तस्यापि विरुद्धत्वात् । अत एव तदनुसारि स्मृति-पुराण युक्त्यनुभव विरुद्धमित्यवबुध्य, ईशावास्याद्युपनिषदः व्याचिख्यासवः सन्तः पूर्वाचार्यप्रदर्शितेन पथोप

निषद्वनं प्रविश्य तत्र शक्तिविशिष्टाद्वैतापरपर्याय लिङ्गाङ्गसामरस्यफलं साकल्येनाकलय्य, ईशावास्योपनिषत् केनोपनिद्व्याख्यानं, सिद्धान्तशिखोपनिषत् वीरशैवभाष्यं च वीरशैवपरकत्वेन प्रणिनाय सम्मुद्रय, प्रकटीकृत्य शिवभक्तिभाजां महान्तमानन्दं प्रापय्य, मुण्डकोपनिषद्भाष्यं नीलकण्ठशिवाचार्यविरचित नीलकण्ठभाष्य कारिकारूप क्रियासारस्य व्याख्यामपि 'ब्रह्मसूत्रवृत्ति'' नाम्ना विरचय्य शिवभक्ति, शिवध्यान, शिवज्ञान, शिवव्रत, शिवार्चन, शिवार्पणादि शिवधर्माचरण समासादित शिवप्रसादरूप कुलिशेन प्रत्यूहाद्रिं विभज्य तत्तन्मन्त्रभाष्ये परव्याख्यानास्वारस्यं प्रदर्श्य समाप्य, शिवस्य शिवभक्तिभाजां च सन्तुष्टिं कृतवन्त इति मन्यामहे। तस्माच्छिवश्रवणचेतसो निष्पक्षपातिनः शैवास्तदेतद्भाष्यं समालोक्य सान्द्रानन्दतुन्दिला भवेयुरित्याशास्महे। इति शम्।

सम्पादकीयटिप्पणी

विदितचरमेव सर्वेषां विदुषां यत् वेदान्त-सिद्धांतप्रतिपादितं वीरशैवं शक्तिविशिष्टाद्वैत-विशेषाद्वैत-शिवाद्वैत-विशिष्टाद्वैत-भेदाभेद प्रभृतिभिरभिधानैः लोकविश्रुतम् इति । उक्तं च सिद्धान्तशिखामणौ

वेदसिद्धान्तयोरैक्यमेकार्थप्रतिपादनात् ।
प्रामाण्यं सदृशं ज्ञेयं पण्डितैरेतयोस्सदा ॥

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते ।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम् ॥ इति ।

सर्वश्रुतमेवैतत् यत् सर्वेषामास्तिकसिद्धान्तानां मूलं प्रस्थात्रयमिति । तत्रोपनिषत्-ब्रह्मसूत्र-भगवद्गीता च प्रस्थानत्रयत्वेनाभिधीयते । मध्व-शङ्कर-रामानुजादय-आचार्याः इदं प्रस्थानत्रयमधिकृत्यैव भाष्याणि विलिख्य द्वैताद्वैतविशिष्टाद्वैतमतानि संस्थापयामासुः ।

यद्यपि श्रीमद्रेणुकादय आचार्याः शिवागमप्रसिद्धाः प्रस्थानत्रय-मधिकृत्यैव भाष्याणि विरचय्य वीरशैवसिद्धान्त संस्थापका बभूवुरिति श्रीकरभाष्यादिषु श्रूयते ; तथापि तानि भाष्याणि नाद्यावधि उपलभ्यन्ते ।

श्रीपतिपण्डितभगवत्पाद (क्रि श. १०४०) प्रणीते श्रीकरभाष्ये-तावत् वीरशैवप्रतिपादकस्य नीलकण्ठभाष्यस्य उल्लेखनं अनेकशो दृश्यते ।

आनन्दगिरि (क्रि.श. ८००) विरचिते शङ्करविजये "शिरोलिङ्गधारी जङ्गमपुङ्गव" इति, माधवाचार्य (क्रि.श. १४००) कृते शङ्करदिग्विजये "शिवसूत्र-ब्रह्मसूत्रभाष्यकर्ते"ति वर्णितो नीलकण्ठशिवाचार्य एव नीलकण्ठभाष्यकर्तेति विद्वद्भिराद्रियते ।

तदिदं नीलकण्ठशिवाचार्यविरचितं ब्रह्मसूत्रभाष्यमिदानीं नोपलभ्यते यद्यपि, तथापि सुस्पष्टोऽयं विषयः तद्व्याख्यारूपे क्रियासारे—

कारिकारूपस्यास्य क्रियासाराख्य ब्रह्मसूत्रभाष्यस्यापि दुरवगाहत्वात् विरचिता धर्मरत्नपदवीविभूषितैः लिं।। उमचिगी शङ्करशास्त्रिभिः सरलया गैर्वाण्या वाण्या "ब्रह्मसूत्रवृत्त्या"ख्या व्याख्या । सा च व्याख्या तु प्रथमाध्याये जगद्वाचित्वाधिकरणं यावदपूर्णैवोपलभ्यतेत्यतीवविषादास्पदं सहृदयानाम् ।

ईश-केन-मुण्डक--सिद्धान्तशिखोपनिषदामुपरि रचितानि एषां महोदयानां वीरशैवसिद्धान्तपराणि भाष्याणि सुप्रसिद्धानि । सुगृहीतनामधेयैः शास्त्रिभिः यथा मुण्डकाद्युपनिषद्भाष्येषु परापरविद्यास्वरूपनिर्णयादिषु अन्यादृशं वैदुष्यं भाष्यान्तरेभ्यो वैशिष्ट्यं च प्रदर्शितं तथैवात्रापि प्रत्यधिकरणं स्वकीयमेव मौख्यं दरीदृश्यतेत्यपश्चिमं विपश्चिताम् ।

ब्रह्मसूत्रवृत्तिवैशिष्ट्यम्

प्रदर्शितान्यत्र बहूनि वैशिष्ट्यान्यस्यां वृत्तौ । स्थालीपुलाकन्यायेन द्वित्राण्येवात्र निरूप्यन्ते ।

विशिष्टाद्वैतपदनिरुक्तिः (पृ. १३), द्वैताद्वैतात्मक शक्तिविशिष्टाद्वैत पदस्यौचित्यम् (पृ. १६), वर्णाश्रमानुष्ठानविषये श्रीकरभाष्यकाराशयनिराकरणम् (पृ. २५), उपनयनस्य शिवदीक्षार्थकत्व प्रतिपादनम् (पृ. २६), शिवस्य गायत्रीमन्त्रवाच्यत्वम् (पृ. १०६) जीवमुख्यप्राणलिङ्गाधिकरणस्य इष्ट-प्राण-भावादि त्रिविधलिङ्गोपासनात्मकत्वसमर्थनम् (पृ. ११०-११५), यज्ञोपवीतशब्दार्थ निर्वचनम् (पृ. १२७), इत्यादि।

किञ्च—इदं चावश्यमुल्लेखनीयं यत्—"स्त्रीशूद्रौ नाधीयेतां" इति वाक्यमनुसृत्य प्रचलिते शास्त्रार्थविषये तावत् शास्त्रिणां खचिताभिप्रायः वीरशैवसिद्धान्तसारमेव गर्भीक्रियते। अतस्तेषां बहुश्रुतत्वं हृदयवैशारद्यञ्च सम्यक् प्रकटीकृतम्। उक्तं च—तत्रैव—"न हि शूद्रादीनां संस्कारानर्हत्वं कुत्रापि पत्यक्ष श्रुतिषु दृश्यते। अत एव शूद्रादि संस्कारानर्हत्वादिभिः तेषां संस्काराभावे स्मृतिरेव प्रमाणत्वेनोपन्यस्यते। नैतद्रोचते मनुष्यमात्रहितचिन्तकेभ्यो निष्पक्षपातबुद्धिभ्यः "हृद्यपेक्षया तु मनुष्याधिकारत्वात्" इति सूत्रेण मनुष्यमात्रस्य ब्रह्मविद्यायामधिकारस्य सूत्रकाराभिप्रेतत्वेऽपि केषांचिदधिकारः केषांचिन्नेति कथनं रागद्वेषप्रयुक्तत्वमिति वक्तुं शक्यते"। (पृ. ९४)

इत्युक्त्वा शास्त्रोद्देशभङ्गकारिणां पूर्वेषामपि व्याख्यातॄणां आशयं सप्रमाणं निराकृतम्। उक्तं च तत्रैव—

"ननु अस्मिन्नधिकरणे कारिका टीकाकारेण निर्वाणमन्त्रिणा श्रीकरभाष्यकारेण श्रीपतिपण्डितेन शूद्रादीनां संस्काराभावस्य दर्शितत्वात्

शिवदीक्षासम्पन्नत्वात् तदभिप्रायानुसारेणौचित्यात् किं तदभिप्रायविरुद्ध-व्याख्यानेन " इत्याशङ्कायाः वीरशैवसिद्धान्तसम्मतं स्पष्टमुत्तरं तत्रैवोक्तम् यथा — " निर्वाणमन्त्रिणा कारिकाकारतात्पर्यगन्धलेशस्यापि अज्ञातत्वात् क्रियासारस्य साकल्येनाविचारितत्वात् मायावादिभिरिव शूद्रादि संस्कारा-नर्हत्वं दर्शितम् । श्रीकरभाष्यकारेणापि पूर्वापरसूत्रपर्यालोचनाभावादेव दर्शितमिति मद्व्याख्यानपरिशीलनचतुरैः ज्ञायत एव " इति । (पृ. १९६)

एवमादिषु बहुषु विषयेषु वीरशैवसम्मताः सर्वमान्या उदात्ताशयाः शास्त्रिमहोदयैः प्रकाशिताः । भाष्यास्यास्यापूर्वत्वं अर्थस्वारस्य च सहृदयैराकलनीयमिति निवेद्यविरम्यते । अस्मिन् सुश्लाघ्ये कर्मणि मांप्रेरितवद्भ्यः श्री श्री शिवप्रकाशशिवाचार्येभ्यः कार्तज्ञ्यपूर्वकाः प्रणामाः समर्प्यन्ते ।

३१—३—१९७४
मैसूरु.

एम्. जि. नञ्जुण्डाराध्यः,
सम्पादकः



Dharmaratnam Umachigi Shankara Shastriji
(Author of Brahmasutra Vrutti)

ब्रह्मसूत्रवृत्तिः

अनुक्रमणी

समाप्ति

श्री शिवाभ्यां नमः ।

ब्रह्मसूत्र शाङ्करीवृत्तिः ।

सृष्ट्यादिपञ्चकृत्यानां विधातृभिरुपासितम् ।
निर्मलं शिवनामानं वन्दे साम्बं महेश्वरम्[1] ॥ १ ॥

सद्योजातादिसंजातान् सद्यो निर्वाणदायकान् ।
सद्यः सिद्धिप्रदान्नौमि रेणुकादीन् जगद्गुरून् ॥ २ ॥

शिवानुग्रहसंजातशंकराचार्ययोगिने ।
चन्द्रमौलीश्वरं लिङ्गं दत्तवन्तं जगद्गुरुम् ॥ ३ ॥

सिद्धसंघशिखारत्नं रेवणाराध्यदेशिकम् ।
चिन्तामणिं स्वभक्तानां वन्दे चिन्तितसिद्धये ॥ ४ ॥

शिवानन्दाख्यमाहूय वीरपीठप्रभुं मुदा ।
चक्रे विश्वगुरुं यस्तं सिद्धलिङ्गं नमाम्यहम् ॥ ५ ॥

वीरपीठसमारूढं शिवाचार्यं जगद्गुरुम् ।
श्री शिवानन्दराजेन्द्रं वन्दे राजेन्द्रपूजितम् ॥ ६ ॥

[1] प्रत्यूहशान्तये ।

दुर्वादिगर्वेभमृगेन्द्ररूपं शर्वोक्तसर्वागमसारदीपम् ।
दुर्वारकामादिविलासलोपं विध्वस्तभक्ताखिलकर्मलेपम् ॥ ७ ॥

श्री वीरशैवोदधिपूर्णचन्द्रं श्री वीरसिंहासनदेशिकेन्द्रम् ।
सिद्धान्तसुज्ञानमहासमुद्रं नमामि सद्भक्तवितीर्णभद्रम् ॥ ८ ॥

मुख्यं श्री नीलकण्ठोक्तमुपदेशचतुष्टयम् ।
दृष्ट्वा व्यासीयसूत्राणां सम्यग्वृत्तिर्वितन्यते ॥ ९ ॥

कोट्टूरेश्वरनामकं प्रभुवरं विघ्नेभकण्टीरवं
सद्भक्तावळिपालकं श्रुतिततेस्तत्वार्थसंबोधकम् ।
नत्वा श्रीमहिशूर भूपतिकृपाछायाश्रितः शङ्करो
व्यासीयाखिलब्रह्मसूत्रविवृतिं कुर्वे शिवप्रीतये ॥ १० ॥

अथ श्रीमद्वीरशैवविद्याप्रतिपादक साक्षाच्छिवाविर्भूतशिवसूत्रादीनां वीरशैवादरणीयत्वेऽपि व्यासीयसूत्राणामपि शिवज्ञानमूलकत्वात् शिवधर्मप्रतिपादक वेदान्तानुकूलत्वाच्च तत्सूत्राभ्युपगमे न कोऽपि दोषसंभव इति मत्वा श्रीमन्नीलकण्ठभगवत्पादाचार्यो भाष्यमचीकरत् । तस्मादेव तदीय भाष्यार्थ कारिकाभिः संगृहीतवानपरो नीलकण्ठशिवाचार्यः । कारिकार्थस्यापि दुर्गमत्वात्, भाष्यस्यानुपलभ्यत्वात् कारिकामनुसृत्य क्रियते सूत्रवृत्तिरिदानीम् ।

न चेतरभाष्यादीनां व्याससूत्रार्थप्रकाशकत्वेऽपि तदनुसरणं किन्न-क्रियते इति वाच्यम्। तेषां तत्तात्पर्यप्रतिकूलत्वात्। तथाहि— "अथातो ब्रह्मजिज्ञासा" इत्यत्राध्यासस्यासूत्रितत्वेऽपि यत्तस्य प्रतिपादनं तत्सूत्रविरुद्धम्। न चाथ सूत्रस्य विषयप्रयोजनादि सूचकत्वाद्विषयस्य च जीवब्रह्मणोः स्वरूपैक्यलक्षणस्य तत्ज्ञानस्य चाध्यासाधीनत्वात् सोऽर्थात् सूत्रित एवेति वाच्यम्। जीवब्रह्मणोः स्वरूपैक्यस्यैवाभावेन तस्य विषयत्वासंप्रतिपत्तेः। न हि जीवब्रह्मणोः स्वरुपैक्यं कचित्-सूत्रितम्। प्रत्युत "अंशो नानाव्यपदेशात्" इति जीवो ब्रह्म-णोंऽशो भिन्नाभिन्नश्च। अग्नेर्विस्फुलिंग इवेत्युक्तम्। नह्यग्निविस्फु-लिंगयोः स्वरूपैक्यमस्ति। येन जीवब्रह्मण रपि भवेत्।

तथा "जन्माद्यस्य यतः" इति सूत्रेण ब्रह्मणः जगत्कारणत्वं लक्षणमुक्तम्। किं विधं तत्कारणत्वमित्याकांक्षायां "प्रकृतिश्च प्रतिज्ञा-दृष्टान्तानुपरोधात्" इत्यादिना निमित्तत्वमुपादानत्वं चेत्युक्तम्। तस्मा-देकब्रह्मण एवोभयविधकारणत्वे सूत्रिते कैश्चिदविद्योपादानमित्युक्तम्। अन्यैः सूक्ष्मभूतपंचकमुपादानमित्यपरैः प्रकृतिरुपादानमिति तदेतदुपा-दानांतराभिधानं सूत्रविरुद्धम्।

तथा "शास्त्रयोनित्वात्" इति ब्रह्मणः शास्त्रवेद्यत्वे सूत्रार्थे सत्यपि कैश्चिदवेद्यत्वं सूत्रविरुद्धमेवोक्तम्।

तथा "ईक्षतेर्नाशब्दम्" "गौणश्चेन्नात्मशब्दात्" "अदृश्य-त्वादिगुणको धर्मोक्तेः" "द्युभ्वाद्यायतनं स्वशब्दात्" "शब्दादेव

प्रमितः " इत्यादिभिस्सूत्रैरसाधारणैर्ब्रह्मधर्मैर्ब्रह्मवाचकशब्दैश्च ब्रह्म निर्णये क्रियमाणेऽपि ब्रह्म निर्धर्मकं कस्यापि शब्दस्य वाच्यं न भवतीत्यभिधानं सूत्रविरुद्धम्। न च ब्रह्मणि वास्तवधर्माभावेऽपि आरोपितधर्माणां संभवात् न विरोध इति वाच्यम्। जगत्कारणत्वादि-धर्माणामारोपितत्वस्य काप्यसूत्रितत्वात्। जगत्कारणत्वादीनामन्यत्राप्र-सिद्धतया आरोपासंभवात्।

वेदान्तानामारोपितधर्मविषयकत्वे तेषामप्रामाण्यापातात्। न च देहात्मप्रत्ययवत् यद्वदात्मतत्त्वज्ञानं प्रामाण्यमुपपद्यते इति वाच्यम्। देहात्मप्रत्ययस्य लोकायतिकं विना केनापि प्रामाण्यस्याभ्युपगतत्वा-भावात्। न हि लोकायतिकं विना देहात्मप्रत्ययस्य केनचित्प्रामाण्य-मभ्युपगम्यते। न हि यत्प्रमाणं तत्कदाचिदप्यप्रमाणं भवितुमर्हति घटदर्शने चक्षुरादिवत्। न हि बाधिताबाधितविषयकाप्रामाण्यप्रामाण्ये एकत्र संभवतः। बाधो हि नाम त्रैकालिकनिषेधः। न हि यत्र यस्य त्रैकालिक निषेधः तत्रैव तद्भावः संभवति। तस्माद्यत्प्रमाणं तत्सदैव प्रमाणम्। यदप्रमाणं तत्सदैवाप्रमाणम्। तद्वद्वेदान्ता अपि सदैवा-प्रमाणं चेत् तदर्थनिर्णायकविचारशास्त्रानर्थक्यम्। नास्तिकत्वा-पत्तिश्च स्यात्।

तथा "आनन्दमयोऽभ्यासात्" इत्यत्रानन्दमयस्य ब्रह्मत्वे सूत्रिते तस्याब्रह्मत्वाभिधानं सूत्रविरुद्धम्। न च "यतो वाचो निवर्तन्ते

अप्राप्य मनसा सह" इति वाङ्मानसातीतत्वेन ब्रह्मणो निर्विशेषत्व प्रतिपादनात् प्रियशिरस्कत्वादिविशिष्टानन्दमयस्य न ब्रह्मत्वमिति वाच्यम् । "यतो वाचो निवर्तन्ते" इति वाक्येन ब्रह्मणो वाङ्मानसातीतत्वस्याप्रतिपादितत्वात् । "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" इति श्रुतेरसांगत्यापत्तेः । न हि वाङ्मानसातिरिक्तमानगम्यत्वं ब्रह्मणि संभवति । ब्रह्मणि मानान्तराप्रवृत्तेः । "नावेदविन्मनुते तं बृहन्तं" "मनसैवानुद्रष्टव्यम्" इत्यादि शास्त्रविरोधाच्च । तस्मादानन्दमयाधिकरणे निर्विशेषब्रह्मप्रतिपादनं सूत्रविरुद्धं श्रुतिविरुद्धं च ।

तथा "तदनन्यत्वमारंभणशब्दादिभ्यः" इत्यत्र कार्यस्य कारणाभिन्नत्वस्य सूत्रितत्वेऽपि कैश्चित् कारणव्यतिरेकेण कार्यस्यासत्यत्वं मिथ्यात्वमुदाहृतम् । तदपि सूत्रविरुद्धम् । नह्यनन्यत्वशब्दोऽसत्ववाची किंत्वभेदवाची । किं च यदि कारणव्यतिरेकेण कार्यमेव न भवेत् तदा कथमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा समर्थ्यते । अभेदे हि कार्यकारणयोः कारणे विज्ञाते कार्यं विज्ञातमिति शक्यते वक्तुम् । विज्ञातकारणाभिन्नत्वात् कार्यस्य । असत्वे पुनः कार्यस्य कथं कारणविज्ञानेन सर्वकार्यस्य विज्ञानम् । सर्वस्यैवाभावात् । अनेन सूत्रेण कार्यस्य कारणाभिन्नत्वमेवोक्तम् । न तु कारणव्यतिरेकेण कार्यस्यासत्वमिति ध्येयम् । कार्यकारणयोरत्यन्ताभेदमप्यत्यन्तभेदमपि न ब्रूमो वयम् । किन्तु भेदाधिकरणे अभेदम् । अहेः कुण्डलम् अग्नेर्विस्फुलिंग इत्यादाविव कारणरूपेणाभेदं तत्तत्कार्यरूपेण भेदं वदामः । केचित्तु कार्यकारण-

योरत्यन्ताभेदमाहु: । तथाहि मृदि घटो नाम द्रव्यान्तरं नोत्पद्यते किन्त्वेकमेव द्रव्यं पिण्डावस्थां विहाय घटावस्थामापद्यते । पुनश्च घटावस्थां विहाय कपालावस्थामित्यादि । ततश्चावस्थान्तरापत्तिरेव द्रव्योत्पत्तिः । अवस्था प्रहाणमेव विनाश इति । तत्र किमवस्था द्रव्यादत्यन्तभिन्ना उतात्यन्तमभिन्ना आहोस्वित् भिन्नाभिन्ना वा । आद्ये कथमेकविज्ञानेन सर्वविज्ञानम् ? द्रव्ये ज्ञातेप्यवस्थानामज्ञानात् । न चैकविज्ञानेन सर्वद्रव्यविज्ञानमेव सर्वज्ञानं नत्ववस्थाज्ञानमपि सर्वज्ञानपदेनोक्तमिति वाच्यम् । संकोचे कारणाभावात् । द्रव्यस्यैकत्वेन सर्वत्वानुपपत्तेः । द्वितीये—कथमवस्थानामागन्तुकत्वं तदन्तरादूद्रव्यादत्यन्तमभेदात् । तृतीये—किमपराद्धं घटादिना द्रव्येण लोकानुभवसिद्धेन । किं च यद्यवस्थान्तरापत्तिरेवोत्पत्तिस्तदा अवस्थानामुत्पत्तिर्न स्यात् । अवस्थान्तराभावात् । अवस्थानामवस्थान्तरस्वीकारेऽनवस्थास्यात् । तथा "ज्ञोऽत एव" इति जीवस्य ज्ञातृत्वे सूत्रितेऽपि यद्ज्ञानरूपाभिधानं तदपि सूत्रविरुद्धम् । "उत्क्रान्तिगत्या गतीनाम्" इति जीवस्याणुत्वे सूत्रितेऽपि तस्य महत्वाभिधानं सूत्रविरुद्धम् ।

तथा "कर्ता शास्त्रार्थवत्वात्" इत्यादिना आत्मनः कर्तृत्वे सूत्रिते अकर्तेत्यभिधानं सांख्यमताभिप्रेतमेव । न च जीवस्यौपाधिककर्तृत्वात् बुद्धेरेव स्वाभाविककर्तृत्वात् जीवस्य वास्तवकर्तृत्वाभाव एवेति वाच्यम् । लोकवेदयोः करणतयाप्रसिद्धायाबुद्धेः कर्तृत्वस्यैवाभावात् ।

तथा "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इति कर्मसापेक्षा या विद्याया मोक्षहेतुत्वेऽप्रतिपादितेऽपि कर्मनिरपेक्षितात् केवलात् ज्ञानात् मोक्षप्रतिपादनं सूत्रविरुद्धम्। "समाना च सृत्युपक्रमात्" विद्वदविदुषोरुत्क्रान्तिसाम्यप्रतिपादनेऽपि कस्यचिद्विदुष उत्कान्त्यभावाभिधानं सूत्रविरुद्धम्।

स्मर्यते च महाभारते विदुषो गतिः "शुकः किल वैयासिकिरादित्यमण्डलमभिप्रतस्थे" इति। तथा "शुकस्तु मारुताच्छीघ्रां गतिं कृत्वान्तरिक्षगः। दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवत्।" तथा "सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः। देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः"॥ अपदस्य स्वस्थानाद्धृदयादुत्क्रान्तत्वात् पदैषिणः परमपदप्रेप्सोर्मार्गे देवयाने देवा अपि मुह्यन्तीति मार्गस्य दुर्विज्ञेयतोच्यते। न तु मार्गाभावः। अथ य एतौ पंथानौ न विदुः। ते कीटाः पतंगा इति मार्गद्वयभ्रष्टानामधोगतिश्रवणात्। विदुषः शरीरादुत्क्रान्तिविरहाभिधानं सूत्रविरुद्धम्। न च "तमेव विदित्वातिमृत्युमेति। नान्यः पंथा विद्यतेऽयनाय" इति ज्ञानव्यतिरिक्तमार्गान्तरनिषेधात् न देवयानः पंथा अपेक्षितव्य इति वाच्यम्। मार्गानपेक्षायामयनायेत्युक्तगमनानुपपत्तेः। न चायनायेति गमनं नाभिधीयते किन्तु ब्रह्मप्राप्तिरेवेति वाच्यम्। इण् गतौ "अय पय गतौ" इति स्मरणात्। तदतिक्रमे कारणाभावाच्च। मार्गमात्रनिषेधे अन्य इति विशेषणानर्थक्याच्च। न च पंथा इत्यनेन

मार्गो नोच्यते। किन्तु साधनमेव। तथा च साधनमात्रनिषेधे ज्ञानस्यापि निषेधप्रसंगात्। अन्यविशेषणमपि सार्थकमेवेति वाच्यम्। पथि शब्दस्य मुख्यार्थसंभवे लक्षणाश्रयणस्यान्याय्यत्वात्। तस्मात् ब्रह्मविदां देवयानाभाववचनमयुक्तमेव।

तथा "प्रदीपवदावेशस्तथा हि दर्शयति" इत्यत्र मुक्तस्यानेकशरीरपक्षे किं तानि शरीराणि सात्मकानि उत निरात्मकानीति पूर्वपक्षं कृत्वा यथा दीप अनेकदीपभावमापद्यानेकवर्तिष्वाविशति। विकारशक्तियोगादेवं मुक्तएकोऽप्यैश्वैर्यशक्तियोगादनेकानि शरीराण्याविशतीति सिद्धान्तितमन्यैस्तदेतज्जीवस्य विभुत्ववादिनामसमंजसम्। एवमन्यत्र सूत्रस्यापि विरोधोऽस्त्येव विस्तरभयादुपरम्यते।

तदेवं सूत्रानुसारि व्याख्यानानामुत्सन्नत्वेऽपि सूत्रानुसारि व्याख्यानुसारि क्रियासारकारिकारूप प्रथमद्वितीय-तृतीय-चतुर्थोपदेशानां विद्यमानत्वात् विद्यमानानां चेतरव्याख्यानां सूत्राननुसारित्वात् सूत्रानुसारि कारिकानुसारिणी वृत्तिरारभ्यते। न च विनिगमनाविरहात् इतरव्याख्यानामेव सूत्रानुसारित्वमस्त्विति वाच्यम्। सूत्रकारेणापीतर व्याख्यानां स्वसूत्रानुसारित्वस्योक्तत्वात्। तथाहि—

"एवं मतानि बहुशो भुवि विस्तारितान्यपि।
समुपेत्य तदा व्यासः प्रार्थयामास शंकरम्।
मतानि विविधान्येव समुत्पन्नानि शंकर।
मत्कृतानां च सूत्राणामयथानयनं कृतम्।

एवमेवेति निश्चित्य कुर्वन्ति कलहं मिथः ।
त्वत्प्रसादैकलभ्यस्य सूत्रजालस्य शंकर ॥
यथा पूर्वं त्वया कार्यं मत्सूत्रार्थविवेचनम् ॥

इति तेन प्रार्थितस्सन् दयालुः पार्वतीपतिः ।
नीलकण्ठशिवाचार्यनाम्ना भाष्यमचीकरत् ।
विशिष्टाद्वैतसिद्धान्तप्रतिपादनमुत्तमम् ॥

इति कारिकाकारस्य नीलकण्ठभाष्यानुसरणस्याऽपि । (क्रि. सा. उ. १ २८-३२)

"मयाऽपि तस्य तात्पर्यं श्रोतॄणां सुखबुद्धये ।
कारिकारूपतः सर्वं क्रमेणैव निबध्यते ॥"

(क्रि. सा. १-३३)

इति तद्वाक्येनैव ज्ञायमानत्वात् तदनुसारिणी वृत्तिः सूत्रानुसारिण्येव । कारिकार्थस्यापि दुर्गमत्वात् तदविरुद्धवृत्तेः सार्थक्यं ज्ञातव्यम् ।

अनुबन्धचतुष्टयमन्तरा शास्त्रे अध्येतृप्रवृत्त्यदर्शनात् । तस्य तत्प्रवृत्तिजनकत्वाच्च तन्निरूपणमावश्यकम् । तथा च— अष्टावरण पंचाचारतत्परः षट्स्थलब्रह्मशब्दितपरशिवजिज्ञासुरधिकारी । विषयस्तु शक्तिविशिष्टाद्वैतं ब्रह्म । शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः संबंधः । शक्तिविशिष्टपरशिवात्मैक्यज्ञानं साक्षात् प्रयोजनम् । परंपरया मोक्ष एव । एतन्मोक्षप्रयोजकमथातो ब्रह्मजिज्ञासेत्यारभ्यानावृत्तिशशब्दादित्यन्तं

शास्त्रम् । अतस्तत मुमूक्षूणां तृणीकृतस्वर्गादिफलानामस्माकमभ्यर्हित-तरम् ।

केचित्तु—जीवब्रह्मणोः स्वरूपत ऐक्यमेव शास्त्रस्य विषय इत्याहुः । तथा हि—अविद्याप्रतिबिंबमायाप्रतिबिंबयोर्जीवत्वेश्वरत्वेऽभ्युपेत्य तत्रोपाधिनाशे प्रतिबिम्बयोर्बिम्बमात्रत्वात् न वस्तुतो जीवब्रह्मणोर्भेद इत्यैक्यमेवेति प्रतिबिम्बवादं अन्तःकरणावच्छिन्नचैतन्यं जीवः मायावच्छिन्नचैतन्यमीश्वर इत्यवच्छिन्नवादं च स्वीकुर्वन्ति । घटाद्यवच्छिन्नाकाशानामवच्छेदकनाशे महाकाशमात्रत्ववत् ब्रह्मात्मैक्यसाक्षात्कार-निवर्तितायां अविद्यायां तत्कार्यान्तःकरणादीनामवच्छेदकनाशे चैतन्य-मात्रावशेषात् ऐक्यमेव विषय इति । इमौ प्रतिबिम्बवादावच्छिन्न-वादावपि न संगच्छेते । त्वं पदवाच्यस्य प्रतिबिम्बरूपस्य जीवस्य दर्पणगत मुखस्येव मिथ्यात्वात् । बाह्यवास्तवमुखं दर्पणगतमुखं न भवतीति वाक्यवत् ‘ तत् न त्वमसी ’ति श्रुतेरदर्शनात् । अपि च—यत्र यदस्ति तत्र तत्प्रतिबिम्बो नास्ति दर्पणरेखावत् । जलप्रविष्टमुखवच्च तत्रैव मग्नस्य तत्रैव प्रतिफलनासंभवात् । किं च—न च ब्रह्मणः प्रतिबिम्बः संभवति नीरूपत्वात् इति वाच्यम् । नीरूपस्याप्याकाशस्य प्रतिबिम्बदर्शनात् इति चेन्न । रूपसहितसूर्याद्यालोकप्रतिबिम्बस्यैवा-काशप्रतिबिम्बत्वेन ग्रहणात् । अन्यथा नीरूपवायुकालादीनामपि प्रतिबिम्बापत्तेः ।

एवमवच्छिन्नवादोऽपि लोहादिप्रविष्टसूच्यादेः, स्वकार्यनिर्मातृत्या-भाववत् मायाद्यवच्छिन्नेश्वरजीवयोः जगन्निर्मातृत्व किंचित्कतृष्वानुपपत्त्या-

द्यनेकदोषग्रस्तत्वान्निरस्तः । अतो न जीवब्रह्मणोः स्वरूपैक्यस्य शास्त्रविषयत्वं सिध्यति ।

"अथातो ब्रह्मजिज्ञासा" इत्यारभ्य "अनावृत्ति शब्दात्" इत्यन्तशास्त्रपर्यालोचने कृते सति किन्तु पूर्वोक्तस्य शक्तिविशिष्टश्चैतस्यैव । शक्तिवैशिष्ट्यं च परशिवब्रह्मणि "उमासहायं" "पराऽस्य शक्तिः" इत्यादि श्रुतिभिः समुदीरितम् । तथा यजुर्वेदे "एक एव रुद्रो न द्वितीयाय तस्थे। आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व" अस्यायमर्थः प्रतिपादितः क्रियासारे—तथा च रुद्रः संसार-दावानलपरितापपरिश्रांतपशुपाशरूपरोगद्रावकः शिवः एक एवेत्यत्र एवकारार्थः । शंखः पांडर एवेतिवदन्ययोगव्यवच्छेदाच्छंखे वर्णान्तर-निषेधात् पीतादिज्ञानस्य काचकामिलादिदोषदूषितत्ववत् प्रकृतमंत्रेऽपि रोगद्रावकत्वं शिवस्येवेत्येतावन्मात्रेणापि शिवेतरस्य पाशछेतृत्वनिषेधस्य शिवलिंगेतरस्य पाशभेदभ्रमस्य दोषदूषितबुध्या जन्मान्तरोपार्जितदुष्कृत-निकरविघ्नस्यैव हेतुत्वस्य च संभवे पुनःश्रुतावेक इत्येकत्वसंख्यायाः पुनरसन्देहे न विधानाच्छिवलिंगेतरस्य ब्रह्मकोटित्वं नास्त्येवेति सिद्धम् । द्वितीय इति वक्तव्ये"ऽद्वितीयाये"ति निर्देशश्छान्दसः तिष्ठतीति वक्तव्ये "तस्थे" इति भूतार्थनिर्देशः । भूतभविष्यत्कालावच्छेदेनेतरावस्थान-निरासार्थः । आसमन्तात्स्वनतिविदारयतीत्याखुः । आदिवराहरूपो विष्णुः ते पशु सकलजडाजडप्रपंचपाशविमोचकस्य पशुपतेस्तव संबन्धी पशुः पाशरूपेण जननमरणयोनिजत्वजायापहरणादि दुःखजालेनाबद्धः पशुरित्यनेन आदिविष्णोर्जीवकोटित्वं शिवभजनरूप लिंगप्रतिष्ठापन

लिंगधारणविभूतिधारणरुद्राक्षधारणपंचाक्षरजपैरासादितभक्तिविशेषेण – मुक्तत्वं च वर्णितं भवति। तस्माच्छिवशक्त्यपेक्षया भिन्नत्वं जीवकोटित्वं स्पष्टमेव। रुद्र 'तं जुषस्वेति' हे रुद्र तं तादृशपशुं तादृशगुणगणरत्नाकरस्त्वं पशुपुरोडाशरीत्या जुषस्व गृहाणेति "जुषि" प्रीतिसेवनयोरिति धातोरवगम्यते। एष ते रुद्रभागः हे रुद्र, ते सकलाध्यात्मिकाधिदैविकादि संसारदुःखभेतृत्ववतस्तव एष भागः, हविर्भागः, "तं जुषस्वेत्यनेनैव सिद्धे पुनः "एष ते रुद्र भाग इति हविर्भागस्य शिवलिंगसंबंधित्वप्रतिपादनात् उक्तरूपेण क्रत्वधीश्वरत्वं शिवस्यैव, अन्येषां तद्गन्धोऽपि नास्तीति अष्टमूर्त्यन्तर्गत यजमानमूर्तिरूपस्य यज्ञाद्यनुष्ठानाधिकारः प्रतिपादितः। स च यज्ञादिर्वीरशैवानामन्तर्यागः शिवलिंगपूजादिकः केवलवैदिकानामग्निष्टोमाद्यनुष्ठानमित्यवश्यमिष्ट्वा यथा योगं शिवप्रीतिः संपादनीया। तया चित्तशुद्धिद्वारा शिवज्ञानादेव मुक्तिरितिह्युपवर्णितम्।

ननु धर्म धर्मिणोः शिवशक्त्योर्मध्ये धर्मिणः शिवस्यैव क्रत्वधीश्वरत्वादि परब्रह्मलक्षणं न शैवशक्तेरित्यत आह "सह स्वसांबिकया तं जुषस्व" इति। अम्बिकया–सकलजगदण्डपिण्डप्रसवित्र्या "अंबा-माताथबाला स्यात्" इति कोशात्। आविर्भूतशक्तेः। अपगतकोरकभावकुसुमादेव गन्धोपलब्धेर्वायुसंपर्कात् विसृतावयवात् पुष्पगंधवदंशा निस्सरन्ति। तद्वच्छैवशक्तेरेव सकल जगदण्डपिण्डप्रसवः प्रतिपादितो भवति। अत एव मातृवदाविर्भूतशक्तिः सकलपाशछेददक्षा। मातुः स्वोदरसंभवतनुजेषु वात्सल्येन पोषणस्य दर्शनादिति भावः। एतदुक्तं

भवति । "पाशविच्छेदिकां साक्षान्निगूढां स्वगुणैर्भृशम्" इति कूर्मपुराणोपबृंहित श्वेताश्वतरोपनिषदि "किं कारणं ब्रह्म कुतः स्म जाता" इति प्रश्नानुगुण्येन शक्तेरेव पाशविच्छेदनवर्णनात् बालकानां मात्ररक्षणात्काशिवत्केवलब्रह्मवादिनः क्षरन्तीति व्यज्यते ।

ननु शक्तिरिति शिव इति द्वयोः प्रपंचमातापित्रोः प्रतिपादनात् "एकमेवाद्वितीयं ब्रह्म" इति श्रुत्यनुगृहीताद्वैतकोप इत्यत आह 'स्वस्रेति'। स्वसृत्वं सहजसिद्धत्वम् । पट्टमहिषीरूपम् । "एक एव रुद्र" इति संसृतिरोगनिवर्तकस्यैकत्वप्रतिपादनपुरस्सरमेवकारेणान्य-द्वित्व संख्याया अपक्रमे प्रतिपादनात् । अत एव सुदर्शनाचार्यैरपि सहजसिद्धतया स्वसृत्वमित्युपवर्णितम् । तथा च 'सह स्वस्रांबिकया तं जुषस्व" इति कंवधीश्वरत्वस्य ब्रह्मलक्षणस्य शिवशक्त्युभयात्मकस्य जगत्कारणत्वप्रतिपादनात् । विशिष्टाद्वैतमेव प्रतिष्ठितं भवति इति ।

विशिष्टाद्वैतं च लिंगांगसामरस्यं कथमितिचेदुच्यते । विशिष्टं च विशिष्टं च विशिष्टे लिंगांगे तयोरद्वैतम् । सामरस्यमभेद इत्यर्थः । एक विशिष्टपदेन मयूराण्डरसगतपादपक्षवर्णवैचित्र्यन्यायेन स्वान्तर्लीन-सूक्ष्मचिदचित्प्रपंचाकारज्ञानक्रियासामरस्यात्मिकया सहजसिद्धया विमर्शे-च्छाशक्त्यपरपर्यायचितिशक्त्या विशिष्टं चैतन्यं शिवरुद्रादि संज्ञिकं लिंगमभिधीयते । "चैतन्यमात्मा" इति शिवसूत्रस्थितेः । अंकुरोन्मुखचणकादिवत् सृष्ट्युन्मुखेच्छाशक्तिरेव स्वांशे घृतकाठिन्य-न्यायेन स्वगतपरस्परप्रतियोगिकानुयोगिकज्ञानक्रियान्योन्याभावज्ञान-

लक्षणमायाप्रतिस्फुरणवती सती सुखदुःखमोहप्रदसत्वरजस्तमःस्वभाव प्रकृत्यपरपर्याय चित्तशक्तिर्भवति "चितिरेव चेतनपदादवरूढा चैत्य संकोचनी चित्तं" इति शक्तिसूत्रस्थितेः। तद्विशिष्टं यत्काष्ठयोगहेतुक-वह्निविस्फुलिंगाविर्भाववत् स्वशक्तिविक्षोभाविर्भूत शिवांशरूपं चैतन्यमंगं जीवपुरुषापरपर्यायं तदप्यविशिष्टपदेनोच्यते। 'चित्तमात्मा" इति शिवसूत्रस्थितेः। "अनाद्यविद्यासंबंधात्तदंशो जीवनामकः"। इति रेणुकभगवत्पादोक्तेः। "शिवांशा ब्रह्मविष्ण्वाद्या अंशी देवश्शिवस्मृतः।" इति क्रियासारोक्तेः। "ममैवांशो जीवलोके जीवभूतस्सनातनः" इति भगवदुक्तेः। "अंशो नानाव्यपदेशात्" इति ब्रह्मसूत्रस्थितेः। अस्य स्वतन्त्रस्वप्रकाशशिवविभक्तत्वेन मायाक्रान्तत्वात् तद्धेतुकाणवमा-यीयकार्ममलावृतत्वात्संसारित्वम्। "तद्वच्चिच्छक्तिसंकोचान्मलावृतः संसारी" इति शक्तिसूत्रस्थितेः। "स्वशक्तिक्षोभमात्रेण स्थलं तद्द्वि-विधं मतम्। एकं लिंगस्थलं प्रोक्तमन्यदंगस्थलं स्मृतम्" लिंगांगोपाधि-भेदेन द्विधा भिन्नं परस्परम्। महान् घटप्रभेदेन यथाकाशः प्रतीयते॥ प्रतीयते तथा चैव स्थलं लिंगांगभेदतः। स्थलं नाम परं तत्त्वं शिव-रुद्रादि संज्ञिकम्। उपास्योपासकत्वेन स्वयमेव द्विधा भवेत्॥" इत्यनुभवसूत्रोक्तेः। तदेतदंगं शरीरे पृथिव्याद्यभिमानित्वे भक्ताद्य-परपर्यायब्रह्मादिभेदेन षड्विधं भवति। लिंगमपि भक्ताद्यनुग्रहार्थं पृथिव्याद्यधिष्ठानत्वेनाधारादिस्थानेषु सद्योजाताद्यपरपर्यायाचारादि लिंगभेदेन षड्विधं भवति। तयोरद्वैतमित्यर्थः। इत्थं च "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः

पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ " द्वे ब्रह्मणी वेदितव्ये परंचापरं च " इत्यादि भेदविधायक श्रुतीनां " एकमेवाद्वितीयं ब्रह्म " " नेऽह नानास्ति किंचन " " एक एव रुद्रो न द्वितीयाय तस्थे " " यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा " इत्याद्यभेदविधायक श्रुतीनां च परस्परं विरोधः । अनयाऽलिंगांगायो-रग्निकणयारिव भेदाभेदाभ्युपगमात् । जीवेश्वरयोर्यदि भेदवादिनामिव भेद एवेष्टस्तदा तूलादिषु लग्नस्य विस्फुलिंगस्य दाहकत्वं न स्यात् । अग्निभिन्नजलादिवद्विस्फुलिंगस्याप्यंशस्याग्निभिन्नत्वात् । तूलादिष्वग्नि-कणे लग्ने चार्द्रीभवेत्। किं च " यदग्ने रोहितं रूपम् " इति छान्दोग्य श्रुति सिद्धरूपमन्तरा रूपांतरं प्रतीयात् । तथा न प्रतीयतेऽनुभव-विरोधात् । भेदानुपपत्या अग्निकणयोर्दाहकत्वे न रोहितत्वेनचा-भेदोंऽगीकरणीयः । अभेदे च विवक्षिते वह्नेः पाकसाधनत्व शीतनिर्वर्तकत्वादिधर्मवत्सर्वे अाग्निधर्माः कणेऽपि संभवेयुः । तदुक्तं क्रियासारे " अग्निस्फुलिंगयोर्नास्ति यथा भेदः स्वरूपतः । अग्नित्वेन-कणत्वेन भेदाऽपि स्फुरति क्वचित् ॥ " इति तथा अंशिनो लिंगस्य अंशस्यांगस्य च भेदाभेदौ युज्येते लिंगस्य निरंशत्वेपि स्वस्वातन्त्र्य परिकल्पितांश भेदः संभवत्येव । स्वलीलार्थं सार्वभौमप्रभावामोदपरि-बृंहितो नृपः पदातिधर्मं करोति तद्वत् अखण्डानन्दरसास्वादनतृप्तोऽपि खण्डरसास्वादनार्थमिच्छायां स्वातन्त्र्यकल्पिताणवादिमलावृतस्सन् घृत-काठिन्यन्यायेनांशतः शरीरी भवति । तस्माच्छिवांशीभूतस्याज्ञानात्म-काणवादिमलावृतत्वात् नृप इवाहं शिव इति ज्ञानं नास्ति । " एकाकी

न रमते स द्वितीयमैच्छत्" इति श्रुतेः । स्वयमेव भगवान् शिवः स्वस्वातन्त्र्यशक्त्या लिंगांगरूपोपास्योपासकभावापन्नस्सन् क्रीडति । मुक्तिदशायामगविशेषणीभूत चित्तशक्तिगताणवमलरूपाज्ञानतमोभागात्मिकाया अविद्याया विलयात् तामसनिरसनस्थल पन्नस्यात्मनश्चित्तस्य चितिरूपत्वात् "तत्परिज्ञाने चित्तमेवांतर्मुखीभावेन चेतनपदाध्यारोहाच्चितिः" इति शक्तिसूत्रस्थितेः । लिंगांगसामरस्यदृढज्ञानापहृतमलत्रयस्य शुद्धशिवांशरूपस्यात्मनः नदीनां समुद्रे सामरस्यमिव महालिंगैक्यात् स्वात्मशिवस्वरूपतः अभेदः । "आत्मायं केवलः शुद्धःशिवस्यांशः सदाऽमलः । नित्यो निरंजनः...." । बन्धदशायां तु शुद्धांशस्य चिति संकोचात्मक मलावृतत्वात् । लिंगांगसामरस्याभावात् शिवत्वाभावात् भेदः । यथा अग्नित्वेन अग्निकणयोरभेदेऽपि कणत्वेनाग्नित्वेन अग्निकणयोर्भेदः । तस्मान्न कस्याऽपि श्रुतिवाक्यस्य विरोधो-द्वैताद्वैतात्मक विशिष्टाद्वैतपक्षे । तदुक्तं कूर्मपुराणे—"केचिद्द्वैतं प्रशंसन्ति केचिदद्वैतवादिनः । द्वयोःश्रुत्यैकदेशत्वात् सर्वश्रुति समन्वयः ॥ भेदाभेदमते श्रौतैः परिग्राह्ये मुमुक्षुभिः" इति तस्मात् द्वैताद्वैतात्मक शक्तिविशिष्टाद्वैतमतमेव श्रौतमुमुक्षुग्राह्यं नत्वद्वैतमतं न च द्वैतमतम् । उक्तं च सिद्धान्तागमेऽपि "द्वैताद्वैतमतं वीरशैवं मोक्षैककल्पकम् । सर्ववेदान्तसिद्धान्तसारं सर्वार्थसिद्धिदम् ॥" इति । तस्मादहिकुण्डलं स्वर्णकुण्डलमित्यत्र यथा भेदाभेदौ प्रतीयेते तथा लिंगांगयोर्भेदाभेदाविति मनसि निधाय भगवता बादरायणेन "सदेव सौम्येदमग्र आसीत्" "तदैक्षत बहुस्यां प्रजायेय" इति श्रुतिमनुसृत्य ईक्षणलक्षणज्ञान

बहुभवनक्रियाशक्तिविशिष्टं स्वतन्त्रं लिंगरूपं ब्रह्म प्रथमसूत्रे जिज्ञास्यत्वेनोपदिश्यते ।

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अत्राथशब्द आनन्तर्यार्थो वर्तते । अतः शब्दो हेत्वर्थे, ब्रह्मशब्दश्च लिंगे । ब्रह्मणः जिज्ञासेति कर्मणि षष्ठी । जिज्ञासा पदं विचारलाक्षणिकम् । कर्तव्य इति शिष्यते । तथा च स्वस्वरूपाभेदेन ब्रह्मविचारः कर्तव्य इत्यर्थः । किमनन्तरमस्यारंभः इति चेत् धर्मविचारस्यवृत्तत्वात्तदनन्तरं ब्रह्मविचारः कर्तव्य इत्युच्यते । वेदाध्ययनानन्तरं कृत्स्नवेदार्थविचारस्य प्राप्तत्वात् ब्रह्मणोऽपि वेदार्थत्वात् तस्य जैमिनिना कुत्राप्यविचारितत्वात् परमसूक्ष्मत्वाच्च विचारार्हमेव ब्रह्मेति प्राधान्येन तद्विचारः प्रतिज्ञातो भगवता बादरायणेन । धर्मब्रह्मविचारयोरंगांगित्वेन अथ शब्दस्य मंगलार्थे वक्तव्ये पूर्वकाण्डविरोधात् कर्तव्यत्वेन प्रतिज्ञातब्रह्मविचारे अन्वयासंभवात् न मंगलार्थो युज्यते । अथ शब्दस्यानन्तर्यार्थकत्वेऽप्यन्यार्थनीयमानोदकुंभादिदर्शनवत् तदुच्चारश्रवणमात्रान्मंगलप्रयोजनस्याऽपि सता शिष्टाचारपरिपालनमपि भवत्येव । न चास्याथशब्दास्याधिकारार्थः संभवति । "अथ योगानुशासनम्" "अथ शब्दानुशासनम्" इत्यादौ अनुशासनरूपशब्दसंदर्भरचनायाः कर्तव्यत्वेन अधिकारयोग्यत्वेनाथशब्दस्याधिकारार्थकत्वेऽपि ब्रह्मविचारस्यांतःकरणवृत्तिरूपस्य कर्तव्यत्वेनाधिकारयोग्यत्वाभावात् । अधिकारोनामारंभः योगानुशासनमित्यादौ शब्द-

रचनात्पूर्वमकृता अथ शब्दविन्यासपूर्वकं कृतेतिवत् व्यासेन पूर्वं ब्रह्मजिज्ञासितमथशब्दविन्यासपूर्वकं जिज्ञासितमिति वक्तव्ये शास्त्रनिर्मातुर्व्यासस्य सूत्ररचनाया पूर्वमब्रह्मज्ञानित्वापत्तेश्च। नचास्याथशब्दस्य मंगलाधिकारानन्तर्यार्थत्रयं च युज्यते "सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायविरोधाच्च। एतेन अथशब्दो मंगलार्थः अधिकारार्थः आनन्तर्यार्थश्चेत्यत्र

"आनन्तर्येऽधिकारार्थे मंगलार्थे तथैव च"

इत्यादि गारुडपुराणोपन्यासः नवीनशांबरीविलसित इति सिद्धम्। न च पक्षान्तरांगीकारार्थोऽयम् "अथ शब्दः"। "अथ दध्नाजुहोति, अथ पयसा" इत्यादिवत्पूर्वमेकस्याप्रतिपादनात्तत्प्रसंगाभावात्। तस्मात् यस्य पूर्वकालवर्तिनो नैयत्येन प्रयोजकत्वम्। तदानन्तर्यं वक्तव्यम्। तच्च साधनचतुष्टयं, तदानन्तर्यं वक्तव्यमिति केवलाद्वैतिनां मतम्। तन्नयुक्तम्। चतुःसाधनसंपत्तीनां वेदान्तविचारानन्तरभावित्वात्। वेदान्तविचारात्पूर्वमेव तन्निश्चये तस्यानर्थक्यात्। तथाहि— नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्संपत्तिः, मुमुक्षुत्वमित्येवं साधनचतुष्टयम्। अत्र विषयदोषानुसंधानकृतविरागस्योत्कृष्टब्रह्मज्ञानाधीनत्वात्। ज्ञाते च ब्रह्मणि तज्जिज्ञासासंभवान्नित्यानित्यवस्तुविवेकस्य वेदान्तशास्त्रज्ञानाधीनत्वात्। नित्यानित्यवस्तुविभजनपूर्वकविवेकस्य जीवन्मुक्तधर्मत्वेन अपरोक्षज्ञानिनो बन्धशब्दित बुद्धिधर्मत्वासंभवान्मुमुक्षुत्वस्याप्यसंभवादन्यदेवपूर्ववर्ति इति वक्तव्यम्। न च भोजनगमनादिकं पूर्ववर्तीति वक्तुं शक्यते। तस्य नैयत्याभावात्।

ननु ज्ञानं द्विविधं परोक्षमपरोक्षं च। आद्यं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुतिनिचयश्रवणजनितं ब्रह्म नित्यमित्याकारकम्। अनेन ब्रह्मनास्तीत्यसदावरणस्याज्ञानकार्यस्यनाशेऽपि अभानावरणस्याज्ञानकार्यस्य नाशाभावात्। शाब्दबोधरूप ब्रह्मविशेष्यक नित्यत्वप्रकारकापरोक्षज्ञानादेव तद्भिन्नस्य जगतो नित्यत्व ज्ञानं तत एवानित्ययोरैहिकामुष्मिकयोर्विरागस्तथैव शमादयोऽपि संभवन्त्येव। तथाचाभानावृत्तेरपरोक्षज्ञानजन्यध्वंसप्रतियोगित्वात्। ब्रह्मापरोक्षज्ञानाय साधनचतुष्टयसंपत्तिः ब्रह्मजिज्ञासा पूर्वभाविनीति चेन्न। तस्यास्तदव्यवहितपूर्वभावित्वाभावात्। केषांचित्साधनानामग्निष्टोमादिस्थूलोपासनासु केषांचिद्दहरविद्यादि सूक्ष्मोपासनासु च कारणत्वात् घटं प्रत्याकाशादेरिवान्यथासिद्धेः। तथाहि "द्रव्यशौच मनःशौच "मित्यादिस्मृत्या शमादीनां श्रद्धान्तानामग्निष्टोमाद्यंगतायाज्ञायमानत्वात्। सगुणमूर्तिविषयकमनोवृत्तिरिव निर्गुणविषयकमनोवृत्तिनैरन्तर्यरूपनिधिध्यासनायोगात्। निर्गुणब्रह्मजिज्ञासायां निधिध्यासनोपयोगाभावात्। अपहत्व पाप्मत्वादिविशिष्टदहराकाशमध्यवर्तिनि नित्यत्वज्ञानादेव तदतिरिक्तस्य सर्वस्यानित्यत्वज्ञानात् नित्यानित्यवस्तुविवेकस्य सूक्ष्मदहरोपासनांगत्वात्। तद्विवेकसमुदितविरागस्यापि तदगंत्वात्। साधनानां स्थूलसूक्ष्मोभयोपासनाया अव्यवहितपूर्वभावित्वात्। तद्व्यवहितब्रह्मजिज्ञासायाः साधनचतुष्टयसंपत्यनंतरभावित्वासिद्धेः। तत्संपत्तेः ब्रह्मविचाराव्यवहितपूर्वक्षणावच्छेदेनावर्तमानत्वात्तथापि ब्रह्मविचारस्य स्थूलसूक्ष्मोभयोपासनारूपधर्मानन्तरभावित्वस्यैव वक्तुमौचित्यम्। वदति चामुमेवार्थं

श्रुतिरपि—

" तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ।
यज्ञेन दानेन तपसानाशकेन ॥ "

इति तस्मात् धर्मसंपत्तेरेव ब्रह्मजिज्ञासापूर्वभावित्वं युक्तम् । न च ब्रह्मणः धर्मस्येव वेदार्थत्वेऽपि धर्मविचारस्य वेदाध्ययनान्तरभावित्वमिव-ब्रह्मविचारस्यापि तदनन्तरभावित्वं युज्यते । धर्मविचारस्यैव कारणताग्राहक सामग्रीसत्वात् । ब्रह्मविचाराव्यवहितपूर्वभावित्वं धर्मविचारस्यैव वक्तुमौचित्यात् । यद्यपि ज्योतिष्टोमादि स्थूलोपासनानां दहरविद्यादि सूक्ष्मोपासनानां वा आराधनारूपत्वात् तदाकांक्षिताराध्यलिंग-शिव-हर मृड-रुद्र-पशुपति-महेश्वरादि शब्दित ब्रह्मप्रतिपादकवेदान्तशास्त्र पूर्वमीमांसाशास्त्रैक्येन " अथातो धर्मजिज्ञासा " इत्यारभ्य " अनावृत्तिः शब्दात् " इत्यन्तमेकमेव शास्त्रम् । तत्र " अथातः शेषलक्षणम् " इत्यादिवत् अवांतरपरिच्छेदार्थोऽयं " अथ तो ब्रह्मजिज्ञासा " इत्यारंभस्तथापि कर्तुभेदात्फलभेदात् "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इति पृथक् ब्रह्मोपदेशविधानाच्चैकशास्त्रानुपपत्तेस्तथापि न हीयते । ब्रह्ममीमांसाया धर्ममीमांसानन्तरभावित्वं धर्मज्ञानस्य ब्रह्मज्ञानसाधनत्वात् । धर्मविचारोपयुक्तानां श्रुतिलिंगवाक्यप्रकरण-स्थानसमाख्यानां वेदचोदनार्थवादश्रुत्यादि प्रमाणप्रतिपादनादीनां च ब्रह्मविचारोपयुक्तत्वात् । कथमन्यथा पूर्वोत्तरमीमांसात्वप्रसिद्धिः संगच्छते । धर्मविचाराभावे धर्मज्ञानाभावात् धर्मज्ञानाभावे तदनुष्ठाना-

भावात् । अनुष्ठेयधर्माभावे तत्साध्य ब्रह्मबोधाभावान्मोक्षाभावप्रसंगात् । न च धर्मस्य ब्रह्मबोधसाधनत्वे प्रमाणाभाव इति वाच्यम् । "तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति। यज्ञेन दानेन तपसा अनाशकेन" इति श्रुतेरेव प्रमाणत्वात् । यदि धर्मब्रह्मविचारयोः क्रमनियमो न स्यात्तदा "शास्त्रयोनित्वात्" "हृद्यपेक्षया मनुष्याधिकारत्वात्" इत्याद्यनेक सुत्रेषु पूर्वतन्त्रसिद्धानां वेदप्रामाण्याधिकारादीनां प्रतिपादनं न स्यात् । "विद्यां चविद्यां च यस्तद्वेदोभयं सह" "ब्रह्मवित्पुण्यकृत्" "सत्येन लभ्यः तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्" इत्यादि ज्ञानकर्मसमुच्चयप्रतिपादिनीनां श्रुतीनां उपलभ्यमानत्वात् । धर्मज्ञानयोर्मुक्तिफलकत्वाद्धर्मविचारानन्तरभावित्वं ब्रह्मविचारस्य युज्यते। न च "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" इत्यत्र कर्मणो मुक्तिफलकत्वाभावस्य श्रुतत्वात् कथं ज्ञानफलमेव धर्मफलं भवति । "यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यत्र कर्मफलस्य नश्वरत्वावगमात् । "तमेव विदित्वातिमृत्युमेति" इत्यत्र ज्ञानफलस्य नित्यत्वावगमादिति वाच्यम् । उदाहृतश्रुतीनां ज्ञानसमुच्चितकर्मनिन्दायां तत्पर्यात् ज्ञानसमुच्चित फलाभिसंधिरहितकर्मफलस्य मोक्षस्य नित्यत्वाच्च ज्ञानकर्मसमुच्चयवादे न कस्याश्चिच्छ्रुतेर्विरोधः । कथमन्यथा "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यत्रोक्तं समित्पाणित्वं कर्मनिर्विण्णस्य संभवति । गुरूपसदनावसती । तस्मात्समित्पाणित्वं गुरुकृतलिंगधारणकर्मोपयोगार्थमिति तद्विशेषणमेव ज्ञानकर्मसमुच्चयमाचष्टे ।

"यमेवैषवृणुते" इति श्रुतिरपि लिंगधारणं विधत्ते। "तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति। लिंगधारणकर्मफलमनश्वरं स्वकीयतनुशक्तिपराहन्तामयचिच्छत्त्यात्मकसायुज्यापरपर्याय सामरस्यमभिधीयते। "ब्रह्मविदाप्नोति परं" "सत्यं ज्ञानमनन्तं" "ज्ञात्वा शिवं शान्तिमत्यन्तमेति" "ईशं ज्ञात्वा अमृता भवन्ति" , तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं" "आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मथनाभ्यासात्पाशं दहति पण्डितः" "ज्ञात्वा देवं मुच्यते सर्वपाशैः" इत्यादि श्रुतिभिः ज्ञानफलमेव यत्तदेव सूक्ष्मोपासनारूप धर्मफलमिति स्पष्टं ज्ञायमानत्वाच्च। तदुभयविचारयोः क्रमनियमो युज्यते। सकलचिदचित्प्रपंचाकारपरमशक्तिविशिष्टाद्वितीयवैभवस्य सकलनिगमागमसाररहस्यनिदानस्य भव शिव शर्व पशुपति परमेश्वर महादेव शंभु लिंगप्रभृति पर्यायवाचकशब्दसारप्रकाशित परममहिमविलासस्य स्वशेषीभूतनिखिलचेतनसमुपासनानुगुणसमुदितनिजप्रसादसमर्पितपुरुषार्थसार्थस्य परस्य ब्रह्मणः प्रतिपादकमुपनिषच्छास्त्रं विचारणीयम्। तथा च तन्नियोगरूप चोदनालक्षणस्य तदाराधनाविशेषस्यार्थरूपस्य तत्तदर्थवादप्रकाशित प्राशस्त्यविलासस्य श्रुत्यादिसंवादितसकलांगपुंखितस्य वेदप्रमाणानुगुणस्मृतीतिहासपुराणाभियुक्तसूक्तिकामिकादिवातुलांत दिव्यागमवचनकृतोपबृंहणस्य विधिनिषेधादिमतो निखिलपुरुषार्थरत्नाकरस्य परमप्रबोधसाधनस्य भगवतो धर्मस्य विचारानन्तर्ये प्रथमाधिकरणस्याथशब्दवृत्तिरिति निर्णीयते।

ननु लिंगधारणपंचाचाराष्टावरणानां पूर्वकांडप्रतिपाद्यत्वाभावात् अग्निष्टोमादीनां तत्प्रतिपाद्यत्वात् कथं समनन्तरकाण्डोक्तब्रह्मविचारस्य वीरशैवीयधर्मानन्तरभावित्वमिति चेदुच्यते । धर्मो द्विधा पशुधर्मः पतिधर्मश्चेति । अग्निष्टोमाद्यश्वमेधान्तानां यज्ञानां पाशाश्रयत्वात्तेषां पशुधर्मता । लिंगधारणलिंगार्चनलिंगार्पितप्रसादग्रहणलिंगानुसंधान गुरुजंगमपूजनतत्पादोदकप्रसादसेवनलिंगांगसामरस्यबोधकपंचाक्षरमन्त्रजप भस्मरुद्राक्षधारण पंचचारादि वीरशैवीयधर्माणां पाशमोचकत्वात्तेषां पतिधर्मता । न वयं पशुधर्माणां ज्ञानसमुच्चयं ब्रूमः किन्तु विशिष्ट-पतिधर्माणामेव ।

ननु लिंगधारण लिंगार्चनादीनां केषांचित् वीरशैवीयधर्माणां "पवित्रंते विततं ब्रह्मणस्पते" "सर्वलिंगं स्थापयति पाणिमन्त्रं पवित्रम्" "अमृतस्य देवधारणो भूयासम्" "तव श्रिते मरुतोऽर्चयन्तः" "त्र्यंबकं यजामहे" "तेन त्यक्तेन भुंजीथाः" "अत्रिगुप्सातमश्नीयात् यदि पाप्मानमश्नितम्" "यच्छंचयोश्च मनुरायजेपिता तदश्याम तव रुद्रप्रणीतौ" "तस्मिन् यदन्तस्तदुपासितव्यम्" "आचार्यदेवो भव" "अतिथिदेवो भव" "चरणं पवित्रम्" "त्रिपादूर्ध्वमुदैत्पुरुषः । पादोस्येहाभवत्पुनः" "नकारादियकारांतं ज्ञात्वा पंचाक्षरीं जपेत्" "नमश्शिवाय च शिवतराय च" "भूत्यै न प्रमुदितव्यम्" "त्रिपुरवधार्थमहं निमीलिताक्षोऽभवं । तेभ्यो जलबिन्दव भूमौ पतिताः । ते रुद्राक्षा जाताः" इत्यादि श्रुतिप्रमाणकत्वेऽपि आचारादि लिंगविभजन भक्ताद्यंगविभजन शक्तिभेद भक्तिभेद हस्तभेदार्पित

भेदादीनां च परिदृश्यमानपूर्वकांडीयश्रुतिमूलकत्वाभावात् कथं तदानन्तर्यं ब्रह्मविचारस्येति चेन्न। पूर्वकाण्डनिषेधशास्त्राविषयकत्वात्तेषां पूर्वकाण्ड-प्रसिद्धत्वात् एकादश्यादिव्रतवत्।

ननु निष्कामसमनुष्ठानात् प्रतिधर्मरूपाणामग्निष्टोमादीनां मानन्तर्यमस्तु इति चेन्न। पूर्वाश्रयनिरसनस्थलविरोधात्। "शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते' इति भगवत्पादोक्तेः। "प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरम्" इति न्यायाच्च। अत एवोक्तं क्रियासारे प्रथमोपदेशे "अग्निष्टोमादयो यज्ञाः अश्वमेधावसानकाः। सर्वे ते शिवभक्त्यर्थं निश्चिता वेदशास्त्रयोः" इति। किं च तत्रैव "यथा पिपीलिका वृक्षमूलमाघ्राय तत्फलं। आरुह्य लभते तद्वत्" इत्यादिना निष्कामेन स्वपापस्य विच्छित्त्यै पशुधर्मानुष्ठानपरस्य पिपीलिका सादृश्यम्। पतिधर्मानुष्ठानपरस्य विहंगमसादृश्यमुक्तम्। एतेन पशुधर्माणां निष्कामसमनुष्ठितानामपि पतिधर्मसमर्पकत्वेन परंपरया मुक्तिसाधनत्वम्। पतिधर्माणान्तु ज्ञानेन सह साक्षात्कारणत्वं मुक्तौ इति पर्यवसितम्।

ननु तथापि पूर्वकाण्डोक्ताग्निष्टोमाद्यनुष्ठानाभावादवैदिकत्वात्कथं ब्रह्मविद्याधिकारिविषेषणत्वं वीरशैवीयधर्माणामितिचेन्न। किं नाम वैदिकत्वम्? पूर्वकाण्डोक्तयावद्धर्मानुष्ठातृत्वं वा, तदुक्तयत्किंचिद्धर्मानुष्ठातृत्वं वा? आद्येऽव्याप्तिः। कथं कृतोपनयनस्याशु सनकादेर्वेदान्तज्ञान-दर्शनेऽप्यवैदिकत्वं यावत्कर्मानुष्ठानराहित्यकृतं स्यात्। स्याच्च नैष्ठिक-ब्रह्मचारिणि असंभवश्च, यावन्नित्यनैमित्तिकानुष्ठानस्य ब्रह्मादिभिरप्यशक्य-

त्वात् । द्वितीये तु वीरशैवेपि यत्किंचिद्धर्मानुष्ठातृत्वासत्वात् । वैदिकत्वात्तद्विशेषणत्वं वीरशैवीयधर्माणां युज्यते । श्रीकरभाष्यकारस्तु शैवदीक्षितानां प्रयोजनाभावेपि ' नहि कर्मणि कर्मान्तरारम्भः " इति न्यायेन विरुद्धस्वभावयोः प्राकृताप्राकृतयोः संस्कारयोरेकत्रसामानाधिकरण्याभावात् ईश्वराज्ञाभङ्गभयात् वेदविहितयावत्कर्मानुष्ठानं कर्तव्यमेव" इति वीरशैवस्यैव यावत्कर्मानुष्ठानं वदतीति यावत् । तत्तुच्छम् । पूर्वश्रयनिरसनस्थलविरोधात् । किं च तत् सप्तसागरशोषणप्रवृत्तमहापण्डित कौशल्यमनुकरोत्येव । कर्मणां संकल्पाधीनत्वेन संकल्पविरोधे प्रायश्चित्तविधानात् संकल्पिताश्रमेणाश्रमधर्मोऽनुष्ठेयः । यथा ब्रह्मचारी गृहस्थाश्रमस्वीकाराभावे तद्धर्मानपि नार्हति । गृहस्थो वानप्रस्थधर्मान् वनस्थो यतिधर्मान् नार्हति । तद्वदतिवर्ण्यत्याश्रमिशब्दित शिववर्णाश्रमी वीरशैवो पूर्वप्राकृताश्रम धर्मान् नार्हति ॥ शिववर्णीशिवाश्रमधर्मान्विभूतिधारण रुद्राक्षधारणादीनर्हत्येव शिवाश्रमचातुर्वर्ण्यं चोक्तं सिद्धान्तशिखामणौ "वर्णाश्रमव्यवस्था हि" इत्यादिना । शिवधर्मे च "यः शिवब्रह्मचारी स्या" दित्यादिना । तस्मान्न पशुधर्म पशुधर्माधिकारापादकोपनयनानुवर्तनापेक्षा वीरशैवस्य किन्तु पतिधर्म पतिधर्माधिकारापादकाप्राकृतोपनयनापरपर्यायदीक्षानुवर्तनापेक्षैव ।

"अष्टमे वर्षे ब्राह्मणमुपनयीत, तमध्यापयीत"

"गर्भाष्टमे कृता दीक्षा मुख्या सा षोडशावधि ।
गौणी तदूर्ध्वमधमा वीरशैवान्वयायिनाम् ॥"

इति श्रुत्यागमवाक्याभ्यां प्राकृताप्राकृतोपनयनयोः समानकालिकत्वात् श्रुत्यागमयोरैकार्थकत्वात्। "वेदसिद्धान्तयोरैक्यमेकार्थ प्रतिपादना"दित्युक्तत्वात् प्राकृतोपनयन संस्कृतस्य वेदाध्ययनाधिकारवदप्राकृतलिंगधारणदीक्षासंस्कृतस्यापि वेदाध्ययनाधिकारात्। उप शिवसमीपे नीयते अनया ज्ञानकर्मोभयात्मिकया दीक्षया" इति व्युत्पत्त्या शिवदीक्षाया अप्युपनयनार्थकत्वस्य सुवचत्वात्। विहितकाले प्राकृतोपनयनसंस्कृतस्याप्यगस्त्यादिवत् षट्स्थल ब्रह्मविद्याधिकारार्थं विरागकाले अप्राकृतशिवलिंगधारणात्मक पाशुपतदीक्षारूपमुपनयनमावश्यकमन्यथा ब्रह्मविद्याधिकारस्यैवासिद्धेः। मुण्डकाद्युपनिषत्सु यावज्जीवलिंगधारणात्मकमहाव्रतस्यैव शिरोव्रत पाशुपतव्रतात्याश्रमव्रत शांभवव्रतत्वेन निरूपणात्। तस्य ब्रह्मविद्याधिकारिविशेषणत्वेन च निरूपितत्वात्। अत एव ब्रह्मविद्योपदेशलाभाय गुरूपसर्पणावसरे—

"स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"

इत्यत्र समित्पाणित्वं गुरुकृतलिंगधारणात्मकशिवदीक्षांगहोमकर्मोपयोगार्थमुच्यते। तथा च लिंगधारणादि पतिधर्मानन्तरभावित्वं ब्रह्मविचारस्येत्युक्तार्थः समीचीनः। तदुक्तं क्रियासारे—

"पतिधर्मा इमे ज्ञेयास्तदानन्तर्यमुच्यते" इति।

अत एव मुण्डकोपनिषदि—

"तान्याचरथ नियतं सत्यकामाः
एष वः पन्था सुकृतस्य लोके" इति।

मुमुक्षूणां ब्रह्मविद्यांगतया पतिधर्मान्विधाय, अग्रे "प्लवा ह्येते अदृढा यज्ञरूपाः अष्टादशोक्तमवरं येषु कर्म । एतत् श्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं पुनरेवापियन्ति" इति पशुधर्माणामवरत्वं पतिधर्माणां वरत्वं, पशुधर्मनिष्ठानां पुनः पुनः जरामरणादिमत्वं पतिधर्मनिष्ठानां तद्राहित्यं चोक्तम् । अवरत्वं च पशुधर्माणां पशुविशसन मांसभक्षण-सुरापानादिदोषदुष्टत्वरूपं बोध्यम् । पतिधर्माणां वरिष्ठत्वं च तत्रैवोक्तम् ।

"इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः" इति ।

एतावता पशुधर्माणां मुण्डकादिषु बहुधा निन्दितत्वात् । निन्दितकर्मानुष्ठातॄणामपि निन्दितत्वादविगीतशिष्टत्वाभावात्तेषां तदाचरण-विषयत्वाभावेन लिंगधारणेऽवैदिकत्वं साधयितुमशक्यत्वात् । ब्रह्म-विष्णुप्रमुखदेवगौतुमादिमुनीनां परमशिष्टानां आचारविषयत्वात् लिंग-धारणमवैदिकमिति वादिनो भ्रान्तास्तदुक्तं लिंगपुराणे उत्तरभागे एकविंशतितमोध्याये—

"ब्रह्मविष्ण्वादयो देवा मुनयो गौतुमादयः ।
धारयन्ति सदा लिंगमुत्तमांगे विशेषतः ॥" इति

अत एवोक्तं भगवता बादरायणेन "शिष्टास्ते लिंगधारिणः" इति तत्रभवता हरदत्ताचार्येणापि "अन्यानशिष्टानिति निश्चिनोमि" इति ।

ननु समग्रवेदाभ्युपगंतृत्वं शिष्टत्वम्, तत् यदि लिंगधारिषु वीरशैवेषु वर्तते। तदुक्त अग्निष्टोमादिधर्मानुवर्तनमपि स्यात् इति नभ्रमितव्यम्। ब्रह्मचारिणामग्निहोत्रादिकर्मप्रतिपादक वेदाभ्युपगंतृत्वेऽप्यग्निहोत्रादि कर्मानुवर्तनाभावात्। राजसूयादिक्षत्रियधर्मप्रतिपादक-वेदाभ्युपगंतृत्वेऽप्यन्येषां तदनुष्ठानाभावात्। सर्वेषामप्यशिष्टत्वप्रसंगात्। स्वाश्रमोचित धर्मानुष्ठातॄणां वीरशैवानामाचारविषयत्वाल्लिंगधारणं वैदिकमिति सिद्धम्। लिंगपुराणे उत्तरभागे एकविंशतितमोऽध्याये—

" वेदेषु शास्त्रसंघेषु पुराणेष्वागमेषु च।
ब्राह्मणस्य समाख्यातं लिंगधारणमुत्तमम्॥ "

इति वेदेषु ऋगादिषु, शास्त्रेषु स्मृतिषु इत्यर्थः।

नन्वित्थं चेत्कथं त्यक्तं कैश्चिल्लिंगधारणमिति चेदुक्तं पूर्वाचार्यैरेव।

" वेदशास्त्राण्यनालोच्य केचित्पण्डितमानिनः।
धारणं शिवलिंगस्य नांगीचक्रुरमर्षतः॥ " इति।

" धनीह्युदररोगस्थो न भुंक्तत्यन्नमुत्तमं "

इति च धनिकस्य उत्तमान्नभोजनाभावो यथा प्रबलौदर्यरोग-निमित्तकस्तथा केषांचिद्वैदिकलिंगधारणस्वीकाराभावस्तत्कृतपूर्वार्जितदुरदृष्ट रोगनिमित्तक इति मन्तव्यम्। तस्मात् " अतत्पतनुर्नतदामोऽश्नुते " इति श्रुतेः लिंगधारणात्मकदीक्षाग्नितप्ततनोः मोक्षाभावार्थकत्वेन।

व्यतिरेकमुखेन लिंगधारणस्य मुक्त्यसाधारणकारणतायाः "अमृतस्य देवधारणो भूयासम्" इति श्रुतेरन्वयमुखेन तत्कारणतायाश्चावगमात्। मुण्डकाद्युपनिषत्प्रसिद्ध शिरोव्रतात्याश्रमव्रताद्यपरपर्याय सांगलिंगधारण-महाव्रतात्मक धर्मानन्तर्यमित्यथ शब्दस्य पर्यवशितार्थः।

"अष्टमे वर्षे ब्राह्मणमुपनयीत" "तमध्यापयीत" "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनानन्तरं सर्वोऽपि वेदार्थो विचारणीयः। तत्र कर्मकाण्डस्य प्राथम्यात्तदर्थविचारः प्रथमं जैमिनिना कृतः। तद्विचारादेव दहरविद्यादि सूक्ष्मधर्मोऽपि विचारितप्राय एव। तद्विषयीभूतन्तु ब्रह्म विचारितमर्थात् पूर्वमीमांसायां ब्रह्म यतो न विचारितमतस्तस्मादित्यर्थः। न च कृत्स्नस्य वेदार्थस्य विचारितत्वात्। ब्रह्मणोऽपि वेदार्थत्वात् तद्विचारो व्यर्थ इति वाच्यम्। पूर्वतन्त्रे कुत्रापि ब्रह्मणो विचारितत्वाभावात् पूर्वतन्त्रे न कृत्स्नस्य वेदार्थस्य विचारितत्वसिद्धिस्तस्माद्बादरायणेन ब्रह्मविचारः प्राधान्येन प्रतिज्ञातः। तद्विचारोऽपि श्रुतिवाक्यत एव कर्तव्यः।

"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो
निदिध्यासितव्यः"

इति श्रुतेः।

"भाषाप्रबन्धैर्यद्ज्ञानं यच्च पौरुषवाक्यतः।
न तस्य चात्र ज्ञानस्य पुरुषार्थैकहेतुता॥"

इति क्रियासारोक्तश्च।

ननु " स्वाध्यायोध्येतव्यः " इत्यध्ययनविधेरर्थावबोधफलस्याव-बोधकसापेक्षत्वात् । अर्थावबोधस्य च विचारसापेक्षत्वात् वेदार्थस्य ब्रह्मणोऽप्यध्ययनविधित्वेनाक्षिप्तस्य विचारस्य विषयत्वे " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इत्यादिना पृथक् ब्रह्मोपदेशविधिरनर्थः स्यादिति चेन्न । प्राकृतोपनयन संस्कृतस्य वेदाध्ययनानन्तरं पूर्वमीमांसा पाठमात्रेण कर्मविद्याया अनुष्ठानासंभवात् तावतासंन्दिग्धवाक्यार्थ निर्णयेऽपि नानाशाखागतांगोपसंहारेण प्रयोगस्य परिज्ञानाभावात् । किन्तु कल्पसूत्राध्ययनेन तत्तत्कर्माभिज्ञोपदिष्ट-प्रयोगवचनेन च यथासंभवं प्रयोगान् ज्ञात्वा कर्मानुष्ठानं संभवति । एवमिहापि " आचार्याद्धेव विद्या विदिता साधिष्ठं प्रापत् " इत्येवमादि शास्त्रात्तत्तद्विद्याभिज्ञादाचार्यात्पतिधर्मानुष्ठानाधिकारसंपादकप्राकृतोपनयन-प्राप्त्यर्थं समित्पाणिः सन्नुपसर्प्य तदुपनीतः सन् तत ईदृशं ब्रह्मोपास्य-मेत वद्गुणविशिष्टं एतानि चोपासनस्य पूर्वोत्तराण्यंगानीदृशश्चोपासकः तस्य चैतद्व्रतं ईदृशि चोपासनानीदृशीचोपासकस्य गतिरीदृशी च फलप्राप्ति-रित्येवं विद्योपदेशमन्तरेण विद्यानुष्ठानासिद्धेः । तस्य पृथगुपदेश-विधेरर्थवत्त्वात् ब्रह्मविद्योपदेष्टुराचार्यस्याप्ययं नियमः—

" तेषामेवैतां ब्रह्मविद्यां वदेत,
शिरोव्रतं विधिवद्यैस्तु चीर्णम् "

इति इदमेव वचनं सूतसंहितायां ।

" व्रतं पाशुपंत चीर्णं यैर्द्विजैरादरेण तु ।
तेषामेवोपदेष्टव्यमिति वेदानुशासनम् ॥ "

इत्युपबृंहितम् ।

" बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति ।
इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् ॥

" वेदार्थोऽयं स्वयं ज्ञात्वा तत्राज्ञानं भवेदिति ।
ऋषिभिर्निश्चिते तस्मिन् का शंका स्यान्महात्मनाम् ॥"

इत्यादि स्मृतौ स्वतन्त्रतया वेदार्थनिरूपणस्य निषिद्धत्वान्नान्यार्थो युक्तः शिरोव्रतशब्दस्य । एतद्व्याख्यानकृन्माधवाचार्योऽपि तद्वचनं वेदानुशासनमिति मन्यते । एतावता शिरोव्रतं पाशुपतव्रतमेव । एतदेव यावज्जीवलिंगधारणमहाव्रतमिति सिद्धम् ।

" लिंगांगसंगिनां वत्स पुनर्जन्म न विद्यते ।
एष पाशुपताचारः पशुपाशनिवृत्तये ॥ "
सर्ववेदान्तसारोऽयमत्याश्रम इति श्रुतिः ॥
परब्रह्माभिधं लिंगं पशुपाशविमोचकम् ।
यो धारयति भक्त्या स पाशुपत उच्यते ।
शरीरत्रितये भक्त्या लिंगं परशिवात्मकम् ।
यो धृत्वा विचरेद्भूमौ स पाशुपत उच्यते ॥ "

इत्यादित्यपुराणादिवाक्येषु पाशुपतशब्दस्य लिंगधारिपर्यायत्वेनाभिधानात् । प्राक् प्राकृतोपनयनदीक्षितस्यैव " अहरहस्सन्ध्यामुपासीत "

" स्वर्गकामो ज्योतिष्टोमेन यजेत " इत्यादि श्रुतिविहिताग्निष्टोमादि पशुधर्माधिकारवल्लिंगधारणदीक्षितस्यैव ज्ञानसमुच्चित शिवध्यानधारणार्चनार्पणार्पितग्रहणादि पतिकर्माधिकार सिद्धेरप्रत्यूहत्वात् । पाकस्य वह्निवन्मोक्षं प्रति लिंगदीक्षाया मुख्यसाधनत्वात् लिंगधारणं मोक्षांगमिति सिद्धान्तः ।

अतः अकारवाच्यस्य विष्णोः प्रसादादिति केचित् । तन्न अकारस्य विष्णुवाचकत्वेऽपि तत्प्रसादवाचकत्वाभावात् । अकारवाच्याद्विष्णोरेव ब्रह्मविचारः कर्तव्य इत्युक्ते विष्णोर्बोधकत्वेन जीवकोटिप्रविष्टत्वान्न ब्रह्मकोटिप्रविष्टत्वं सिध्यति । अत एव विष्णोरुपासककोटिनिवेशो नारायणोपनिषत्प्रसिद्ध इति हरदत्ताचार्योक्तिः संगच्छते । यद्यतः शब्दस्य विष्णुप्रसादादित्येवार्थस्तदा अर्चनाद्याविर्भूत तादृशमहापुरुष प्रसादादेव मुक्तिः स्यादिति शास्त्रवैयर्थ्यं सुदृढं भवेत् ।

अपि च सत्यपि विष्णुप्रसादे शास्त्रविचारमन्तरा मुक्तिर्नेति विष्णुप्रसादस्याकिंचित्करत्वात् । तस्यात् धर्मविचारस्य वृत्तत्वात् ब्रह्मणः परिशेषितत्वादित्यतः शब्दार्थो वक्तव्यः । ब्रह्म च वक्ष्यमाणलक्षणं लिंगं प्रसिद्धतैत्तिरीयोपनिषदि " आत्माय नमः", इत्यारभ्य लिं शब्दपरंपरायाः श्रूयमाणत्वात् लिंगमेव शिवः " शिवाय नमः शिवलिंगाय नमः " इति चतुर्थ्यन्तपदाभ्यां निर्णीयते। अयमेव शिवः—

" यदा तमस्तन्न दिवा न रात्रिर्न सन्न-
चासच्छिव एव केवलः ।"

इति सृष्टेः प्रागपि वर्तते इति ज्ञायते । अस्यैव " शिवमद्वैतं चतुर्थम् " इति त्रिमूर्त्यतीतत्वं शिवज्ञानस्यैव—

" यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ "

इति मोक्षसाधनत्वं चास्यैव ' शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य " इति मुमुक्षूपासनाविषयत्वम् । अस्यैव—

" ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ "

" तत्परं ब्रह्म स एक एव रुद्रः " इति च श्रुत्या परब्रह्मत्वं दृढं विजानीमः । तस्मात्तद्विचारः कर्तव्यस्तदितरविष्ण्वादीनां कार्यकोटिप्रविष्टत्वात् न ब्रह्मत्वम् । " ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते " इति श्रुतेः । अत एवोक्तं श्री रेणुकभगवत्पादैः—

" शिव इत्यक्षरद्वंद्वं परब्रह्मप्रकाशकम् ।
मुख्यवृत्त्या तदन्येषां शब्दानां गुणवृत्तितः ॥ "

इति । परब्रह्मैव लिंगम् ।

" अपरिच्छिन्नमव्यक्तं लिंगं ब्रह्म सनातनम् ।
उपासनार्थमन्तस्थं परिच्छिन्नं स्वमायया ॥

लयं गच्छति यत्रैव जगदेतच्चराचरम्।
पुनः पुनः समुत्पत्तिं तल्लिंगं ब्रह्मशाश्वतम् ॥

तस्माल्लिंगमिति ख्यातं सत्तानन्दचिदात्मकम् ।
बृहत्वात् बृंहणत्वाच्च ब्रह्मशब्दाभिधेयकम् ॥"

इति च। "यमंतः समुद्रे कवयोऽवयन्ते" "तदेव ब्रह्म परमं कवीनाम्" इत्यादि महानारायणोपनिषद्वाक्यगत यत्तच्छब्दानां शिवपरकत्वस्य तत् शैवभाष्ये सिद्धान्तितत्वात् नात्र ब्रह्मशब्दो विष्णुपर इति मन्तव्यम्। लोके अहमिति प्रत्ययस्य शरीराद्यतिरिक्त स्वात्मब्रह्ममात्रविषयकत्वाभावात्। वेदे "अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिना वाक्येन ब्रह्मणः परिच्छिन्नत्वा-परिच्छिन्नत्वावगमात् ब्रह्मणः सन्दिग्धत्वम्। "ब्रह्मविदाप्नोति परम्" "ईशं ज्ञात्वा अमृता भवन्ति" "ज्ञात्वा देव मुच्यते सर्वपाशः" इत्यादिवाक्येन सप्रयोजनत्वं च। तस्माद्ब्रह्मण्यजिज्ञास्यत्वं संभवत्येवातो ब्रह्ममीमांसा शास्त्रारम्भो युज्यते इति ॥ १ ॥

॥ प्रथमसूत्रवृत्तिः समाप्ता ॥

लक्षणप्रमाणाभ्यां हि वस्तु सिद्धिरिति न्यायमनुसृत्य उद्दिष्टस्य ब्रह्मणः किं लक्षणमित्याकांक्षायां द्वितीयसूत्रं तल्लक्षणविधायकमवतारयति भगवान् बादरायणः—

सू ॥ जन्माद्यस्य यतः ॥ २ ॥

आद्यस्य विष्णो जन्म जननं यतो जातं तद्ब्रह्म । "आद्यं पुरुषमीशानम्" इति भारतवचनात् पुरुषपदार्थो हरिः । "पुरुसंज्ञे शरीरेऽस्मिन् शयनात्पुरुषो हरिः" इति श्रवणात् । तस्य जननं च "ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते" इत्यादि श्रुतिषु श्रूयते । अथवा अस्य अकारवाच्यस्य विष्णोः जन्मादि यतः सकाशात्तद् ब्रह्मेत्यर्थः । अथवा अस्य प्रत्यक्षादि प्रमाणसन्निधापितस्य चराचरात्मकस्य घटचैत्राद्युपलक्षितस्य जगतः जन्मादि जन्म आदिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । यतः पदेन कारणनिर्देशः कृतः । तथा च नामरूपव्याकृताचिन्त्यरचनारूप चेतनाचेतनात्मकस्य अस्य प्रपंचस्य यतः यस्माल्लिगाद्ब्रह्मणः जन्मस्थिति प्रलयतिरोभावानुग्रहकृत्यं भवति तद्ब्रह्मेत्यर्थः ।

"यतो वा इमानि भूतानि जायन्ते ।
येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति
तद्ब्रह्म तद्विजिज्ञासस्व ॥" इति श्रुतेः ।

"प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः"

इति च । जगज्जन्मादि पंच व्यापारेषु सृष्टिस्थितिलयाश्चेतनाचेतनोभयविषयाः नियमनबन्धकारण तिरोभावशक्तिमोक्षकारण अनुग्रह-

शक्तिद्वयं चेतनैकविषयमिति ध्येयम् । चतुर्मुखादीनां पंचानां जीवकोटि प्रविष्टत्वात् अनात्मन्यात्माभिमानात् तत्परशिवमहालिंगनियम्यत्वान्न विश्वकर्तृत्वम् । "सत्यंज्ञानमनन्तं ब्रह्म" इत्यादि श्रुतिभिः सूत्रानुक्तमपि स्वरूपलक्षणं ज्ञातव्यम् ।

ननु जगज्जन्मादिकारणत्वं लक्षणं ब्रह्मणोऽनुपपन्नं कार्यकारणयोः सामानाधिकरण्याभावात् । जन्मादेर्जगन्निष्ठत्वात् इति चेन्न । घटादेरुत्पत्तिविनाशयोः कालकरणाधीनत्वेनानुभूयमानत्वात् करणानां कर्तृसापेक्षत्वात् तस्य च देशकालाधीनत्वेन स्वतन्त्रेण पुरुषेण विना न कस्यचिदुत्पत्तिविनाशौ संभवतः । तस्माज्जगज्जन्मादेः ब्रह्मनिरूपित-कार्यत्वात् कार्यकारणयोः सामानाधिकरण्यात् यत्किंचित् घटादि व्यक्ति प्रति तस्य परंपरया कारणत्वेऽपि कार्यसामान्यस्य चराचरात्मकस्य शब्दार्थरूपस्य विश्वस्य साक्षात्कारणत्वात् ।

ननु जगज्जन्मादि कारणत्वलक्षण न ब्रह्मणः । किन्तु मायाया एव "मायां तु प्रकृतिं विन्द्यात्" इति श्रुतेः इति चेन्न । "मायिनं तु महेश्वरम्" इति वाक्यशेषात् । ईश्वरात्मिकाया एव प्रकृतित्वाव गमात् । तथा च सूक्ष्मचिदचित्प्रपंचाकार शक्तिविशिष्टस्य ब्रह्मण स्थूलचिदचित्प्रपंचाकार शक्तिविशिष्टस्य कार्यत्वं सिद्धम् ।

ननु ब्रह्मणः मिथ्याभूत मायाविशिष्टत्वे तस्यापि मिथ्यात्वात् शून्यमतप्रवेशापत्तिरितिचेन्न । "मायां तु प्रकृतिं विद्यात्" इत्यत्र अध्यासिमतसिद्ध मायाया अस्मदनभिमतत्वात् । किन्तु "मं शिवं

अयति गच्छति नाम अविनाभावसंबन्धेन वर्तते ” इति मायाशब्दस्य व्युत्पत्तिबलात् परशिवानुयोगिकसमवायतादात्म्यान्यतरसबन्धप्रतियोगिनी विमर्शशक्तिर्गृह्यते। इयमेव विमर्शशक्तिर्मयूराण्डरसगतपादपक्षवर्णवैचित्र्यन्यायेन स्वान्तर्लीनचराचरासती विभागपरामर्शदशायां गुणत्रयात्मिका भवति। तदुक्तं भगवता रेणुकशिवाचार्येण —

“ गुणत्रयात्मिका शक्तिः ब्रह्मनिष्ठा सनातनी ।
तद्वैषम्यात्समुत्पन्ना तस्मिन् वस्तुत्रयाभिधा ॥ ”

इति। तथा च शिवाविनाभूतसूक्ष्मचिदचित्प्रपंचाकारचिच्छक्त्युन्मेषनिमेषकृता जगतो जन्मलयौ शक्तेरुपादानकारणत्वात्। शिवस्यापि तन्तुवायस्येव स्वप्राधान्येन स्वशक्तिप्राधान्येन च निमित्तोपादानत्वं च सिध्यति। कल्लटाचार्योऽप्याह—

“ यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शङ्करं स्तुमः ॥ ”

इति। तस्माच्छिवाविनाभूतपराहन्तामयविमर्शशक्तेरङ्गीकरणीयत्वात्। पराभिमताध्यासशब्दितायाविद्यायां मानाभावात्। अत एव तत्कृतजगतोऽपि मिथ्यात्वे मानाभावात्। “ मायां तु प्रकृतिं विन्द्यात् ” इत्यत्र मिथ्याभूतमायाया अग्राह्यत्वात्। शक्तेरेव मायाशब्दितत्वात्। शक्तिशक्तिमतोरभिन्नत्वात्। शक्तिविशिष्टस्य लिंगशब्दितस्य ब्रह्मणः जन्मादिकारणत्वलक्षणमुपपद्यते।

नन्वविद्या वस्तु लक्षणप्रमाणाभ्यां सिध्यत्येव कथं? तत्र मानाभावः। लक्षणं तावत् अनादिभावत्वे सति ज्ञाननिवर्त्यत्वम्। इदं च लक्षणं भाष्यकाराभिमतम्। "अनादिभावरूपा काचिदविद्या" इति। "अस्य चानर्थहेतोः प्रहाणाय" इति चोक्तत्वात्। ज्ञाननिवर्त्यत्वानुपादाने आत्मन्यातिव्याप्तिः। विशेष्यमात्रोपादाने प्रथमक्षणोत्पन्नज्ञानेऽतिव्याप्तिस्तस्य द्वितीयक्षणोत्पन्नज्ञानेन निवर्त्यत्वात्। अनादिपदेनैव तद्वारणे भावपदं व्यर्थमिति न भ्रमितव्यम्। ज्ञानप्रागभावेऽतिव्याप्तिवारणार्थत्वात्। न च रजतोपादानात् ज्ञानस्य अनादित्वाभावात् तत्राव्याप्तिरिति वाच्यम्। तस्याप्यनादिचैतन्याश्रितत्वेनानादित्वस्वीकारात्। न चाभावस्योपादाने अज्ञानेऽव्याप्तिः। तत्र भावत्वघटितलक्षणाभावात्। भावरूपाज्ञानस्य अभावनिरूपितकारणत्वे स्वीकृते असतः सदुपादानकत्वं स्यादिति वाच्यम्। तत्र भावत्वस्य अभावविलक्षणमात्रत्वात्। अभावोपादानेऽज्ञानेऽप्यभावविलक्षत्वस्वीकारान्नाव्याप्तिः। न चाविद्याचैतन्यसंबंधेऽतिव्याप्तिस्तस्याप्यविद्यात्मकत्वात्। इत्यादिनोक्तमज्ञानलक्षणं न संभवति। ज्ञानाज्ञानयोरहिनकुलादिवत्सहानवस्थानलक्षणविरोधाभावात्। अज्ञानस्य चन्द्रकलंकन्यायेन चैतन्याश्रितत्वस्वीकारात्। अन्यथा अज्ञानस्य निरधिष्ठानत्वप्रसंगात्। निरधिष्ठानविभ्रान्तेरप्रसिद्धत्वात्। लोके साधिष्ठानभ्रान्तेरेवानुभूयमानत्वात्। किं च तयोः वध्यघातकरूपविरोधस्याप्यसत्वात्। अज्ञाने ज्ञाननिवर्त्यत्वाभावात्।

ननु शुक्तिरजतस्थले रजतज्ञानस्य उत्तरक्षणवृत्ति शुक्तिज्ञानेन

बाधदर्शनात् । तत्त्वज्ञाननिवर्त्यत्वमज्ञानेऽस्तीति चेन्न । शुक्तिज्ञान-रजतज्ञानयोः घटपटज्ञानयोरिव भिन्नकालभिन्नविषयत्वात् न बाध्य-बाधकभावः । न च नेदं रजतं किन्तु शुक्तिरेवेत्युत्तरकालिकज्ञान-निवर्त्यत्वस्य रजतज्ञाने सत्वात् कथं न बाध्यबाधकभाव इति वाच्यम् । घटज्ञानानन्तरं पटं पश्यतः प्रमातुर्नायं घटः किन्तु पट एवेति ज्ञानस्यापि घटज्ञाननिरूपितबाधकतापत्तेः । न च घटपटज्ञानयोः भिन्नधर्मिकत्वात् तत्र बाध्यबाधकभावाभावात् । इद रजतं नेदं रजतमिति पूर्वोत्तरज्ञाने-योरेकधर्मिकत्वात् तद्वत्ताज्ञानं प्रति तदभाववत्ताज्ञानस्य बाधकत्वात् । पुरोवर्तिनि रजतत्ववत्ताज्ञानस्य तदभाववत्ताज्ञानबाध्यत्वमिति वाच्यम् । दण्डभाण्डन्यायेन तयोः सामानाधिकरण्याभावात् तयोभिन्नकालवृत्तित्वात् । न च विनश्यदवस्थापन्न रजतज्ञानस्य नेदं रजतमिति ज्ञानस्य त्पारक्षणे विद्यमानत्वात् । तयोः परस्परं सामानाधिकरण्यं सभवतीति वाच्यम् । ज्ञानाज्ञानयोर्जडत्वेन तयोस्तादृगौनमुख्यशून्यत्वात् । जडस्यान्तःकरण-वृत्तिरूपस्य ज्ञानस्य रजताभावविषयकस्य पूर्वोत्पन्नरजतभ्रान्तनाशानुकूल-कृतिमत्वाभावात् । बाध्यबाधकभावाभावात् । किन्तु घटज्ञानानन्तरं घटं त्यक्त्वा पट पश्यतः प्रमातुरिच्छावशात् घटज्ञानस्य निमेष पटज्ञानस्योन्मेष इति वत् एकस्मिन्नेव धर्मिणि मान्निध्यवशात् नेत्रपृष्ट-त्वादि विशेषं पश्यतः दूरत्वादिनोद्भूतस्य प्राक्तनरजतज्ञानस्य निमेषः नेदं रजतं शुक्तिरेवेत्युत्तरकालिकज्ञानस्योन्मेष इत्यंगीकर्तव्यमिति पूर्वाचार्या-णामाशयः । अपि च ज्ञाननिवर्त्यत्वमित्यत्र ज्ञानं किं 'यत्साक्षाद परक्षाद्ब्रह्म" इति श्रुतिसिद्धापरोक्षरूपं चैतन्यं वा "अहं ब्रह्मास्मि

इत्यनुभववाक्यजन्यवृत्तिर्वा ? नाद्यः, तादृशचैतन्यस्य सृष्टेः प्रागपि विद्यमानत्वेन तदैव मूलाज्ञानस्य नाशे तत्कृतपरिदृश्यमानप्रपञ्चस्यालाभापत्तेः तस्य निर्विशेषत्वेन नाशानुकूलकृतिमत्वाभावाच्च । न द्वितीयः, तादृशवृत्तेरज्ञानैककार्यत्वादुपादानोपादेययोर्भेदाभावात् । "मृत्तिकेत्येव सत्यम्" इत्यत्र मृद्व्यतिरेकेण कार्यस्यासत्वस्वीकारात् । तादृशवृत्तेरविद्यात्मकत्वात् स्वस्य स्वेनसाकं विरोधाभावात् स्वनिष्ठबाध्यबाधकभावस्याननुभूतत्वात् । तस्य द्विनिष्ठस्यैवानुभवात् । कथंचिद्वृत्तेर्बाधकतांगीकारेऽपि वृत्तिबाधाय बाधकान्तरस्य स्वीकरणीयत्वेनानवस्थापत्तेः तथा वृत्तिसत्वे मोक्षाभावप्रसङ्गः । न च वननाशकाग्नेर्नाशकान्तराभावात् स्वयमेव यथा नश्यति तथैव वृत्तेरपि स्वयं नश्यतीति वाच्यम् । तत्राग्नेर्वायुकालादीनां नाशकत्वकल्पनात् नाशं प्रति स्वप्रतियोगिविजातीयपदार्थस्य नियमेन कारणत्वस्यैवानुभवात् । अनुभूयते च घटादेर्नाशो घटविजातीयदण्डादिना । भवन्मते तादृशवृत्तिनाशपूर्वभाविनः कस्यचित्तद्विजातीयपदार्थान्तरस्य सत्वे द्वैतापत्त्या मोक्षाभावप्रसंगात् । तादृशवृत्तिः स्वयं नश्यतीत्युक्तमयुक्तम् । तस्मात् ज्ञाने ज्ञाननिवर्त्यत्वं नास्ति तत् कथमुक्तमित्यालोचनीयम् । एवमनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वमित्युक्तलक्षणे पूर्वोत्पन्नघटज्ञाने उत्तरक्षणोत्पन्नज्ञाननिवर्त्यत्वस्य सत्वात् तत्रातिव्याप्तिवारणाय अनादित्वपदमित्युक्तमप्ययुक्तमेव । घटादिवृत्तेरप्यनादित्वात् । अन्यथा कालान्तरभाविघटविषयकस्मरणानुपपत्तेः । न च संस्कारद्वारा तदुपपद्यत इति वाच्यम् । ज्ञानान्तरेण घटाद्यनुभवनाशे संस्कारनाशस्यापि वक्तव्यत्वात् । तस्यापि घटविषयकत्वात् ।

घटविषयकानुभवस्यैव नाशो न तद्विषयकसंस्कारस्येत्यत्र विनिगमकाभावात्। वृत्तीनामिव तज्जन्मसंस्काराणामपि स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वमकामेनाप्यभ्युपगन्तव्यम्। तथा च स्मरणानुपपत्तेर्दुर्वारत्वात् वृत्तेर्नित्यत्वम्।

अपि च "अहं ब्रह्मास्मि"इत्यखण्डाकाराकारितचित्तवृत्तेर्नाशस्य स्वप्रतियोगिसमवायिदेशे स्वीकर्तव्यत्वात् घटादेर्नाशस्य तथा दृष्टत्वात् ब्रह्मणस्तादृश वृत्त्युपादानकारणत्वाभावात् अज्ञानस्योपादानस्य च तदानीं नष्टत्वात् वृत्तेः प्रागभावाप्रतियोगित्वात् ध्वंसाप्रतियोगित्वाच्च न प्रागभावाप्रतियोगित्वरूपस्यानादित्वस्य सार्थक्यम्। न तावदज्ञानं प्रावाभाव प्रतियोगिजडत्वात् घटवत्। किं च तद्यदि स्वतः सिद्धं स्यात् तर्हि स्वप्रकाशं स्यात्। यदि परतः सिद्धं तदा घटादिवत्कार्यत्वेन तत्कारणान्तरान्वेषणमुखेनानवस्था स्यात्। ज्ञानप्रागभावे अतिव्याप्तिवारणार्थमुक्तं भावरूपत्वमपि न संभवति। नञर्थोल्लिखितत्वात्। यदि विरोधार्थकनञो अधर्मादेरिवाज्ञानस्याप्युच्येत भावरूपत्वं तदा ज्ञानप्रागभावेऽतिव्याप्यभावात्तस्य वैयर्थ्यमेव स्यात्। उक्तरीत्या ज्ञानस्य प्रागभावाप्रतियोगित्वात् अज्ञानेप्युक्तयुक्त्या ज्ञानविरोधित्वाभावात्तस्मात् तत्कृतमज्ञानलक्षणमज्ञानविलसितमेव। एवमज्ञानसद्भावे प्रमाणम् यद्यस्ति तत्किमज्ञानाद्भिन्नं वा? अभिन्नं वा भिन्नं चेत् अज्ञानभिन्नस्य ज्ञानैकरूपत्वेन प्रमाणस्य ज्ञानैकरूपत्वात् सत्ताश्रयप्रसंगात्। अभिन्नं चेत् इदं प्रमेयमिदं प्रमाणमिति विभागो न स्यात्।

यदि स्वसद्भावे स्वयमेव प्रमाणं तदा स्वप्रकाशतापत्तिः आत्मवदन्य-निरपेक्षतया भासमानत्वात् इत्यादि दोषगणदूषितत्वात् तत् स्वीकृताध्यासशब्दिताज्ञाने प्रमाणं न पश्यामः। अहमज्ञइत्यनुभवस्य चित्तोन्मिषच्चित्प्रकाशाव्यतिरिक्तज्ञानमलविषयकत्वात्। "गाढं गूढोऽहमस्वाप्सं न किंचिदवेदिषम्" इति सौषुप्तानुभवस्यापि तथात्वात्। न तयोर्मिथ्याभूताज्ञाने प्रमाणतां मन्यामः। तथा च ज्ञानाज्ञानयोर्विरोधाभावान्निवर्त्यनिवर्तकभावासंभवात्। चित्तवृत्तेर्नित्यत्वेन लक्षणघटकानादिभावत्वयोः सार्थक्यभावात् लक्ष्येऽपि तयोरभावादसंभवात्। तत्र मानाभावाच्च न तदुक्तमज्ञानं सिध्यति।

नन्वयं घट इत्यादि चित्तवृत्तेरिन्द्रियार्थसन्निकर्षजन्यत्वात् कथं नित्यत्वमिति चेन्न। इन्द्रियार्थसन्निकर्षस्य घटाद्यावरणस्वभावस्यान्धकारस्य निस्सरणं विना पूर्वं स्वत एव घटस्य प्रकाशाभावात् दीपाद्यालोकसंबंधस्य बाह्यतमसोः निस्सरणार्थतावात् चित्तवृत्त्यावरणस्वभावाय चित्तोन्मिषिताविद्याशक्तेस्तमसोऽभिभवार्थत्वात्। नेन्द्रियार्थसंयोगस्य चित्तवृत्तिकारणत्वं स्वीकुर्मः। यदि चित्तवृत्त्यावरणस्वाभावा या अविद्याशक्तेर्नाशकारणस्येन्द्रियार्थसंबंधस्य चित्तवृत्तिकारणत्वं तदा घटावरणस्वभावस्य तमसो नाशकारणस्यापि दीपाद्यालोकसंबंधस्य घटकारणत्वं स्यात्। स्याच्च तन्नाशे घटनाश इष्टापत्तावनुभवविरोधः स्यात्। इन्द्रियजन्यत्वविशिष्टज्ञानित्वलक्षणस्य नित्यप्रत्यक्षरूपे आत्मन्यसत्वात् अव्याप्तेः तस्याजन्यत्वात्। न च तस्य जन्यप्रत्यक्षलक्षणत्व न्नाव्याप्तिरिति वाच्यम्। जन्यप्रत्यक्षस्यैकं लक्षणं तदन्यप्रत्यक्षस्यान्यलक्षणमिति लक्षणा-

द्वैविध्यापेक्षया लाघवादजन्यत्वमेव प्रत्यक्षसामान्यलक्षणमिति वक्तुमौचित्यात् ।

ननु घटादिप्रत्यक्षस्याप्यजन्यत्वे तस्य सदातनत्वं स्यात् । स्याच्च तदंगीकारे आलोकादिसहकृतेन्द्रियसंयोगादि वैयर्थ्यमिति चेत् भवन्मतेप्यात्मसाक्षात्कारस्याजन्यत्वात्सदातनत्वप्रसंगात् श्रवणमनननिदिध्यासनानां वैयर्थ्यात् शास्त्रमनारंभणीयं स्यादिति महान् दोषः । तत्परिहाराय ब्रह्मणो नित्यापरोक्षरूपत्वेऽपि तदावरणज्ञाननाशायान्तःकरणवृत्तेरखण्डाकारायास्तस्याः श्रवणादि साध्यत्वेन तेषां साफल्यस्य वक्तव्यत्वे मन्मतेऽपि घटादिप्रत्यक्षस्याजन्यत्वेऽपि तदावरणभङ्गाय इन्द्रियवृत्तेः तदर्थमलोकादीनां च साफल्यस्य वक्तव्यत्वात् न घटादि प्रत्यक्षस्य सदातनत्वम् ।

न चैकदा चक्षुरिन्द्रियार्थसंयोगेन तत्तद्विषयाकारचित्तवृत्त्यावरणभंगे अन्धस्यापि पूर्वदृष्टसकलवस्तुप्रत्यक्षापत्तिः नित्यसिद्धत्वात् तादृशवृत्तीनामिति वाच्यम् । आविद्यकानां तूलावरणानां बहूनां विद्यमानत्वेन कस्यचिदावरणस्य तदानीं नाशेऽपि कालान्तरे तथैवावरणान्तरसत्त्वात् । तथा च चित्तवृत्तीनां नित्यत्वात् वृत्तत्वव्याप्य परब्रह्मापरपर्याय महालिंगाभेदाकारशुद्धचित्तवृत्तेरपि नित्यत्वं वक्तव्यमन्यथ अनेक साधनानुष्ठान समुपार्जिताया अपि शुद्धचित्तशक्तेर्भोगसाधनीभूताया विरहे आत्मनो निरतिशयसुखस्य सत्त्वेऽपि किं प्रयोजनं तदनुभवरूप भोगाभावात्; किं वा प्रयोजनं रमणीविरहितत्वे अलंकृतकेलीगृहेण । उन्मत्तजनोप-

देशेन अंगस्य रूपलावण्येन च। वृत्तिमित्यत्ववादे "चिन्मात्रोऽहं सदाशिवः" इति। परमेष्ठिकृतोपदेशोऽपि संगच्छते। वृत्यनित्यत्व-पक्षे "चिन्मात्रोऽहं सदाशिवः" इत्याकार चित्तवृत्तेर्नष्टत्वात्। आश्वलायनं प्रति तदृशोपदेशो न संगच्छते। चित्तस्य नाशांगीकारात् "चिन्मात्रोऽहं सदाशिवः" इत वाक्ये चिन्मात्रः सदाशिवः इत्याकारया आत्मविषयिण्या बुद्धेरनित्यपुरस्सरमुपदेशायोगात्। मन्मतेतु आत्मसुखाद्याकारबुद्धेर्नित्यत्वांगीकारात् "चिन्मात्रोऽहं" इत्यभिनीय कृतोपदेशस्योपपन्नत्वात् तथैवाश्वलायनोऽपि "चिन्मात्रोऽहं सदाशिवः" इत्याकारां बुद्धिरूपिणीं आत्मशक्तिं गृण्हानो मुक्तो भवतीति वक्तव्यम्। तथैवोच्यते श्वेताश्वतरोपनिषद्यपि "ते ध्यानयोगानुगता अपश्यन् देवात्म-शक्तिं स्वगुणैर्निगूढाम्" इति। अस्यार्थः भित्तिमेघादिव्यवहित दीप दीपिकाप्रभाकरप्रभाणामदर्शनात् स्वगुणैः स्वस्मिन् घृतकाठिन्यन्यायेन चेतनाल्लोमनखादिवद्विजृम्भितैः गुणैराणवादिमलैः निगूढामावृतां व्यवहितामित्यर्थः। देवात्मशक्तिं क्रीडाशीलस्य शिवस्य आत्मनः स्वस्य शक्तिं "चिन्मात्रोऽहं सदाशिवः" इत्याकारां सक्षात्कर्तुम शक्तास्ते ऋषयः गुरुमुखात् ध्यानयोगोपायमनुगताः सन्तः मेघाद्यपाये सूर्यतदालोकदर्शनवत् व्यवधानात्मकमलापगमे नित्यासिद्धामेव स्वात्मा-भिन्नशक्तिं दृष्टवन्तः। तादृशात्मशक्तिविकासनानन्तरं आत्मस्वरूपा-वरणस्वभावमपि मलं तादृशाविर्भूत स्वशक्तिरेव विच्छिनत्ति। तदनन्तरं स्वसाक्षिण स्वाभिन्न शिवमात्मानं विनिश्चिनुते। स्वशक्तिविकासे उपायाश्चोक्ताः शक्तिसूत्रे "विकल्पक्षयशक्तिसंकोच विकासवाहच्छेदा-

यन्तकोटिनिभालनादयः इहोपायाः" इति। "मध्यविकासाच्चिदानन्दलाभः" इति च।

तस्मादात्मविषयिण्याः सर्वात्मकः शिवोऽहमित्याकारायाः बुद्धिशक्तेः नैरन्तर्याय साधनाभ्यासः कर्तव्यः। विघ्नबाहुल्येन शिवजीवसामरस्यध्यानादि साधनाभ्यासविच्छेदे शिवात्मैक्याज्ञानात्मकावरणकृत सांसारिक दुःखस्फूर्तिरनुभवसिद्धैवेतिवत् शरीरपातानन्तरमप्यात्मविषयिणी बुद्धिर्यादि नष्टाभवेत्तदा अकृतश्रवणादिपुरुषवद्धर्मानुवृत्तिस्तत्कृत जन्मान्तरसुखदुःखानुवृत्तिश्च स्यादेव। तस्मात्सर्वातिशायिन्या आत्मविषयिण्याबुद्धेरात्मनश्च नित्यसंबन्धात् "आत्मरतिरात्मक्रीडः" इति श्रुत्युक्त आत्मविषयकरतिक्रीडादिगुणाः पुष्पगन्धवज्जलशैत्यवदग्न्युष्णस्पर्शवद्दीपदीप्तिवद्धि कुण्डलवत्सङ्गच्छतेतराम्। तस्मात् नित्यसिद्धा आत्मविषयिणी बुद्धिशक्तिरात्मस्वरूपावरणं विनाश्य स्वाभिन्नं स्वसाक्षिणमात्मानं निश्चिनोति। न च बुद्धिशक्तेर्दृश्यत्वात् आत्मनोद्रष्टृत्वात् आत्मा दृश्यात् भिन्नः द्रष्टृत्वात् घटद्रष्टृवत् इत्यनुमानेन तयोर्भेदसिद्धौ कथमभेद इति वाच्यम्। अपरोक्षं द्विविधं स्वस्वरूपापरोक्षं स्वाभिन्नापरोक्षमिति। स्वभिन्नघटाद्यपरोक्षे द्रष्टा दृश्यात् भिन्नः स्यात्। स्वस्वरूपापरोक्षे तु न तथा तादृशानुमानस्य स्वभिन्नापरोक्षविषयत्वं वाच्यम्। स्वस्वरूपापरोक्षे तयोर्भेदानुमाने दृष्टान्ताभावात् व्याप्तिज्ञानानुदयात्।

स्वशक्तिस्वस्थतादशायां अहमस्मि प्रकाशे नन्दामीति सच्चिदानन्दाकारानुभवाकाराया नित्यसिद्धाया वृत्तेरवश्यमात्मनो

वक्तव्यत्वादात्मनोः शक्तिवैशिष्ट्यं सिद्धमन्यथानात्मत्वस्य दुर्वारत्वात् । घटस्य स्वस्वरूपज्ञानराहित्यादनात्मत्वात् । तद्वदात्मनोऽपि तथात्वेऽनात्मत्वं वज्रलेपायत एव । अत एवोक्तं श्री स्वप्रभानन्दशिव चार्येणापि " ब्रह्माद्वैतमनात्मकरूपमितरैराभण्यते " इति । अहेः कुण्डलमिति अहिरेव कुण्डलमिति च प्रतीत्या कुण्डलवैशिष्ट्यं कुण्डलाभिन्नत्वमहेरिव शक्तिवैशिष्ट्य शक्त्यभिन्नत्वमात्मनः सिध्यत्येव ।

ननु सत्ताद्यनुभूत्यादेरात्मधर्मत्वे " कामः संकल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिः ह्रीर्धीर्भीरित्येतत्सर्वं मन एव " इति श्रुतिविरोधः अत्र कामादि सकलवृत्तीनां मनोधर्मत्वावगमात् इति चेन्न । अन्तःकरणधर्मास्सर्वेऽपि आत्मधर्मा भवन्त्येव चित्तात्मनोरभिन्नत्वात् । " चैतन्यमात्मा " " चित्तमात्मा " इति शिवसूत्रास्थतेः । अहमिच्छामीत्यादि प्रतीत्या इच्छाज्ञानादीनामात्मधर्मतावगमात् ।

ननु चित्तस्य सादित्वात् " स मनोऽसृजत " इति श्रुतेः । तदभिन्नत्वे आत्मनोऽपि सादित्वापत्तेरिति चेन्न । यथा चितेः बुद्धिशक्तेः चित्तदशा तस्या तामस्या अविद्याशक्तेः सादित्वपरत्वात् । " प्रज्ञानं ब्रह्म " इति श्रुतेः । प्रज्ञानपदवाच्य चिच्छक्तेः ब्रह्माभिन्नत्वावगमात् ।

" स्वशक्तिक्षोभमात्रेण स्थूलं तत् द्विविधं भवेत् " " क्षुभिता च विश्वविस्तारा " इत्युक्तप्रकारेण सृष्ट्युन्मुखावस्थायां कूर्माङ्गभङ्गिन्यायेन

तस्याविर्भावमात्रं वक्तव्यम् । श्रुतिरपि तथैवाभिवदति "प्रज्ञा च तस्मात्प्रसृता पुराणी" इति "नित्यं निर्दोषगंधं निरतिशयसुखं ब्रह्मचैतन्यमेकम् । धर्मो धर्मीति भेदद्वयमयति पृथक्भूयमायावशेन" इत्यभियुक्तोक्तेः । एकस्यैव ब्रह्मणः धर्मधर्मिभ वात् । बुद्धिधर्मास्सर्वे बुध्यभिन्न त्मधर्मा आत्मधर्मा आत्माभिन्न बु द्धधर्मा भवितुमर्हन्त्येव ।

अत्र अध्यासवादिनस्तु अयो दहतीतिवत् इतरेतराध्यासं वदन्ति । तथा हि—वर्तुलत्वाद्ययोधर्मात्मत्वाभावाधिकरणे वह्नौ अयसः दाहकत्वात्य-ताभाव धिकरणेऽयसि वह्नेस्तादात्म्य ध्यासात् इमे वर्तुलत्वादयो अयो धर्मा इमे दाहकत्व दया वह्निधर्मा इति भेदस्याग्रहात् अयो वह्नि तद्धर्माणां चेतरेत ाध्यासः । एवं नीरत्वेन क्षीरत्वेन च नुभविषययोर्नीरक्षीरयोस्संयोगानन्तरं तयोः पूर्वानुभूतभेदस्याग्रहात् अध्यास इव च सत्यज्ञान नन्दादयः न बुद्धिधर्माः कामादयो नात्मधर्मा इति भेदस्याग्रहात् भवति तत्तद्धर्माणामितरेतराध्यासस्तस्मादहमिच्छामि जानामि करोमीति प्रतीतेरध्यासकृतत्वात् न याथार्थ्येनात्मनीच्छादिबुद्धिधर्मान् बुद्धौ च सत्यज्ञानानन्द न् वक्तुं शक्यते । इति चेन्न दृष्टान्तवैषम्यात् । तत्र भेदं चाभेदं चापि निश्चितुमशक्यत्वात् वह्निसंयोगात्पूर्व अयो वह्न्योरेकस्मिन्ननुभवसिद्धानां वर्तुलत्वनीलरूपत्वादीनां रोहितरूपोष्णस्पर्शादीनां च भेदं प्रत्यक्षसिद्धं वह्निसंयोगानन्तरं न जानाति तदभेदं चापि न जानाति पूर्वानुभूतस्य भेदस्यानुभविष्यमाणत्वात् । एवं संयुक्तनीरक्षीरयोरपि पूर्वगृहीतभेदस्याप्यज्ञायमानत्वात् अभेदस्याप्यज्ञायमानत्वाच्च । इदं

शुद्धक्षीरविलक्षणजलसंयुक्तं पूर्वानुभूत शुद्धक्षीरविलक्षणत्वात्। इत्यनुमानेन भेदस्याप्यनुमेयत्वात् इतरेतराध्यासो युक्तः।

अत्र तु कामाद्याश्रयत्वेन बुद्धेश्चेतनमन्तरा केनाप्यनुभूयमानत्वाभावात् बुद्धिमन्तरा सत्यज्ञानानन्दाश्रयत्वेन कामाद्याश्रयत्वेन च चिदात्मनः केनाप्यनुभूयमानत्वाभावाच्च। नेतरेतराध्यासकृतः चेतनोऽहं करोमीच्छामि जानामीति व्यवहारस्तस्माद्बुद्धि तत्साक्षिणोर्नीरक्षीरवत् अयः पिंड वह्निवत् नाध्यासः प्रत्यक्षादिप्रमाणविरुद्धत्वात् अहं सुखीत्याद्यनुभवविरोधाच्च विचार्योऽयमध्यासोऽध्यात्मवादिभिरेव। "इत्येतत्सर्वं मन एव" इति श्रुतिवेदकारेण यदीच्छादीनाम्मनोमात्रधर्मता-बन्धनिमित्तस्य जीवस्यात्मनश्रवण जिज्ञासामननादिसाधनाभावात् सर्वदा बद्धत्वप्रसंगस्स्यात्। न हि कश्चिदन्यः संसारबन्धनबन्धितं विना तद्बन्धननिवृत्युपायं मृगयति। आत्मनः बन्धे आत्मनैवात्मा जिज्ञास्य इति युक्तम्। तथा चोक्तश्रुतेः आत्माभिन्नमनोमात्रधर्माः कामादय इति तात्पर्यम्। अत एव "तस्मिन् कामाः समाहिताः" इत्यत्र सम्यक्पदस्वारस्येन कामादीनामात्मधर्मता श्रूयते। न हि चन्द्रचन्द्रिकयोराह्लादकत्वादयो धर्मास्तदन्यतरस्मिन्नेवेति वक्तुं शक्यते। किन्तु चन्द्रधर्माः चन्द्रिकायां चन्द्रिकाधर्माश्चन्द्रे संभवन्त्येव। तस्मान्मनश्शब्दितबुद्धिधर्मा आत्मनि आत्मधर्माश्च मनसीति युज्यते। शिवयोगशब्दित लिंगांगसामरस्यनिरस्तसमस्ताशुध्यात्मकमलस्य चित्तस्य चिच्छक्तिरूपत्वात् तद्गतजगज्जन्मादिजनकत्वादिधर्माः तद्विशिष्टे चिद्रूपे शिवे संभवन्त्यव। तदुक्तं श्री रेणुकाशिवाचार्येण।

" यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तु प्रकाशिनी ।
तथा शक्तिर्विमर्शात्मा प्रकाशे ब्रह्मणि स्थिता ॥ " इति ।

इयमेव शक्तिः " आकाशो वै नामरूपयोर्निर्वहिता ", " यदेष आकाशो आनन्दो न स्यात् ", " सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत " इत्यादि श्रुतावाकाशप्राणादिशब्देनाभिधीयते । अनयैव च चिदम्बरशक्त्या सकलचेतनकृत-बहुविध कर्मफलभोगानुकूलतत्तच्छरीरनिर्माणसामग्रीविशेषं जानाति । स्वरूपनिरतिशयानन्दमनुभवति च परशिवब्रह्म। तस्मात्सर्वज्ञं नित्यतृप्तं च स्वरूपानन्दानुभवसाधनीभूतायाः तस्याः पराहन्तामय चिच्छक्तेरस्य ब्रह्मणोऽनादिसिद्धत्वादनादिबोधं च । स्वस्वाभाविक शक्तिव्यतिरिक्त-परमाण्वादिनैरपेक्ष्येण सर्वं करोमीतीत्यतः स्वतन्त्र शक्तेः सचजसिद्धत्वात् । अपरिच्छिन्नत्वाच्च अलुप्तशक्तिमत् अनन्तशक्तिमच्च । " यः सर्वज्ञः स सर्ववित् " " आनन्दो ब्रह्म " " शान्ति समृद्धममृतम् " " विद्याविद्ये ईशते यस्तु सोऽन्यः " " पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च " " यः सर्वान् लोकानीशते ईशनीभिर्जननीभिः परमशक्तिभिः " इत्यादि श्रुतेः ।

" सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य ॥ "

इति पारमेश्वरागमवाक्यात् सर्वज्ञत्वादि शक्तिविशिष्टं ब्रह्म न निर्विशेषम् । इयमेव पारमेश्वरीज्ञानक्रियासामरस्यात्मिका शक्तिः स्वोन्मिषितमायाशक्ति-

प्रविष्टा सती गुणत्रयात्मिका भवति । गुणत्रयतारतम्यात् भोज्यभोक्तृप्रेरकलक्षणं वस्तुत्रयमुत्पद्यते । तथा चैकमेव ब्रह्म सर्वज्ञता शक्त्या निमित्तमनन्तशक्त्या च जगदुपादानं च भवति । यदि कुलालादेरिव ब्रह्मणः केवलं निमित्तहेतुत्वमेवोच्येत तर्ह्यनीश्वरत्वमापद्येत स्वातिरिक्तकारणान्तरसापेक्षत्वात् । तदुक्तमागमरहस्ये "ये पीश्वरं व्यपदिशन्ति निमित्तहेतु तैरर्पितस्थलजलांजलिरीशितायै । अन्यांगनोपगमनेनवशीकृतस्य कामीश्वरस्थितिममी बत संगिरन्ते ॥" इति । तस्मादग्निरिव दहने चिन्तामणि कामधेनु कल्पवृक्षवृदीप्सितार्थनिर्माणे योगीव च ऊर्णनाभवच्च तन्तुनिर्माणे परशिवब्रह्म विश्वनिर्माणे कारणान्तरनैरपेक्ष्येण स्वशक्त्यैव विश्व सृजति पालयति संहरति नियमयति अनुगृह्णातीति राद्धान्तः । तदुक्तमीश्वरप्रत्यभिज्ञायां—

"चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥"

इति उक्त च षाड्गुण्यविवेके—

"न हि बोधो विचित्रार्थ निर्माणेऽन्यमपेक्षते ।
संकल्पादेव यो रूपसहस्राणि सृजत्यजः ॥"

"स्वेच्छया स्व भित्तौ विश्वमुन्मीलयति" इति शक्तिसूत्रस्थितेश्च । सर्वविश्वमण्डरसन्यायेन सृष्टेः प्रागासीत् । तदुक्तं प्रत्यभिज्ञायाम्— यत्किंचिदाभाति बहिस्तदीश नूनं तवान्त्येव समस्तमन्तः । निमीलिताक्षा हृदि लक्षयेयु स्तथैव सर्वं कथमन्यथा तत् ॥" इति । यदि जगतो

त्रैकालिकनिषेधप्रतियोगित्वं तदा "यथोर्णनाभिः सृजते ग्रसते" 'नासतो विद्यते भावो नाभावो विद्यते सतः ।' इति श्रुति कृष्णगीतोक्ति-विरोधः स्यादेव । तस्माज्जगत्त्रैकालिकनिषेधाप्रतियोगित्वरूपं सत्यत्वं वाच्यम् । ऊर्णनाभिदृष्टान्तानुरोधात् परशिवब्रह्म स्वचिच्छक्तिगत-सूक्ष्मचिदचित्प्रपंचमेव नामरूपविभागार्हत्वेनाविर्भावयतीति बालिशोऽपि जानात्येव । वर्तमानकालेऽपि तस्य परिदृश्यमानत्वात्को वा जडः नास्तीति जानीयात् । भविष्यत्काले तस्य स्वकारणे लयस्वीकारात् कारणरूपेण स्थितत्वात् न तस्यात्यन्ताभावस्तस्मान्नानित्यत्वं जगतः । न च विश्वस्य सत्यत्वे तदन्तर्गतबन्धस्यापि सत्यत्वात् तन्निवृत्तिर्नस्यात् इति वाच्यम् । ईश्वरेच्छायास्तत्र नियामकत्वात् इच्छाभूमिप्रविष्ट-घटादिवन्न मुक्तस्य पुनर्बन्धप्रसंगः ।

"यथा सुभर्जित बीजं नेह भूयः प्ररोहति ।
विकल्पक्षीणचित्तस्य तथा भूयो न संसृतिः ॥"

इत्युक्तत्व च । प्रपञ्चसत्यत्वे बाधकाभावात् । यथोर्णनाभिः स्व-शरीरोन्मिषित तन्तुजालं प्रति स्वशरीरतः उपादानकारणं स्वतः निमित्त-कारणं तथा ब्रह्म स्व शक्तितः उपादानकारणं स्वतः निमित्तकारणं च भवति तदुक्तमभियुक्तैः—

"शक्त्यण्डमृत्पिण्डमुपाददानो मायाण्डचक्रभ्रमणक्रमेण ।
मूलाण्धदण्डेन मुहुर्विधत्ते ब्रह्माण्डभाण्ड भगवान् कुलालः"

इति ।

तथा च "जन्माद्यस्य यतः" इत्यनेन स्वतन्त्रापरिच्छिन्न-स्वप्रकाशरूपपराहन्तामय चिच्छक्तिविशिष्ट लिंगरूपं ब्रह्म जगज्जन्मादि-कारणमित्युक्तं भगवता बादरायणेन। तथैव तदुपासितव्यमन्यथा ब्रह्म व्यतिरिक्तासत्यमायाशक्तिप्रतिबिम्बरूपस्य ईश्वरस्य मिथ्यात्वा-दुपासकस्य तदापत्तेर्दुर्वारत्वात्। निर्विशेषस्य तूपासताविषयत्वाभावात् उपास्यवस्तु स्वरूपज्ञानमन्तरोपासनस्यैवासिद्धेस्तस्मात् तत् ज्ञानार्थं सविशेषं ब्रह्म। उद्दिष्टं प्रथमसूत्रे जिज्ञास्यत्वेनान्यथा तस्य कर्तृत्वादि शून्यत्वात् जगज्जन्मादिकारणत्वरूपं लक्षणमसंगतमेव स्यात्।

नचोद्दिष्टं निर्विशेषं जगज्जन्मादि कारणत्वलक्षणलक्षितं सविशेष-मिति वाच्यं अनुद्दिष्टपदार्थस्य किं तदित्याकांक्षायानुदयात्। तथापि तल्लक्षणे उक्ते वक्तुरुन्मत्तत्वापत्तेरनुद्दिष्टपदार्थलक्षणकथनस्य शास्त्राकृद्भि-रनंगीकृतत्वात् निर्विशेषब्रह्मपक्षे "जन्माद्यस्य यतः" "शास्त्रयोनित्वात्" इत्यादि सुत्रकर्तुस्तात्पर्याभावात् सविशेषं ब्रह्मैवोद्दिष्टं तस्यैव "जन्माद्यस्य यतः" इति जगज्जन्मादिकारणत्वलक्षणं कथितमिति वाढं जानीमः॥

इति द्वितीयसूत्रवृत्तिः समाप्ता॥ २॥

प्रथमाधिकरणे जिज्ञास्यत्वेनोद्दिष्टस्य शक्तिविशिष्टब्रह्मणो जगज्जन्मादिकारणत्वं लक्षणं कथितं द्वितीयेन च तत्र किं प्रमाणमित्यत्राह—

"शास्त्रयोनित्वात्" ॥ ३ ॥

शास्त्रं "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभि संविशन्ति तद्ब्रह्म तद्विजिज्ञासस्व" "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।" इत्यादिकं योनिः प्रमाणं यस्य तस्य भावस्तत्वं तस्मात् शास्त्रप्रमाणकत्वादित्यर्थः ॥

ननु जगत्कारणस्य ब्रह्मणो न शास्त्रैकसमधिगम्यत्वमनुमानादि प्रमाणान्तरेणाप्यधिगम्यत्वात्। तथा चोक्तं "कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः। वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्यय इति" इतिचेन्न। जगतो निमित्तोपादानशक्तिविशिष्टैककर्तुत्वस्य उक्तकार्यादिपक्षकानुमानैरसिद्धेः। घटस्य कुलालादिवन्निमित्तकारणत्वसिद्धावप्युपादानकारणत्वासिद्धे निमित्तत्वमुपादानत्वं चैकस्यैव "यथोऽर्णनाभिः सृजते ग्रसते" इत्यादि दृष्टान्तश्रुत्या ज्ञायते। "यतोवेमानि भूतानि जायन्ते" इत्यनेन निमित्तकारणत्वं "यत्प्रयन्त्यभिसंविशन्ती" त्यनेनोपादानकारणत्वं चोपदिश्यते। तथाचाभिन्ननिमित्तोपादानकारणत्वरूपैककर्तुकत्वासिद्धेः शास्त्रैकगम्यत्वं ब्रह्मणः सिद्धम्। अनुमानस्य प्रत्यक्षमूलकत्वात् परिच्छिन्नत्वात् अपरिच्छिन्नब्रह्मविषयकत्वाभावात् अपरिच्छिन्नब्रह्मप्रकाशनापाटवात् स्वप्रकाशब्रह्मात्माधीनसिद्धि

कत्वात् "तस्य भासा सर्वमिदं विभाति" इति श्रुतेः ब्रह्मात्मक चैतन्यस्य अनुमानविषयत्वे अनुमानान्तर्गतत्वादपरिच्छिन्नत्वभंगस्स्यात्।

न चाकाशस्य शब्दपक्षकानुमानान्तर्गतत्वेऽपि तस्यापरिच्छिन्नत्व मिवात्मनोर्कि न स्यात् इति वाच्यम्। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुः" "आत्मन आकाशस्संभूतः" इत्यनेन वाक्येनाकाशस्यापि जन्यत्वापरिच्छिन्नत्वात्। तद्दृष्टान्त-वैषम्यात् "आकाशवत्सर्वगतश्चनित्यः" इत्यादिश्रुत्या आकाशस्य सातिशयव्यापकत्वं बोध्यते। न तु निरतिशयसर्वगतत्वमन्यथा आकशस्य जन्यत्वबोधकश्रुति विरोधः स्यात्। 'यत् स्वातिरिक्तप्रमाण-विषयं तत्परिच्छिन्नं यत्परिच्छिन्नं तदनित्यं घटवत्' इति आत्मनोऽपि नित्यत्वं व्याहन्येत। "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह", इत्यादि श्रुतिभिरात्मनस्वातिरिक्तप्रमाणमार्गाद्दूरवर्तित्वमुच्यते। तथा-प्यनुमानसाध्यतां वदतां स्वपादेन स्वशिरच्छायोल्लंघनोद्युक्तमूर्खशिशुसा-दृश्यमेव स्यात्। उक्तं च तन्त्रालोके अतिरिक्तप्रमाणविषयत्वम्। "प्रकाशो नाम यश्चायं सर्वत्रैव प्रकाशते। अनपह्नवनीयत्वात् किं तस्मिन् मानकल्पनैः" इति "सत्यं ज्ञानमनन्तं ब्रह्म" इति ब्रह्मणः परिच्छेदाभावस्य श्रुतत्वात्। अनुमानकृत परिच्छेदस्य स्वीकारे श्रुतिविरोधापत्तेस्तस्माच्छ्रुत्यानुकूल्येनैवानुमानानां प्रामाण्यं वक्तव्यम्।

ननु शास्त्रस्यापि ब्रह्मणः जगज्जन्मादिकारणत्वे कथं प्रामाण्यं परिच्छिन्नत्वात् तदतिरिक्तत्वात्। स्वव्यतिरिक्तप्रमाणविषयत्वे न

ब्रह्मणः परिच्छिन्नत्वादनित्यत्वापत्तेः । "विज्ञातारमरे केन विजानीयात्" इत्यादिना श्रुतिवाक्येन यावत्प्रमाणप्रवृत्यसंभवस्य श्रुतत्वाच्च न शास्त्र-प्रमाणकत्वं जगज्जन्मादिकारणे ब्रह्मणीति चेन्न । निगमागमादि सकलविद्यानां परशिवब्रह्माविर्भूतत्वात् तदुपादानकत्वात्तदात्मकत्वात् "अस्य महतो भूतस्य निश्वसितमेतत् ऋग्वेदो यजुर्वेदः सामवेदः" इति श्रुतेः । "तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे"। "ईशानः सर्वविद्यानामीश्वरस्सर्वभूतानां" 'योऽयं नकारः सोऽयमकारः स सद्योजातो भूऋग्वेदः सम्पुट उच्यते' इत्यादेः "योयं यकारस्तदिदं समस्तमोमिति निर्विशेषः प्रणवः सर्वोत्तर ईशान आकाश आगमो लिंगमुच्यते" इत्यन्तः श्रुतेश्च "अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम्। आदिकर्ता कविस्साक्षाच्छूलपाणिरिति श्रुतिः" इति पुराणोक्तेः । "तावल्लोकास्त्रायो वेदा स्त्रयो देवास्त्रयोऽग्नयः । शिवः स्रष्टाः" इति धर्मशास्त्रोक्तेः । वेदादेः शिवजन्यत्वात् न चतुर्मुखजन्यत्वं तदुत्पत्तेः प्रागपि वेदसत्वात् । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः । "ब्रह्मा देवानां प्रथमः संबभूव" इति च श्रुतेः । "तस्मै प्रथमपुत्राय शङ्करः शक्तिमान्विभुः । सर्वज्ञः सकला विद्याः सानुग्रहमुपादिशत्" इति सिद्धान्तशिखामण्युक्तेः ।

श्रीशङ्करोपदिष्ट सकलविद्यस्य ब्रह्मणः पुनराविर्भूतत्वात् न चतुर्मुखजन्यत्वप्रतिपादिन्याः "षड्ढोतावै भूत्वा प्रजापतिरिदं सर्वमसृजत, ऋचो यजूषि सामानि" इत्यादि श्रुतेर्विरोधः । ग्रीष्मे भुविलीनदूर्वा देवर्षा-काले पुनराविर्भाववत् सृष्टेः प्राक् पारमेश्वरीविमर्शांशक्तिविलीनवेद-

शब्दराशेः सृष्टिकाले पुनराविर्भावस्याभ्युपगमान्न वेदनित्यत्ववादिन्योः "वाचा विरूपा नित्या" "अनादि निधना नित्या वागुत्सृष्टा स्वयंभुवा" इति श्रुतिस्मृत्योर्विरोधः। बीजांकुरवदवस्थितस्यैव प्रकटीकरणत्वं जन्यत्वमित्यस्मदभ्युपगमात् न जन्यत्वाजन्यत्वपरश्रुत्योः विरोध इति बोध्यम्। तथा च स्मृतिरपि वदति पंचाननाननोद्भूतत्वं वेदादीनाम्। "अष्टादशानामेतासां विद्यानां ब्रह्मवर्त्मनाम्। आदिकर्ता शिवः साक्षात् शूलपाणिरिति श्रुतिः। सद्योजातेन ऋग्वेदं वामदेवेन याजुषं अघोरेण तथा साम पुरुषेणत्वथर्वणम्। ईशानेन मुखेनैव कामिकाद्यागमांस्तथा। जनयामास विश्वेशः सर्वसिद्धिप्रदायकः" विमर्शरूपिणीशक्तिः शिवस्य परमात्मनः। निगमागमरूपा स्यात् सर्वतत्त्वप्रकाशिनी "तस्माद्वेदागमार्थेषु यः कुर्यात् भेदभावनाम्। स सहस्रकुलं घोरे नरके पतति ध्रुवम्" इति। तस्मात् परमेश्वरस्य निगमागमादि सर्वविद्याकर्तुत्वप्रतिपादनात् सृष्टेः पूर्वं स्वशक्तिविलीन-निगमागमादीनां पुरुषनिश्वसितवदप्रयत्नेन पूर्वपूर्ववर्णानुपूर्व्यनुरूपरचनया सर्वज्ञस्य शिवस्य वेदादिकर्तुत्वसंभवात् वेदादीनां पौरुषेयत्वमपौरुषेयत्वं च।

ननु निगमागमानां नित्यत्वे "न सन्नचासच्छिव एव केवलः" "एक एव रुद्रो न द्वितीयाय तस्थे" "नेह नानास्ति किंचन" "न द्वितीयमस्ति" "नान्यत् किंचनमिषत्" इत्यादि श्रुतिषु सृष्टेः प्राक् द्वितीयवस्तु निषेधःकथमुपपद्यते इति चेन्न। तत्र शिवगत सूक्ष्मपराविमर्शशक्त्यपरपर्याय प्रज्ञाशक्तेरनिषिद्धत्वात्। कथमन्यथा

"प्रज्ञा च तस्मात् प्रसृता पुराणी" इत्युत्तरोक्तं शिवाविर्भूतत्वं प्रज्ञाशक्तेर्युज्यते । तस्मान्निगमागमानां वैखरीवाग्रूपाणां सूक्ष्मवाग्रूपेण परशिवब्रह्मणि सृष्टेः प्रागपि सत्वात् नित्यत्वं सिद्धम् । "चत्वारि वाक्परिमिता पदानि, गुहा त्रीणि निहिता नेङ्गयन्ति । तुरीयं वाचो मनुष्या वदन्ति । इति श्रुतेः अङ्कुरायमाणांकुरित पल्लवित फलितरूप सूक्ष्मा - पश्यन्ती - मध्यमा - वैखर्यपरपर्यायारंभविवक्षाध्यवसायोक्तिरूपासु चतुर्विधासु वाक्षु चतुर्मुखं प्रति वेदशब्दजालमुपदेष्टुः परमेश्वरस्योक्तेः कण्ठदेशे फलितरूपायाः उन्मेषक्रमवैलोम्यतः हृदये पल्लविताध्यवसायोक्त रूपत्वात् । तस्याः नाभावंकुरितविवक्षा वाक्स्वरूपत्वात् । तस्या आधारेङ्कुरायमाणारंभवागात्मकत्वात् । तस्या विमर्शशक्त्यात्मकत्वात् । तस्या शिवात्मकत्वात् न शिवव्यतिरिक्तत्वं वेदागमशास्त्रस्य । कथमेतद्वैखरीवाग्रूपस्य निगमागमशास्त्रस्य बाह्यश्रोत्रेन्द्रियग्राह्यस्य विमर्शशक्तिरूपत्वमिति शब्दप्रपञ्चस्य आकाशधर्मत्वेनाकाशात्मकत्वेन विमर्शशक्तिरूपचिदाकाशात्मकत्वाभावात् इति चेदुच्यते । आकाशस्यापि शब्दगुणविशिष्टस्य सृज्यकोटि प्रविष्टत्वात् "आत्मनः आकाशः संभूतः" । इति "एतस्मात् जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी" इति च श्रुतेः । शब्दगुणकस्याकाशस्य चिच्छक्तिविशिष्टपरमात्मोपादानकारणकत्वात् । शक्ति-शक्तिविशिष्टयोरभेदात् सिध्यत्येव विमर्शशक्त्यात्मकत्वम् । परमात्मनः शिवस्यैव संविच्चिच्छक्तिः प्राणद्वारेण वाग्रूपतामादधाना निगमागमरूपा भवति । तदुक्तं "स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक्प्रयोक्तॄणां

प्राणवृत्तिनिबन्धना । केवलं बुध्युपादानात् क्रमरूपानुपातिनी । प्राण-वृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥" इति । तस्मात् शास्त्रैकसमधिगम्यत्वं महेश्वरस्येति सिद्धम् । स्वव्यतिरिक्त प्रमाणगम्यत्वात् न जडत्वापत्तिः शिवस्य । अत एव श्रुतिरपि "नावेदविन्मनुते तं बृहन्त" इति वदति स्वाभिन्नवेदव्यतिरिक्त-प्रमाणागम्यत्वम् ।

परस्तु वेदादिशब्दप्रपञ्चस्यार्थप्रपञ्चस्य च चैतन्यात्मतातिरिक्तत्वं वदति । तन्मते परब्रह्मणः शास्त्रयोनित्वाधिकरणानुरोधेन शास्त्रवेद्यत्वे घटादिवज्जडत्वापत्तिरनिवार्यैव स्यात् । स्याच्च स्वप्रकाशता भङ्गोऽपि । वेदान्तशास्त्रेणापि प्रमाणेनागम्यत्वे एतदधिकरणस्य वैयर्थ्यं च भवेत् ।

ननूक्तं ब्रह्मात्मैक्यज्ञानानन्तरं तस्याप्रामाण्यमित्यतो नैतदधिकरण-विरोध इति चेन्न । कृतघ्नतापत्तेः । यदनुग्रहबलात् ज्ञानं ततः सांसारिकदुःखमुक्तिः परमानन्दप्राप्तिस्तस्याप्यप्रामाण्यमिति तत्तुच्छमिति तन्मिथ्येति हेयमिति निन्दतः कृतघ्नताकथनव्यतिरेकेण किं वक्तव्यम् । विधिनिषेधबोधकशास्त्रस्याप्यसत्यत्वे सत्कर्मानुष्ठानोच्छेदप्रसक्त्या बौद्ध-चार्वाकादिनास्तिकमतप्रवेशापत्तेश्च ।

यत्तु देहात्मप्रत्ययस्य प्रामाण्यं मन्यते स सदैव तस्य प्रामाण्यमेव मन्यते । नहि कंचित्कालं प्रमाणं कञ्चित्कालमप्रमाणमिति । न हि "भस्मीभूतस्य देहस्य पुनरागमनं कुतस्तस्मात्सर्वप्रयत्नेन ऋणं कृत्वा

घृतं पिबेत् " इत्याचक्षाणं लोकायतिकमन्तरेण कोऽपि देहात्मप्रत्ययस्य प्रामाण्यं मन्यते। न हि बालकादयोऽपि " मम शरीर "मिति वदन्तस्तस्य प्रामाण्यं मन्यन्ते। तस्मात्तत्सदैवाप्रमाणम्। यत्प्रमाणं तत्सदैव प्रमाणमेव भवितुमर्हति। घटादि दर्शने चक्षुरादिवत्। येषां रागद्वेषादयः तेषां तु वचनमप्रमाणमपि भवति। निर्धूत-समस्तरागद्वेषादि दोषकलकस्य सर्वजीवत्वादि षडंगस्य अवाप्तसकल-कामस्य परमाप्तस्य शुद्धचिद्रूपस्य परशिवस्य ब्रह्माद्यनुग्रहार्थं धृतलीला-विग्रहस्य वचनं तु सर्वदैव प्रमाणमेव। तस्मान्नामरूपात्मकप्रपञ्चस्यापि परशिवोपादानात्मकत्वात्तदात्मकत्वात्। " चैतन्यमात्मा " इति शिव-सूत्रस्थितेः। अत्र विशेषाचोदनात सर्वस्यापि चैतन्यात्मकत्वस्योक्तत्वात् ब्रह्मसूत्र शिवसूत्रयोरेकार्थकत्वस्याप्युपपन्नत्वात्। श्रुत्योऽपि " सर्वं खल्विदं ब्रह्म " " सर्वोह्येष रुद्रः " आत्मेदं जगत्सर्वम् " इत्याद्याः सर्वस्यापि विश्वस्य ब्रह्मोपादानकत्वात् ब्रह्मात्मकत्वं सत्यत्वं ब्रुवते। " आत्मन आकाशः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः। अद्भ्यः पृथिवी " इत्यादि श्रुतेः—अयमस्यार्थः —

आत्मनः अङ्कुरोन्मुखचणकादिवत् सृष्ट्युन्मुखस्य महालिंगस्य अभिन्नादात्मरूपचिच्छक्तिरूपादंगात् प्रणवमयात् आकाशः शरणपर-पर्याय सदाशिवाङ्गमुद्भूतः आविर्भूतम्। आकाश तदभिमानि शरणस्थलमुदभूदित्यर्थः। आकाशात् आकाशांगात्सदाशिवात् वायुः प्राणलिंगापरपर्यायेश्वरांगं संभूतः उत्पन्नम्। वायुरूपांगतदभिमानि प्राणलिंगिस्थलं आविर्भूतमित्यर्थः। वायोः वाय्वंगादीश्वरात् अग्निः

प्रसाद्यपरपर्याय रुद्रांगं संभूतं उन्मिषितम् । अग्नेः अमर्त्यांगात् रुद्रात् आपः विष्ण्वपरपर्याय महेशांगम् । अद्भ्यः महेशांगात् जलात् पृथिवी भूम्यंगं चतुर्मुखापरपर्याय भक्तस्य संभूतं च । तथा च आकाशादि पृथिव्यन्तार्थ तदभिमानि सदाशिवादिस्थलाविर्भावस्य परशिवमहालिंगाभिन्न आत्मरूपचिच्छक्तिकृतत्वात् आकाशादि सर्वजडाजड प्रपञ्चस्य शक्त्यात्मकत्वात् । शक्तिशक्तमतोरभेदात् । शिवस्य जगन्मयत्वं सिद्धम् । "शक्तिश्च शक्तिमांश्चेति पदार्थद्वयमुच्यते । शक्तयश्च जगत्सर्वं शक्तिमांश्च महेश्वरः" इत्यागमोक्तेः । तथैवागस्त्यं प्रति रेणुकभगवत्पादा अप्युपदिशन्ति "यस्मादेतत्समुत्पन्नं महादेवाच्चराचरम् । तस्मादेतन्नभिद्येत यथा कुंभादिकं मृदः । शिवतत्वात्समुत्पन्नं जगदेतन्नभिद्यते । फेनोर्मिबुद्बुदाकारं यथा सिन्धोर्नभिद्यते । यथा तन्तुभिरुत्पन्नः पटस्तन्तुमयस्मृतः । तथा शिवात्समुत्पन्नं शिव एव चराचरम् । आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः । कुटीभावाद्यथा भाति पटः स्वस्य प्रसारणात् ॥ पत्रशाखादिरूपेण यथा तिष्ठति पादपः । तथा भूम्यादिरूपेण शिव एको विराजते ॥"

तथा च सर्वस्यापि प्रपञ्चस्य परशिवब्रह्मोपादान कारणत्वात् तन्मयत्वात् निगमागमरूपस्यापि तन्मयत्वम् । तच्चिच्छक्तिकृतत्वात् चिच्छक्तेः स्वानतिरिक्तत्वात् निगमागमैकगम्यत्वं ब्रह्मणः । किमिदमुच्यते निगमागमगम्यत्वमिति शास्त्रपदस्य वेदान्तमात्रवृत्तित्वात् । ब्रह्मसूत्राणां सर्वेषां वेदान्तार्थ निश्चायकत्वात् आगमार्थनिर्णये सूत्रकर्तुः तात्पर्याभावात् न "शास्त्रयोनित्वात्" इत्यत्र शास्त्रपदाभिधेयत्वम् शिवागम-

स्यापीति चेदुच्यते । सिद्धान्तसंज्ञितागमनिगमयोरेकार्थकत्वात् एक कर्तृकत्वाच्च तयोः प्रामाण्यसाम्यात् ब्रह्मसूत्राणां न केवलं वेदान्ता-निर्णायकत्वात् । किन्तु तदभिन्नागमार्थस्यापि "आगमेषु पदार्था ये त एव व्याससूत्रके" इति कारिकाकारैरुक्तत्वात् । यदि शास्त्रपदाभि-धेयत्वं वेदान्तानामेवेति तात्पर्यं तर्हि "वेदान्तयोनित्वात्" इत्येव सूत्रं किमर्थं न रचितवान् सूत्रकारस्तस्माच्छास्त्रपदेनागमस्यापि बोधो-भवत्वित्याशयेन "शास्त्रयोनित्वात्" इति सूत्रयामास भगवानाचार्य इति तस्य तार्पर्यं वर्णयितुं शक्यत्वात् शास्त्रपदाभिधेय निगमागममात्र-गम्यत्वं ब्रह्मणः नत्वनुमानादि स्वव्यतिरिक्तप्रमाणगम्यत्वम् । तदुक्तं स्कान्दे—

"अतीन्द्रियार्थविज्ञाने मानं नः श्रुतिरेव हि । श्रुत्यैव गम्ये सूक्ष्मार्थे स तर्कः किं करिष्यति ॥ मानानुग्राहकस्तर्को न स्वतन्त्रः कदाचन । श्रुतिः सनातनी शंभोरभिव्यक्ता न संशयः ॥ शङ्करेण प्रणीतेति प्रवदन्त्यपरे जनाः । यथा सा शङ्कर पोक्ता तथापि श्रुति-रास्तिका ॥ प्रमाणं सुतरामाप्ततम एव महेश्वरः । सर्वदोषविहीनस्य महाकारुणिकस्य च ॥ सर्वज्ञस्यैव रुद्रस्य कथं दोषः प्रयुज्यते । अथ पक्षद्वयेनापि वेदो मानो न संशयः ॥" पौष्करपारमेश्वरेऽपि—

"यथा सा शङ्करेणोक्ता तथापि श्रुतिरास्तिका । प्रमाणं सुत-रामाप्ततम एव महेश्वरः ॥ सुप्रसन्नेन्द्रियग्रामः सर्वज्ञः सर्वगोचरः । पक्षपातविनिर्मुक्तः यथार्थग्राहकः सदा । अव्ययः परिपूर्णश्च स्वतन्त्रः पशुपाशहा । प्रमाणमेकं तद्वाक्यं तथ्यं श्रेयस्करं सदा ॥ इति ।

तस्मात् श्रुत्यागमशब्दित शास्त्रस्यैव परशिवब्रह्मप्रकाशनक्षमत्व-मङ्गीकर्तुं शास्त्रस्य शास्तुरनतिरिक्तत्वान्न स्वस्वप्रकाशताभङ्गोऽपि यदि शास्त्रस्य जगत्कारणत्वादि तन्माहात्म्यप्रकाशनक्षमत्वरूपं प्रामाण्यं नांगीक्रियते तदा ब्रह्मात्म्यैक्यज्ञानाभावादनिर्मोक्षप्रसंगः। मोक्षं प्रति ज्ञानसमुच्चितकर्मणः कारणत्वात् तस्य चित्तशुद्धेः हेयोपादेयविचार जन्यत्वात् तद्विचारस्य शास्त्रजन्यत्वात् शास्त्रस्य गुरूपसदनपूर्वकलिंग-धारणात्मक पाशुपत दीक्षासंस्कृतेनैवदीयमानत्वात् गुरुं विना दीक्षा-भावात्तदभावे अध्ययनाधिकाराभावात्। अत एव "गुरुरुपायः" इति सूत्रितत्वात् शास्त्रस्यैव प्रामाण्यं जगत्कारणत्वादि माहात्म्यप्रकाशने ब्राह्मणः। तदुक्तमागमरहस्यस्तोत्रे— "साक्षाद्भवान्यदि विधायन-मूर्तिमाद्यां तत्त्वं निजं तदवदिष्यदतोऽतिगुह्यम्। नाज्ञास्यत त्रिभुवनं ध्रुवमन्ध.........कल्पं समस्तमसमंजसतामयास्यत्" इति। उक्तं च षाड्गुण्यविवेके "साक्षात्त्वमेव वा शास्त्रं तदीयैव च सा मतिः। शब्द-द्वारेण संक्रम्य संस्करोत्यधिकारिणः॥

उक्तं चान्यत्र—यद्वत्सोपानेन प्रासादमारुहेत् प्लवेन वा नदीं तरेत् तद्वच्छास्त्रेणैव भगवान् शास्ता अवगंतव्यः इति। शास्त्रस्य वेदागमरूपस्य शास्तुः परशिवब्रह्मणोऽनतिरिक्तत्वात्। तदुपादानक-त्वात् वाच्यस्य वाचकस्यापि प्रपञ्चस्य शिवमयत्वात् शास्त्रेणैव परशिवो भगवानवगतव्य इत्यर्थः। निगमागमशास्त्रस्य विमर्शाशक्तिरूपेण सृष्टेः प्राक् परशिवब्रह्मणि स्थितत्वात् तदभिन्नत्वात्। तदुक्तं पूर्वाचार्यैः "अनादिः स शिवो मुख्यो यथान्येभ्यो विलक्षणः। तथा तद्वदनोद्गीर्णः

वाचोऽन्येभ्यो विलक्षणः । शिवागमाश्च वेदाश्च नित्या एव प्रमाणतः । नित्याः शिवागमा वैद्यैः शिवेनादावभेदतः । नित्यस्थितास्त्वभिव्यक्ता-स्तस्मिंस्तेऽनादयो यतः ॥ इति ।

इत्थं च जगज्जन्मादिकारणब्रह्मणः शास्त्रवेद्यत्वात् "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" "यद्वाचानभ्युदितं" "यन्मनसा न मनुते" इत्यादीनां श्रुतीनां ब्रह्मानन्दस्येयत्तापरिच्छेदाभावेनापरिमेयत्व प्रतिपादनपरत्वात् अन्यथा "आनन्दं ब्रह्मणो विद्वान्नबिभेति कुतश्चन" "मनस्यैवानुद्रष्टव्यम्" भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् । कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम्" इत्यादि शास्त्रविरोधात् । तादृशस्यापरिमेयस्यानन्दस्य मनसा यो विजानाति स न बिभेति कुतश्चनेति शस्त्रनिर्णीतार्थस्य ब्रह्मणो मनसा वेद्यत्वस्य प्रतिपादितत्वात् । तादृशानन्दानुभवितुरात्मनोऽपि मनसो पराहन्तामय चिच्छक्त्यात्मकत्वात् लिंगांगसामरस्यज्ञानदार्ढ्यापत्ते चित्तस्य संकोचे तस्यैव चिति रूपत्वात् तस्या अपरिमेयत्वादपरिमेयानन्दानुभविताभवत्येवात्मा शिवयोगाभ्यास-सञ्जनित दृढतरलिंगांगसामरस्य ज्ञानिनः सर्वकामनानदीनां परशिवसमुद्रे प्रविष्टत्वात् तस्य मुक्तत्वात् तस्य चित्तस्य पिंडितमयस्य पात्रीकृतत्वात् तदवलम्बनेन संतीर्णसंसारसागरत्वात् । तदुक्तं कृष्णगीतायां— "आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् । तद्वत्कामायं प्रविशन्ति सर्वे स शन्तिमाप्नोति न कामकामी" इति जलकरकवत् घृतकाठिन्यवत् ज्ञानक्रियाशक्तिगर्भेच्छाशक्तेरेव........यापरिणतासती सत्वरजस्तमोरूपचित्तरूपेण परिणतत्वात् । तस्य लिंगांगसामरस्य

बोधकरसमुदितस्वस्वाभावभक्तित्वात् न "यतो वाचो निवर्तन्ते" "यन्मनसा न मनुते" इत्यादिना शास्त्रजन्य शुद्धमनोवृत्यविषयत्वं ब्रह्मणः वाङ्मनसातिरिक्त मानगम्यत्वाभावात् ब्रह्मणि मानान्तराप्रवृत्तेः। "नावेदविन्मनुते तं बृहन्तम्" इति श्रुतेः "मनसैवानुद्रष्टव्यं" इति च श्रुतेः। निगमागमशास्त्रस्य स्वविमर्शशक्तिरूपेण स्वाभिन्नत्वात् शास्त्रप्रमाणकत्वात् सर्वार्थविभासकशास्त्रनिर्मातुः सर्वज्ञत्वमपि सिध्यत्येव।

ननु शास्त्रोऽक्त सकलपदार्थाभिज्ञत्वं सर्वज्ञत्वम्। तच्च शास्त्रप्रवर्तकेष्वपि दृष्टत्वात् कथं शिवस्यैवेति चेन्न। निगमागमशास्त्रप्रवर्तकानां मुक्तत्वात् शिवात्मकत्वात् शिवसृष्टरुद्रगणान्तर्गताचार्य गणस्य निगमागमशास्त्रप्रवर्तकत्वेऽप्यन्यूनं सर्वज्ञत्वं वक्तव्यम्। तस्य शिवव्यूहरूपत्वात् सद्योजातादि पञ्चमुखाविर्भूतत्वात् तदात्मकत्वात् "अर्धनारीश्वरत्वादि लीला विभवसंज्ञिकाः। सद्योजातादयः पञ्च व्यूहा प्रोक्ताः सनातनाः" इत्यागमोक्तेः। सौभर्यादियोगिनां व्यूहस्य तदनतिरिक्तत्वात्। शिवव्यूहरूपस्य रेणुकादि पञ्चाचार्यगणस्य शिवानतिरिक्तत्वात् "स वा एष पुरुषः पञ्चधा" इति श्रुतेः रेणुकादि पञ्चाचार्याणां सर्वज्ञत्वस्य शिवसर्वज्ञत्वाविशेष्यात् तदुक्तं सिद्धान्त शिखामणौ— "इत्येवं प्रार्थितः शंभुः ब्रह्मणा विश्वयोनिना। ससर्जात्मसमप्रख्यान् सर्वगान् सर्वशक्तिकान्॥ "प्रबोधपरमानन्द परिवाहितमानसान्। प्रमथान्विश्वनिर्माणप्रलयापादनक्षमान्॥ तेषु

प्रमथवर्गेषु सृष्टेषु परमात्मना । रेणुकोदारुकश्चेति द्वावभूतां शिवप्रियौ इति । उक्तचादित्यपुराणे—

"प्रजाः सृजेति निर्दिष्टश्चन्द्रमौलिर्विरिंचिना । ससर्ज मनसा रुद्रानात्मतुल्यान्महेश्वरान् नीलकण्ठांस्त्रिनेत्रांश्च जटामुकुटमण्डितान्" इति । तत्र शास्त्रप्रवर्तकत्वेऽप्याचार्यगणस्य रेणुकादेः न ब्रह्मसृष्टशास्त्रप्रवर्तकोपमन्यु-दूर्वास-दधीचि–गौतमादिवच्छास्त्रप्रणेतुः सर्वज्ञत्वादपकृष्टं सर्वज्ञत्वम् । एतेन श्रीकरभाष्ये—

"ननु सर्ववेदवेदान्तोक्त सकलपदार्थाभिज्ञत्वं सर्वज्ञत्वं तदुपमन्यु-दधीचि-गौतम-दूर्वास-रेणुक-दारुक-शंकुकर्ण-गोकर्णादीनामपि दर्शनात् कथं परमेश्वरस्यैकस्यैवेति चेन्न । परमेश्वरोपासनावशात् तत्कृपालब्ध यत्किञ्चित्सर्वज्ञत्वस्य तेषां सत्वान्न विरोधः । खद्योत-प्रभाकरयोस्तेजस्त्वेनैकत्वेऽपि प्रकाशवैलक्षण्यात् सर्ववस्त्ववभासक श्रुतीनां परमेश्वरकर्तृतया तस्यैव सर्वाधिकज्ञानमुपपद्यते शास्त्रप्रवर्तकापेक्षया शास्त्रप्रणेतॄणां विशेषज्ञानदर्शनात् । किंच सकलजगद्व्यापकत्वेन सर्वान्तर्यामित्वेन सर्वज्ञत्वं नान्येषां संभवात् सर्वज्ञत्वादि षड्विधर्माण मनन्यसाधारणत्वात्" इत्युक्तं निरस्तम् । रेणुकदारुकादीनां यत्किञ्चित् सर्वज्ञत्वमिति यत् शिवसृष्टानां प्रमथानां सर्वान्तर्यामित्वात् सर्वशक्तकत्वात् तत्राप्याचार्यगणस्य शिवव्यूहात्मकत्वात् नित्यमुक्तत्वात् शिवस्यैव भक्तो पासनार्थं गुरुलिंगजङ्गमरूपेण त्रिधा विभक्तत्वात् रेणुकाद्याचार्यपञ्चकस्य गुरुरूपत्वात् जङ्गमात्मकत्वात् मुक्तात्मनां सर्वज्ञत्वादि शक्तीनां विकासे

रेणुकादि नित्यमुक्तात्मनां सर्वज्ञत्वादिमत्वस्य कैमुतिकन्यायसिद्धत्वात् मुक्तात्मनां परशिवब्रह्मणः किंचिदपकर्षे संसारित्वापत्तेः "अनादिशिवात् कथंचित् अपकर्षे वा मुक्तशिवाः संसारिण एव स्युः" इत्युक्तत्वात् । शिवसूत्रविमर्शिन्यां — "तस्मादुपमन्युदधीचिगौतमादिवत् रेणुकदारुकादि भगवत्पादानां खद्योतसादृश्यं यत्किंचित्सर्वज्ञत्वमुक्तं शक्तिपातपवित्रितबुद्धिविलसितमिति ध्येयम् । क्रियासारे—

नन्दिकेश्वरादि द्वारपालेष्वपि शिवाभेदबुद्धेः कार्यत्वे उक्ते रेणुकाद्याचार्यगणे शिवाभेदबुद्धेः कर्तव्यताकत्वात् श्रीकरभाष्यकारस्य भगवत्पादेषु रेणुकादिषु शिवाभेदबुद्धेरनुपजातत्वे गणगोत्राजन्यत्व निमित्तमथवा शिवागमापरिशीलनं च निमित्तमुन्नेयमत एव तेनोपमन्यु गौतमादिमहर्षिसाम्यमुक्तं यत्किंचित्सर्वज्ञत्वेन तच्छिष्यकोटिप्रविष्टानामुपमन्युदधीचिदूर्वासादीनामिव नैव युक्तं किंचिज्ञत्वं वक्तुम् । रेणुकादीनामप्राकृतमन्त्रतनुत्वात् उपमन्युदधिचादीनां प्राकृततनुत्वात् तेषां शिवदीक्षावशात् मन्त्रपिण्डस्य भावनामात्रगम्यत्वात् न वस्तुतो मन्त्रमयत्वम् । रेणुकादीनां गुरुरूपत्वेन शिवात्मकत्वात् उपमन्युप्रमुखानां ऋषीणां शिष्यरूपत्वेन जीवात्मकत्वात् तदुक्तं क्रियासारे—

"गुणातीतः परशिवो गुरुरूपमुपाश्रितः । गुणानृन्धे" इति प्रोक्तो गुरुशब्दस्य विग्रहः स वकारान् राजसादीन्गुणान् रुन्धे व्यपोहति । गुणत्रयं व्यपोह्याग्रे शिवं बोधयतीति सः । विश्वास्तितां तु गुरुरित्यभिदीयते ।। इति । 'तस्मात्तस्माच्च गिरिजे पंचाननसमुद्भवाः । मदादिसर्वलोकानां जगद्गुरुवरोत्तमाः" इत्यागमोक्तेः उपमन्यु-दधीचि-

दूर्वास-अगस्त्य-सानन्द-व्यास-कश्यप-हरकण्ठ- गौतमादयः पंचाचार्य शिष्याः इत्येतदपि पाशुपततन्त्र-काशीखण्ड-श्रीशैलखण्डादि ग्रन्थेषु प्रसिद्ध-मेव। एते च रेणुकादयः पंचाचार्याःश्रीकरभाष्यकारेण उपमन्यु प्रमुख ऋषिपंक्तिनिक्षिप्ता ये सन्ति त एव द्वापराचार्याः। "द्वापरे रेणुकश्चेति दारुकश्च द्वितीयकः। तृतीयो शंकुकर्णश्च चतुर्थो धेनुकर्णकः। पंचमो विश्वकर्णाख्यः पंचनामानि वै शृणु"। इति पाशुपततन्त्रोक्तेः। एतेषां च सद्यो जातादि पंचमुखाविर्भूतत्वात् नित्यमुक्तत्वाच्च नित्यमुक्तशिवात्म-कत्वात् स्वतन्त्रत्वात्। न हि परशिवब्रह्मणः कथंचिदपकर्षं वक्तुं शक्यते। येन यथाकथंचित् यत्किंचित् सर्वज्ञत्वमुच्येत "यस्मा-न्मन्मुखसंजाताः स्वतन्त्राश्चेति विश्रुताः" इत्यागमोक्तेः। किं च किं नाम यत्किंचित्सर्वज्ञत्वं सर्वज्ञपरशिवब्रह्मनिष्ठात् सर्वज्ञत्वात् भिन्नं वा अभिन्नं वा? आद्ये-शास्त्रप्रवर्तकानां (तेषां?) मेषपालादिसाम्यप्रसंगः; तेष्वपि तत्सत्वात्। द्वितीये तेषां सर्वज्ञादविशेषप्रसंगः। यदि निगमागमशास्त्र-जन्यज्ञानवत्वं यत्किंचित् सर्वज्ञत्वम्; तत्रापि शास्त्रप्रणेतुः शिव-ज्ञानात्तद्ज्ञानमपकृष्टं वा अभिन्नं वा? यद्यपकृष्टं तदा कथं शास्त्रप्रवर्तकत्वं स्वेषामेव साकल्येन शास्त्रज्ञानाभावात् कथमन्यान्प्रवर्तयन्ति। यदि शास्त्ररचयित्रैव साकल्येन स्वस्वरूपं नोपदिष्टं तर्हि शास्त्रजिज्ञासुनापि साकल्येन स्वरूपज्ञानाभावान्मोक्षाभावप्रसंगः। तस्माच्छास्त्रस्य निगमागमरूपस्य प्रणेतुः तद्विषयस्य च परशिवब्रह्मणः पाणिन्यादिसादृश्यम-युक्तमेव। यद्यभिन्नं तदा सर्वज्ञशिवादविशेषप्रसंगः। इष्टापत्तौ 'ननु' इत्यादिना शंकोत्थापनं व्यर्थम्। यदि शास्त्रप्रवर्तकाः उपमन्यु-सानन्द-

कश्यप-हरकण्ठ-व्यासागस्त्य-दूर्वासदधीचि-गौतमादयः स्वयं बद्धाः कथमन्यान्मोचयन्ति । "किं शिला-तारयेच्छिलां ।" यदि ते मुक्तास्तेषु शिवाभिन्नेषु शिवनिष्ठं सर्वज्ञत्वं कथं न तिष्ठति । मुक्तात्मनां नद्योऽब्धाविव परशिवब्रह्मसामरस्याभावे तदपकर्षे वा संसारित्वापत्तेरुक्तत्वान्न द्वैतं वक्तुं शक्यते मुक्तात्मनाम् । वेदान्तकामिकाद्यागमशास्त्रप्रवर्तकाः बद्धा यदि भवेयुस्तदा परशिवभिन्नेषु तेषु सर्वज्ञत्वशंका संभवेत् । तस्माच्छास्त्रप्रवर्तकेषु यत्किंचित्सर्वज्ञत्वमुक्तं बालिशभाषितमेव । तत्रापि नित्यमुक्तेषु रेणुक-दारुकादिभगवत्पादेषु तदुक्तमतिसाहसमेव । किं च "खद्योत प्रभाकरयोः तेजस्त्वेनैकत्वेऽपि प्रकाशवैलक्षण्यात्" इत्युक्तमप्ययुक्तमेव । तयोरेकत्वाभावात् खद्योतस्य तेजस्त्वाभावात् । तस्य पार्थिवत्वात् । अन्यथा बिडालनेत्रस्थिततेजस्त्वेन प्रभाकरबिडालयोरैकत्वापत्तेः । तस्मात् खद्योतस्य तेजस्त्वप्रतिपादनमनाघ्राततर्कादिशास्त्रग्रंथस्य श्रीकरभाष्यकारस्य भूषणमेव ।

न च मुक्तात्मनां शास्त्रार्थज्ञानवत्वेऽपि न ब्रह्मगतसर्वज्ञत्वं तस्य शास्त्रार्थादधिकार्थज्ञानवत्वात् । तथाहि वेदः स्वार्थादधिकार्थज्ञानवज्जन्यः वाक्यप्रमाणत्वात् पाणिन्यादिवाक्यवत्" इत्यनुमानेन शास्त्रजिज्ञासादिना शास्त्रार्थज्ञानवत्वात् । मुक्तात्मनां न शास्त्रकर्तुर्ब्रह्मणः सर्वज्ञत्वमिति वाच्यत् । शास्त्रकर्तुर्ब्रह्मणोऽपि शास्त्रप्रतिपाद्यत्वात् तदर्थत्वात् । वेदे वाक्यप्रमाणत्वहेतो । सत्वेऽपि साध्याभावात् बाधितत्वात्स्यदिवेदकर्तुर्ब्रह्मणो वेदार्थता कथं । वेदः स्वार्थादधिकार्थज्ञानवज्जन्य ?

इत्युच्यते। यदि तस्य सा न भवेत्। कथं वा "शास्त्रयोनित्वाधिकरण-मुपपद्यते ब्रह्मणः। शास्त्रार्थाभावात्। यदि शब्दार्थमय जगज्जन्मादि कर्तरि ब्रह्मणि वेदादिशास्त्रप्रमाणकत्वं नास्ति। केन वा प्रमाणेन तत्सिद्धिर्भवति। यदि किमपि प्रमाणं न स्यात्तदा शास्त्रैकप्रमाणकत्वं किमर्थं सूत्रितम्। "शास्त्रयोनित्वा"दिति।

तस्माच्छास्त्रकर्तुरपि शास्त्रार्थत्वात् तद्गतसर्वज्ञत्वास्यापि शास्त्रप्रतिपाद्यत्वात् शास्त्रश्रवणादिना मुक्तात्मनां सर्वज्ञत्वप्राप्तिर्भवत्येवेति ध्येयम्। एतेन "यद्यद्विस्तरार्थं शास्त्रम्" इत्यादिनोक्तं शांकरभाष्यकारेण तदपि निरस्तमित्यवगंतव्यम्।

ननूक्तं अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेन्न। "अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। न हि शास्त्रमिदं तया विषयभूतं ब्रह्म प्रतिपिपादयिषति" इति इतिचेन्न। यस्य ज्ञानान्मुक्तिस्तस्य ब्रह्मणः शास्त्रविषयत्वाभावे कथं शास्त्रं तद् ज्ञानमुत्पादयति स्वस्मिन्नविद्यमानत्वात् श्रोता वा कथं शास्त्रेऽविद्यमानं ब्रह्म जानाति। न हि सांख्यादि तत्तच्छास्त्राविषयं तत्तदध्येता जानाति। तस्मात् वेदान्त शास्त्रस्य विषयत्वाभावे ब्रह्मणः ज्ञानाभावात् मोक्षाभावप्रसंगात्। इदमिति परिच्छिन्नतया ब्रह्मणः प्रतिपादकत्वाभावेऽप्यपरिच्छिन्नतया ब्रह्म प्रतिपादयत्येव शास्त्रम्। तथा च शास्त्रं "सत्यं ज्ञानमनन्तं ब्रह्म" "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति

तद्ब्रह्म। तद्विजिज्ञासस्व" इति। तस्माच्छास्त्राविषयत्वप्रतिपादनं ब्रह्मणः "शास्त्रयोनित्वाधिकरणंविरुद्धम्। न हि" यस्यामतं तस्य मतं मतं यस्य न वेदसः। अविज्ञातं विजानतां विज्ञातमविजानताम्'इत्यादि शास्त्रं ब्रह्मणः शास्त्राविषयत्वे प्रमाणमन्यथा अग्रिम "प्रतिबोधबिदितं मतममृतत्वं हि विन्दते। आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्" इति शास्त्रविरोधापत्तेः। अज्ञानस्युप्त्युपगमानन्तरभाविको प्रतिबोधस्य शिवाद्वैतज्ञानस्य "अहं ब्रह्मास्मि" इत्यादि शास्त्रजन्यस्य विषयतायाः ब्रह्मणि प्रतिपादनात्। कथमन्यथा प्रतिबोधविदितत्वं ब्रह्मणि संभवति। तस्मात् "यस्यामतं तस्य मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्" इत्यस्य शिवाद्वैतज्ञानिनः सर्वज्ञत्वप्रतिपादन परत्वात्। येन संसारिणा अमतं दूर यवहितविप्रकृष्टादिकं सर्वमपि तेनैव शिवाद्वैतज्ञानानन्तरं असंसारिणा मतं विज्ञातं भवति। "आत्मनिखल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं" इति श्रुतेः 'यस्यामतं" इत्यस्य प्रतिबोधविदित चार्थं —केनोपनिषदः व्याख्यायामेव विस्तरतो निरूपयिष्यामः। तथा च विविधद्गुरूपसदनसमुदितदीक्ष लक्षणगुरुकारुण्यस्थल-संपन्ना उपमन्युदधीचिदूर्वासागस्त्य प्रमुखमहर्षिगणस्य ब्रह्मज्ञानित्वप्रयुक्त-सर्वज्ञत्वस्य श्रुतिसिध्दत्वे किमु वक्तव्यम्। तद्गुरूणां रेणुकदारुक शंकु-कर्ण धेनुकर्ण विश्वकर्णाख्यानां पंचाचार्याणां सद्योजातादि पंचमुखाविर्भू-तानामिह सोमेश्वरादि पंचलिंगगर्भाविर्भूतानामयोनिजानां नित्यमुक्तानां

गणनायकानां शिवव्यूहानां शिवसर्वज्ञत्वाभिन्नसर्वज्ञत्वमस्तीति। तथा च मुक्तात्मनां सर्वलोकेषु कामचारत्वं ब्रवीति श्रुतिः। "आत्मरतिः आत्मक्रीड आत्ममिथुन आत्मानन्दः सस्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" इति। तेषां सर्वज्ञत्वमपि वदति श्रुतिः। तदेषः श्लोको न पश्यो मृत्युं पश्यति। न रोगं नो तदुःखतां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः" इति। उक्तं च शिवधर्मोत्तरे "दिनकृत्कोटि संकाशं स्थानमाश्चर्यसंयुतम्। सर्वकामसमायुक्तं विशुद्धं नित्यमक्षयं॥ संप्राप्य तत्परं दिव्यमन्तःक्लेशविवर्जिताः। सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा भवन्ति च॥ विशुद्धकार्यकरणाः परमैश्वर्यसंयुताः। सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः। सम्प्राप्ताये परं स्थानं ज्ञानयोगरता नराः। न तेषां पुनरावृत्तिः घोरे संसारमण्डले इत्यलं "संकल्पादेवतु तच्छ्रुतेः" इत्यादि सूत्रवृत्तौ मुक्तेः स्वरूपस्य वक्ष्यमाणत्वात्। तस्मान्न श्रीकरभाष्यकारोक्तं यत्किंचित्सर्वज्ञत्वं रेणुकभगवत्पादादीनामपि सोढुं शक्यते शास्त्रदृष्टिभिः शैवैः। "यैर्भेददृष्ट्यामर्त्यत्वं गुरोर्लिंगस्य चाश्मता। कल्पिताज्ञातत्वास्ते तत्वज्ञान पराङ्मुखाः। इति। "भेदकृत्पापमश्नुते।" इति च गुरुपदवाच्यानां शिवभिन्नत्वकल्पने प्रत्यवायविधाने उक्ते क्रियासारे किमुवक्तव्यं परमगुरूणां रेणुकादिभगवत्पादानां किंचिज्ज्ञत्वप्रयुक्तमर्त्यत्वकल्पने। तस्मात् श्रीकरभाष्यकाराः प्रत्यवायबद्धाः सन् तत्फलं महद्दुःखमनुभवतु। सर्वज्ञत्वादिषडंगयोगसिद्धानां सायुज्यमुक्तिलाभे सर्वज्ञत्वादि प्राप्तिर्भवति। तदुक्तं क्रियासारे तृतीयोपदेशे "शिवस्यामानमैश्वर्यं तदा लब्धं भवेत् स्वतः।

सार्वज्ञाद्यं शिवैश्वर्यं लब्ध्वा स्वात्मा विराजते " तत्सायुज्यमिति प्राहुः वेदागमपरायणाः। एवं क्रमेण मुक्तिःस्याल्लिंगादौ पूजया स्वतः ॥ अतः शिवप्रसादार्थं क्रियाद्यैः पूजयेच्छिवम्। शिवक्रियाशिवतपः शिवमन्त्रजपः सदा। शिवज्ञानं शिवध्यानमुत्तरोत्तरमभ्यसन्। आसुप्ते-रामृतेः कालं नयेद्वै शिवचिन्तया इति। तस्मादत् " व्यासादि शास्त्र-प्रवर्तकानामदृष्टफलत्वे इतरेषां फलप्रदर्शकत्वाभावात् स्वयं तीर्णः परां-स्तारयतीति न्यायात्। मुक्तत्वं वक्तव्यम्। तथा च मुक्ताः स्वसं कल्पानुसारेण किंचित्कालं तत्तल्लोकभोगानन्तरं शिवैक्यरूपं शिवसायुज्यं प्राप्नुवन्तीति सालोक्यादि चतुर्विधमुक्त्यभ्युपगच्छद्भिरंगीकरणीयमेव। किं च केषांचिन्मुक्तानां सर्वज्ञत्वादि शक्तिविकासो देहपातानन्तरं केषाचित् कदाचित् देहे स्थिते एवेत्यप्यंगीकरणीयम्। कथमन्यथा विश्वामित्रस्य स्वर्गरचनासामर्थ्यं अगस्त्यस्य वा समुद्रपानसामर्थ्यमुपपद्यते। तदुक्तं क्रियासारे— " अगस्त्यः कुंभजन्मापि शिवभक्त्यैव केवलम्। पपौ समुद्रमतुलं शिवशक्त्युपबृंहितः।" एवं च शास्त्रप्रवर्तकव्यासागस्त्य-दूर्वासदधीचिप्रमुखेष्वपि मुक्तत्वप्रयुक्तसर्वज्ञत्वादिधर्माणां वक्तव्यत्वे किमु-वक्तव्यम् नित्यमुक्तानां तद्गुरूणां रेणुकभगवत्पादादीनां दृश्यादृश्य-रूपेणस्थितानां सर्वशक्तिकानाम्। तस्माच्छ्रीकरभाष्यकारोक्तमनादर-णीयं सर्वथा। किं च स्वोक्तिविरोधोऽपि भवत्येव। तथाहि स्वेनैव मंगलश्लोके भगवतो रेणुकस्येव कलियुगे रेवणासिद्धाभिधानमादधा-नस्य मंगलश्लोकोक्तशिवतत्वोपदेशक सदाशिवादिपारंपर्यक्रमे च गुरुत्व-स्योक्तत्वाच्च। न हि तात्विकार्थोपदेशकत्वाभावे गुरुत्वं संभवति। न

हि तात्त्विकस्य शिवस्य साक्षात्काराभावे शिवत्वोपदेशकत्वं संभवति । न कश्चित्स्वसमयादृष्टं दर्शयति । किन्तु दृष्टं दर्शयति । तथा च सर्वात्मकशिवदर्शने सति कथं न सर्वं जानाति श्री जगद्गुरु रेणुकशिवाचार्यः । यदि न जानाति कथं वा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा श्रुतिः संगच्छते । तस्माद्यत्किंचित् सर्वज्ञत्वोक्तं स्वोक्तिविरुद्धम् । किं च विश्वगुरोः दारुकस्यैव भगवत्पादस्य कलियुगे मरुलसिद्धाभिधानमादधानस्य वामदेवमुखोद्भूतस्य अत्र सिद्धेश्वरलिंगजातस्य रेवणसिद्धसमशक्तिकस्य मंगलश्लोके शिष्यत्वद्योतकविशेषणं तु सिद्धान्तशास्त्रानवलोकनविलसितमेव तत्र कुत्रापि रेवणसिद्धशिष्यः मरुलसिद्ध इत्युक्तेरभावात् । अस्तु श्रीकरभाष्यविमर्शे विस्तरेणोच्यत एव । किं च रेणुकदारुकादि पंचाचार्येषु शास्त्रप्रवर्तकत्वेऽपि न यत्किंचित्सर्वज्ञत्वं वक्तुंशक्यते व्यभिचारात् । शास्त्रकर्तरि शिवेऽपि चतुर्मुखादिशास्त्रप्रवर्तकत्वस्य सत्वात् । तस्य “ यो ब्रह्माणं विदधाति पूर्वं योवै वेदांश्च प्रहिणोति ” इत्यादि प्रमाणसिद्धत्वात् “ ब्रह्मा देवानां प्रथमः संबभूव ” इत्यादि श्रुतिप्रतिपादित अथर्वादिशास्त्रप्रवर्तकानामुपदेष्टा खलु प्रथमं प्रथमोत्पन्नश्चतुर्मुखस्तस्योपदेशकगुरोरभावे कथं स्वयमनधीत्य अन्यानध्यापयति ब्रह्मविद्याम् । “ सर्वे जनिमन्तोऽपीहाचार्यकुलाद्वेदमधीयन्ते तदर्थं शृण्वन्ति ततो युक्तिभिः मन्यन्ते ध्यायन्ति धारयन्ति साक्षात्कुर्वन्ति च न तु स्वयं तथा कुर्वन्ति । तस्माज्जनिमान् चतुर्मुखोऽप्यनाद्यनन्तात्सर्वगुरोः परशिवब्रह्मणः संजातः सन् तस्मादेव ब्रह्मविद्यां प्राप्य स्वयमग्रे उपदिशेदिति वक्तव्यत्वाच्छिवस्यापि शास्त्रकर्तुः शास्त्रप्रवर्तकत्वं सिद्धमेव । तस्मात्

शास्त्रप्रवर्तकत्वापेक्षया शास्त्रप्रणेतॄणां विशेषज्ञानदर्शनात्" इत्युक्तमप्ययुक्तमेव। शास्त्रप्रणेतॄणामपि शास्त्रप्रवर्तकत्वदर्शनात्। दृष्टं चैतल्लोके पतंजलिप्रभृतिषु शास्त्रप्रणेतारः शास्त्रप्रवर्तयितारो न भवन्तीति नियमाभावात्। पशुवाङ्मनसोऽविषयत्वेऽप्यतद्व्यावृत्त्या परशिवब्रह्मणा चिन्मात्रोऽहं सदाशिवः" "सत्यं ज्ञानमानन्दं ब्रह्म" इत्यादि सर्वात्मक शिवाद्वैतप्रतिपादकशास्त्रविषयत्वात् तच्छास्त्रश्रवणमननादिसंजनितपतिदशापन्नमुक्तमनोविषयत्वाच्छास्त्रमेव प्रमाणम्। जगत्सृष्ट्यादि कर्तरि परशिवब्रह्मणीति सिद्धम्॥ ३॥

ननु शास्त्रस्य न प्रामाण्यं सिद्धवस्तुप्रतिपादकत्वेनाक्रियार्थत्वात्। तदुक्तं "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति। कर्तृदेवतादि साधनपरत्वे तु अनुष्ठानोपयोगित्वेन सार्थक्यात्। अतो न सिद्धशिवलिंगपरत्वम्। वेदांतेषु जीवप्रतिपादकवाक्यानां यागादिक्रियाकर्तृयजमानपरकत्वात्। ब्रह्मप्रतिपादकवाक्यानां देवतापरकत्वात् सृष्टिप्रतिपादकवाक्यानां द्रव्यादिसाधनपरकत्वात् अनुष्ठानोपयोगित्वेन वेदान्तानां सार्थक्यम्। ब्रह्मपरकत्वे तदभावाद्वैयर्थ्यं स्यादित्यत आह।

तत्तु समन्वयात् ॥ ४॥

अत्र तु शब्दः पूर्वपक्षनिराकरणार्थः। तच्छब्दः सर्वशक्तिजगदुत्पत्त्यादि कर्तृपरशिवलिंगे वर्तते तद्ब्रह्म वेदान्तशास्त्रादवगम्यते कुतः—"सदेव सौम्येदमग्र आसीत्। एकमेवाद्वितीयं ब्रह्म। आत्मावा

इदमेक अग्रासीत्। ऐतदात्म्यमिदं सर्वं। तत् सत्यं स आत्मा। तत्त्वमसि" इत्यादीनां वाक्यानां समन्वयात्। समनुगतत्वात् भिन्नप्रकरणपठितत्वाच्च। न कर्मोपयोगि कर्तृदेवतादि साधनपरत्वं वेदान्तानां ब्रह्मणः कर्मापेक्षितकर्तृत्वाद्यभावात्। अन्यथा श्रुतहान्यश्रुतकल्पनाप्रसक्तेः। न चानर्थक्यं हेयोपादेयरहितसिद्धवस्तु प्रतिपादकत्वात् इति वाच्यम्। परमार्थमोक्षसाधनज्ञानविधिविषयत्वात्।

ननु ज्ञानस्य विधेयत्वे "चोदनालक्षणोऽर्थो धर्मः" इति सूत्रोक्तधर्मलक्षणसद्भावात्। धर्मत्वं स्यात्। इष्टापत्तौ तत्साध्यमोक्षस्यानित्यत्वप्रसंगः। "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते।" इति श्रुतेः। "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" इति श्रुतेश्च। कर्मफलस्य अनित्यत्वश्रवणात् इति चेन्न "अयं हि परमो धर्मो यो योगेनात्मदर्शनम्। ज्ञानविज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम्।" इत्यादिस्मृतेः। ज्ञानस्य धर्मरूपत्वेऽपि तत्साध्यस्य मोक्षस्य नानित्यत्वम्। "तद्यथेह कर्मचित" इति वाक्यन्तु आत्मभिन्न केवल इष्टापूर्तादि कर्मफलप्रतिपादकत्वेन प्रमाणं तदनन्तरम्। "अथ य इहात्मानमनुविद्यव्रजन्त्येतांश्च सत्यान् कामान्।।" इति विहितविद्यया अक्षय्यफलकत्वदर्शनात्। "नास्त्यकृतः कृतेनेति वाक्यन्तु विद्याभिन्नकर्मविषयकमेवेति बोध्यम्॥ अन्यथा "श्रोतव्यो निदिध्यासितव्यः"॥ तमेव धीरो विज्ञाय। प्रज्ञां कुर्वीत ब्राह्मणः"॥ "ज्ञात्वा देवं मुच्यते सर्वपाशैः"॥ "आत्मन्येवात्मानं पश्येच्छ भुराकाशमध्ये ध्येयः॥" इत्यादिना उक्तध्यानविधेरनुपपत्तेः। तस्मा-

द्वेदान्तेषु मोक्षफलाय ज्ञानस्य विधीयमानत्वात् तादृशज्ञानोपासनविषया-कांक्षायां अवांतरवाक्येन ब्रह्मणोऽपि प्रतिपाद्यत्वं सिध्यति। विध्यनुप्रवेशमात्रेण सिद्धवस्तुमात्रप्रतिपादकत्वे वेदान्तानामानर्थक्यं दुर्निवारं स्यात्।

ननु 'रज्जुरियं नायं सर्पः' इति वस्तुमात्र प्रतिपादनेऽपि सर्पभ्रान्ति-निवृत्या तत्कृतभयकंपादिनिवृत्तिरूप प्रयोजनस्य दृष्टत्वात् तत्त्वज्ञानान्मि-थ्याभिमाननिवृत्या तत्कृत सुखदुःखादेरपि निवृत्तिरूपप्रयोजनसम्भवात्। नानर्थक्यमिति चेन्न। निश्चितात्मतत्त्वस्यापि यथापूर्वं दुःखाद्यनुभवदर्श-नात् जनकादीनामपि यथापूर्वं क्षुत्पिपासादीनामनुमितत्वात् तस्मान्नाव-गतब्रह्मात्मभावस्य यथा पूर्वं संसारित्वं इत्याद्युक्तं साहसमात्रम्। अन्यथा "भोगेन त्वितरे क्षपयित्वा संपद्यन्ते" इति सूत्रेण यावन्वरणं विदुषोऽपि यथा पूर्वं सुखदुःखानुभवस्य दर्शितत्वं असंगतं स्यात्। अतएवोक्तं आपस्तंभेनापि— "बुद्धेश्चेत् क्षेमप्रापणं इहैव न दुःखमुपलभेत।" एतेन परं व्याख्यामीति। यदुक्तं रज्जुसर्पदृष्टान्तेन आत्मतत्त्वज्ञा-नात् मिथ्याभिमाननिवृत्या दुःखनिवृत्तिरिति तत्तुच्छम्। जगतो मिथ्या-त्वस्यैव असिद्धत्वात्। किं तावज्जगन्मिथ्यात्वं त्रैकालिकनिषेधप्रति-योगित्वम्। तथा हि—शुक्तौ रजतभ्रमानन्तरं अधिष्ठानतत्त्वसाक्षात्कारे-रूप्यं नास्ति नासीन्नभविष्यतीति स्वरूपेणेव। 'नेह नाने'ति श्रुत्या प्रपंचस्य स्वरूपेणैव निषेधस्य प्रतीयमानत्वात्। त्रैकालिकनिषेधप्रतियो-गित्वं जगति वर्तते इति चेन्न। त्रैकालिकनिषेधस्य तात्विकत्वे

अद्वैतहानिः। अतात्त्विकत्वे तस्यापि निषेधः इत्यनवस्थापत्तेः। न च प्रपंचनिषेधाधिकरणीभूत ब्रह्माभिन्नत्वान्निषेधस्य तात्त्विकत्वेऽपि न अद्वैतहानिः। अभावस्याधिकरणात्मकत्वादिति वाच्यम्। ब्रह्मणः शून्यत्वापत्तेश्शून्यवादिमतप्रवेशप्रसंगः स्यात्।

ननु घटाभावस्य कपालस्वरूपत्वेऽपि कपालस्य शून्यत्वाभाववत् ब्रह्मणः किं न स्यादिति चेत् जगद्ब्रह्मणोरुपादानोपादेय भावोऽस्मन्मतानुकूलः स्यात्। स्थूलचिदचित्प्रपंचाकारशक्तिविशिष्टं प्रति सूक्ष्मचिदचित्प्रपंचाकारशक्तिविशिष्टस्य ब्रह्मणः उपादानत्वस्य स्वीकृतत्वात्। किं च इदमप्यत्र विमर्शनीयम्— योग्यानुलब्धेरभावप्रत्यक्षत्वावच्छिन्नं प्रति कारणत्वस्वीकारात्। योग्यत्वघटकप्रपञ्चप्रतियोगिसत्त्वोपादानस्य अशक्यत्वात्। न त्रैकालिकनिषेधः प्रामाणिकः स्यात्। किं च कालस्य निषेधविशेषणत्वं निषेधप्रतियोगिविशेषणत्वं वा? नाद्यः तस्य निषेध्यभिन्नत्वात्। निषेधकान्तरमपि कल्पनीयं स्यात्। न द्वितीयः, निषेध्यतावच्छेदककुक्षिप्रक्षिप्तत्वात्। निषेध्यस्वरूपाद्वा पूर्वकाले जगन्नासीत्, इदानीं नास्ति, अग्रे न भविष्यति इति त्रैकालिकनिषेधो व्याहन्येत।

ननु उक्तदृष्टान्तानुसारेण निषेधसंभवे कथं व्याहतिरिति चेत् तत्र कालादीनां सत्त्वेन कथंचित् स्वीकारेऽपि दृष्टान्ते तथाभावात् व्याहतेस्तादवस्थ्यात्। प्रपंचस्य त्रैकालिकनिषेधप्रतियोगित्वाभावे "नेह नाना" "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादि

प्रपंचापवादप्रतिपादकश्रुतीनां अप्रामाण्यमिति चेन्न। वाचारंभणश्रुतीनां शिवोपादानत्वात् प्रपंचस्य तत्तादात्म्यबोधकत्वात् न मिथ्यात्वबोधकत्वमिति श्रुतितात्पर्यस्य वक्तुं शक्यत्वात्। वाचारंभणवाक्यानां तदनन्यत्वबोधनात्। न मिथ्यात्वाय कल्पन्ते जगतश्शिवरूपतः।" इति स्मृतेश्च। अत एव भगवता व्यासेन "तदनन्यत्वमारंभणशब्दादिभ्यः" इति सूत्रे तज्जन्यप्रपंचस्य तद्रूपत्वं निर्दिष्टम्॥

अपि च अध्यारोपस्तु ब्राह्मणस्तदन्यस्य वा? नाद्यः, ब्रह्मणश्शरीरेन्द्रियादि शून्यत्वात्। "सदेव सौम्येदमग्र आसीत्" इत्यादौ सृष्टेः प्राक् द्वितीयवस्तुनिषेधदर्शनात्। तदा तदन्यस्वीकारे शुद्धाद्वैतभंगप्रसंगाच्च। ज्ञाननिवर्त्यत्वं जगन्मिथ्यात्वमिति चेत् तदसंभवस्य पूर्वमेव दर्शितत्वात्। नात्र पिष्टपेषणं क्रियते। न कुत्रापि वेदान्ते ब्रह्मज्ञानेन प्रपंचनिषेधो विधीयते "सर्वो वै रुद्रः" "सर्वं खल्विदं ब्रह्म" इत्यादिना सर्वप्रपंचस्य शिवात्मकत्वोपदेशात्॥ "नान्यत्पश्यति नान्यत्श्रुणोति" इत्यादि श्रुत्या मुक्तात्मनां इदंतारुपघटपटात्मक प्रपंचत्वेन व्यवहृतमायापाशमेव सर्वशिवात्मकज्ञानेन तिरोधीयते इति ज्ञायते। अतो जगतो मिथ्यात्वमयुक्तम्। अन्यथा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाश्रुतेरप्रामाण्यं स्यात्। जगद्ब्रह्मणोरुपादानोपादेयत्वे तस्य प्रामाण्यं स्यात्।

किं च "अखण्डाद्वैतभाने तु सर्वं ब्रह्मैव नान्यथा। ज्ञानाद्विकल्पबुद्धिस्तु लीयते न स्वरूपतः। असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्' इति गीतायां च श्रूयते।

ननु "असद्वा इदमग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म" इत्यादि श्रुत्या प्रपंचस्य असत्वोपदेशात् कथं जगतः त्रैकालिकसत्यत्वमिति चेन्न। तत्र असत्पदस्य नामरूपविभागानर्ह प्रपंचार्थकत्वात्। अन्यथा "ततो वै सदजायत" इत्यनेन विरोधः स्यात्। तस्मात् प्रतिपत्तिविधिविषयतयैव वेदान्तानां सार्थक्यम्। न तु सिद्धवस्तु प्रतिपादनेन। एवं च तस्मात् प्रमाणांतरानवगत स्वाभाविकानन्तशक्तिविशिष्टजगदुभयकारण पशुपाशनियामकसकलनिष्कलस्थूलचिदचित्प्रकाशकसत्यज्ञानानन्तकल्याणगुणविभवाश्रयलिंगरुपपरब्रह्मणः उपासनाविधिपरकत्वेन तद्विषयाकांक्षायां मानान्तरागम्य सिद्धवस्तुप्रतिपादकत्वेन च तेषां सार्थक्यं प्रामाण्यं चेति सिद्धम्।

अपि च न स्वप्नवन्मिथ्यात्वं जगतः अर्थसिद्धिक्रियासिद्धिदर्शनात्। विधिनिषेधविधायकशास्त्रं आचार्ययोरुपदेशादि कर्तव्यायोगेन बुद्धमतप्रवेशाच्च। "नाभाव उपलब्धे वैधर्म्याच्च न स्वप्नादिवत्" इति द्वितीयाध्याये मिथ्यात्ववादस्य निरस्तत्वात्। अत एव एतन्मिथ्यावादमुद्दिश्य "मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च। मयैव कथितं देवि कलौ ब्राह्मणरुपिणा॥ अपार्थं श्रुतिवाक्यानां दर्शयित्वातिगर्हितम्। कर्मस्वरूपत्याज्यत्वमत्र च प्रतिपाद्यते॥ सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र चोच्यते।" इत्यादि विज्ञानभिक्षुप्रमुख प्राचीनभाष्यकारादिस्वीकृत पद्मपुराणादि वाक्यं श्रूयते। अथ च न स्वप्न-

ज्जगतो मिथ्यात्वम्। जीवोन्नतिनाशौच ञाता(?)मद्वैतवादिनाम्। स्वप्नावस्थासमुत्पन्न पीयूषविषपानतः।" उक्तंचान्यदपि। "भार्यात्वभ्रमविषये सुतायां चेत् स्वदारता। तात्कालिकं तया सार्धं मैथुनं स्यादपातकम्॥" इत्याद्यनेक अनिष्टापत्तेर्न युक्तं जगतो भ्रमविषयत्वं वक्तुम्।

[ग्रन्थपातः]

अत्र "तत्तु समन्वयादिति सूत्रार्थविचारः" क्रियासारे—

एतेषां ब्रह्मवाक्यानामन्वयो ब्रह्मणि स्मृतः ॥ १४३ ॥
समन्वयात्तु तद्ब्रह्म धार्यं पूज्यं मुमुक्षुभिः।
वैषम्यद्योतनार्थाय तु शब्दोऽयं प्रकाशितः ॥ १४४ ॥
तस्माद्विषयवाक्यानि बह्वर्थानि न संशयः।
तत्रैकार्थमुदाहृत्य स्वस्वबुध्यनुसारतः ॥ १४५ ॥
लोका मुह्यन्ति सततं विवदन्तः परस्परम्।
पुनः संसारचक्रेऽस्मिन् भ्रमन्ति परिमोहिताः ॥ १४६ ॥
कण्वादिकृतशापाश्च परतन्त्रा जना भुवि।
साधुमार्गं परित्यज्य मार्गान्तरमुपासते ॥ १४७ ॥

ते सर्वे तप्तनरके पतन्ति सततं ध्रुवम् ।
किमस्तिबहुनोक्तेन मानुषं जन्मदुर्लभम् ॥ १४८ ॥

तत्रापि दुर्लभं जन्म कुले शैवस्य कस्यचित् ।
वीरशैवान्वये जन्म परमं दुर्लभं स्मृतम् ॥ १४९ ॥

तत्र जाता नराः सर्वे वीरशैवा नरोत्तमाः ।
विष्णवादिदेवसङ्घानां रक्षकत्वात्सदाशिवः ॥ १५० ॥

वीरः स तु समाख्यातस्तल्लिङ्गं शिव उच्यते ।
वीरलिङ्गं समभ्यर्च्य तत्स्वरूपं प्रयन्ति ये ॥ १५१ ॥

ते वीरशैवा लोकानां नित्यं क्षेमाभिलाषिणः ।
त्रिपुण्ड्रावलिभिर्दीप्ता रुद्राक्षसमलङ्कृताः ॥ १५२ ॥

शिवलिङ्गार्चनपराः शिवभक्तप्रपूजकाः ।
पञ्चाक्षररता नित्यं गुर्वाराधनतत्पराः ॥ १५३ ॥

कीर्तनीयाश्च वन्द्याश्च दर्शनीया प्रयत्नतः ।
शिवलोकाच्च गलितास्ते शिवा नात्र संशयः ॥ १५४ ॥

लिङ्गाङ्गसामरस्येन जीवन्मुक्ता समाहिताः ।
तस्मात्सर्वप्रयत्नेन लिङ्गं धार्यं मनीषिभिः ॥ १५५ ॥

शिवस्वरुपलाभाय पशुपाशनिवृत्तये ।
तल्लिङ्गधारणं मुक्त्वा मुक्तिमिच्छति यः पुमान् ॥१५६॥

विषपानेन नित्यत्वं कुरुते स्वात्मनो हि सः ।
यो लिङ्गधारणं मुक्त्वा पशुशास्त्ररतो भवेत् ॥ १५७ ॥

करस्थं पायसं त्यक्त्वा कूर्परं लेढि चात्मनः ।
अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यतः शिवात् ॥१५८॥

तस्मात्तच्छास्त्रयोनित्वाद्भूयस्तत्तुसमन्वयात् ।
वेदान्तप्रत्ययन्यायमंशांशित्वमधात्स्वयम् ॥ १४९ ॥

अंशोनानेति न्यायेन तदेव परिकीर्त्यते ।
शिवांशब्रह्मविष्णवाद्या अंशी देवः शिवः स्मृतः ॥१६०॥

सर्वोपास्यो महादेवः सर्वेचोपासका स्मृतः ।
कथं तयोः प्रभेदो हि जीवात्मपरमात्मनोः ॥ १६१ ॥

सर्वज्ञत्वादयो धर्माः शिवस्य परमात्मनः ।
किञ्चिज्ज्ञात्वादयो धर्मा जीवानामिति निश्चितम् ॥१६२॥

अभेदः कथमत्यन्त भेदाभेदौ व्यवस्थितम् ।
ब्रह्मणः शास्त्रयोनित्वं कथं तन्न भवेन्निजम् ॥ १६३ ॥

आम्नायस्य क्रियार्थत्वादक्रियत्वाच्छिवस्य तत् ।
बृहिक्रियायाः कर्त्रादिप्रकाशनमतो न च ॥ १६४ ॥
इति चेत्तत्रवक्ष्यामः समन्वयनिरूपणम् ।
वेदान्तैरवगम्यन्ते सर्वज्ञत्वादयो गुणाः ॥ १६५ ॥
वेदान्तेषु च वाक्यानि समन्वयदृढानि हि ।
एतेन शास्त्रयोनित्वं ब्रह्मणो दृढमिष्यते ॥ १६६ ॥

ईक्षतेर्नाशब्दमित्यादि सूत्रार्थविचारः क्रियासारे—

ईक्षतेर्नाशब्दमिति ह्येतदारभ्य केवलम् ।
प्रथमाध्यायपर्यन्तं समन्वय इहोच्यते ॥ १६७ ॥
स देवेत्यादिवाक्यानि श्रूयन्ते तत्र तत्र तु ।
सच्छब्देन च किं ब्रह्म प्रधानं वेति संशयः ॥ १६८ ॥
किं तावत्प्राप्तमधुना प्रधानमिति कश्चन ।
अचेतनस्य जगत उपादानमचेतनम् ॥ १६९ ॥
मृद्दृष्टान्तानुसाराच्च चेतनं न विलक्षणम् ।
सच्छब्देन परं ब्रह्म गृह्यते ह्यात्मशब्दवत् ॥ १७० ॥
ईक्षतेर्ब्रह्मधर्मत्वान्न प्रधानस्य युज्यते ।
अशब्दं हि प्रधानं तन्नहि तद्वाचकः स्मृतः ॥ १७१ ॥
उक्तो मृदादिदृष्टान्तो विषमो नैव युक्तिमान् ।
तत्तेज ऐक्षतेत्याद्यौ तेज इत्यौपचारिकम् ॥ १७२ ॥

एवं गौणं प्रधानेऽपि चेक्षणं हि तदोच्यते ।
गौणश्चेन्नात्मशब्दादित्येतत्सूत्राद्दृढीकृतम् ॥ १७३ ॥
अप्तेजसोरीक्षणं हि गौणं युक्तं न चेतरत् ।
इह सच्छब्दवाच्यस्य चेक्षितुर्मुख्यमीक्षणम् ॥ १७४ ॥
आत्मशब्दपरामर्शात्स आत्मेत्यादिवाक्यतः ।
अप्तेजसोऽपि तथा मुख्यमेवेक्षणं भवेत् ॥ १७५ ॥
तदीक्षणाभिधानं हि चेश्वरस्याभिमानिनः ।
यथा राज्ञो ह्यात्मशब्दो भृत्ये सर्वार्थकारिणि ॥ १७६ ॥
तथा प्रधाने सच्छब्दो युज्यते वीक्षणं च तत् ।
तन्निष्ठस्य च मोक्षोऽत्र ह्युपदेशाद्विधीयते ॥ १७७ ॥
तन्निष्ठा ब्रह्मनिष्ठा हि ते वै मोक्षाधिकारिणः ।
तस्मात्प्रधानमिति च यदुक्तं तन्मृषा भवेत् ॥ १७८ ॥
जगतः कारणं ब्रह्म चोपास्यं हि मुमुक्षुभिः ।
नायमात्मेति वाक्येन शिवस्य वरणं तनोः ॥ १७९ ॥
वरणं नाम तद्रूपधारणं विधिमार्गतः ।
लिङ्गाङ्केत्यादिवाक्येन मोक्षमार्गैकतत्पराः ॥ १८० ॥
अमृतस्येति वाक्येन धारणं प्रतिपादितम् ।
तन्निष्ठा एव मनुजा अतिवर्णाश्रमे रताः ॥ १८१ ॥
त एव हि महात्मानो ब्रह्मनिष्ठा उदाहृताः ।
लिङ्गाङ्गसामरस्येन ब्रह्मभावमुपाश्रिताः ॥ १८२ ॥

सारूप्यरूपिणीं मुक्तिं संप्राप्य परदुर्लभाम् ।
कृतकृत्याभवन्त्येव शिवानन्दभुजोऽनिशम् ॥ १८३ ॥
अथोमित्यादिवाक्येन निश्चितं लिङ्गधारणम् ।
तन्मोक्षसाधनं पुण्यं तद्धार्थं हृदयाम्बुजे ॥ १८४ ॥
अतः सच्छब्दवाच्यं हि ब्रह्मैव तु न संशयः ।
तच्चिच्छक्त्यविनाभूतं जलशैत्यमिवोदितम् ॥ १८५ ॥
मायाप्रधानमित्येतद्युक्तियुक्तं न चाभवत् ।
अजामन्त्रेण चिच्छक्तियुक्तस्य परमात्मनः ॥ १८६ ॥
लीलया जगदुत्पत्तिस्तिरोधानं पुनः प्रभोः ।
कठकैवल्यमाण्डूक्यप्रश्नाद्युपनिषत्सु च ॥ १८७ ॥
वेदान्तसारप्रणववज्रसूच्यादिकासु च ।
प्रकाशितार्थाः सर्वे च विस्मृताः कैश्चिदप्यहो ॥ १८८ ॥
अतदर्था निश्चिताश्च मोहादन्यायतत्परैः ।
अनेन किं बहूक्तेन सूत्रार्थो ह्ययमेव हि ॥ १८९ ॥
अत्रायमवधेयोऽर्थः सूत्रस्वरसतस्ततः ।
ब्रह्म जिज्ञासितं लिङ्गं शिवतत्त्वं श्रुतीरितम् ॥ १९० ॥
समनन्तरसूत्राणां त्रयाणां सौत्रशब्दतः ।
तात्पर्यं वीरशैवोक्तपदार्थेष्वेव दृश्यते ॥ १९१ ॥
तथाहि जन्म लोकानां स्थेमसंहारकर्मणी ।
यतो हि ब्रह्मणस्तस्य ब्रह्मत्वमिति लक्षणम् ॥ १९२ ॥

यतो वेत्यादि विषयवाक्येन तदलङ्कृतम् ।
तत्र तावदियान् भेदः सूत्रीयपदभञ्जने ॥ १९३ ॥
जन्माद्यस्य यतश्चेति पदद्वयमिदं ततः ।
पिण्डादिज्ञानशून्यान्तस्थलस्यैकशतस्य तु ॥ १९४ ॥
यतः सकाशादित्येवतद्ब्रह्मलक्षणमुच्यते ।
सृष्टिवाक्यविरोधोऽपि पूर्वमेव निराकृतः ॥ १९५ ॥
यतश्च स्थलशब्देन प्रोच्येते स्थितिसंहृती ।
स्थीयन्ते सर्वतत्त्वानि लीयन्ते यत्र तत्स्थलम् ॥ १९६ ॥
स्थितिसंहारसापेक्षं जन्म चेति त्रयं स्थलम् ।
यतो वेत्यादि विषयवाक्यार्थानुगुणेन हि ॥ १९७ ॥
विस्तार्य स्थलशब्देन कामिकादौ विचार्यते ।
अथवाकारवाच्यस्य विष्णोर्जन्म यतः शिवात् ॥ १९८ ॥
अथर्वशिखया चोपनिषदा यः समर्थितः ।
शास्त्रशासनकर्तृत्वाद्योनित्वात्तु ततः परम् ॥ १९९ ॥
अकारवाच्यविष्णोस्तद्योनित्वात्कारणात्मकम् ।
लिङ्ग नियामकं तत्त्वं सूत्रतात्पर्यतः श्रुतम् ॥ २०० ॥
शास्त्रं योनिर्यस्य तस्य शास्त्रयोनित्वमेव वा ।
शास्त्राणां योनिरित्येवमस्माकं तत्समञ्जसम् ॥ २०१ ॥
सर्वार्थसाधनोपायाः सन्ति सर्वागमेषु च ।
तथापि विवशा मर्त्या यच्च किञ्चिद्वदन्ति हि ॥ २०२ ॥

एषा रीतिस्सर्वसूत्रसम्मता च व्यवस्थिता ।
अन्याश्च रीतयः सर्वा न सूत्रानुगुणाः कृताः ॥ २०३ ॥

ब्रह्मण्यध्यास इति यज्जगताभिष्यते परैः ।
असूत्रितन्तु तत्सर्वमज्ञानपरिकल्पितम् ॥ २०४ ॥

मूढा मुह्यन्ति सततं यं विना मार्गमुत्तमम् ।
ननु तद्ध्युच्यते ब्रह्म वेदेत्यादिविधानतः ॥ २०५ ॥

एकं ब्रह्म च ब्रह्मैव स्वाविद्येत्यादि वाक्यतः ।
अभेद एव कथितो भेदाभेदः कथं भवेत् ॥ २०६ ॥

इति चेन्न ब्रह्म वेद ब्रह्मैव भवतीति यत् ।
उपासनाङ्गं तदिति निर्णीतं श्रुतिसूत्रयोः ॥ २०७ ॥

तन्निष्ठस्यैव मोक्षोऽत्र ह्युपदेशाध्द्रुवं परम् ।
ब्रह्मैव सच्छब्दवाच्यं तस्मादन्यन्न चाभवत ॥ २०८ ॥

हेयत्वावचनाच्चैव स्वाप्ययादपि नेतरत् ।
अप्ययो गतिसामान्यं ब्रह्मण्येवेति निश्चितम् ॥ २०९

श्रुतत्वाच्च प्रधानादेर्न हेतुत्वं कदाचन ॥

इष्टलिंगधारणमुक्तम् । स्पष्टीकृतं लिंगधारणविधायकानां वचसा सामंजस्यम् । क्रियासारे लिंगधारणोपदेशो तस्माच्चत एव अवगंतव्य मुमुक्षूणां लिंगधारणमावश्यकमिति ॥ तथा च ब्रह्मनिष्ठानां पंचाचा अष्टावरणरूपेण इष्टादिलिंगनिष्ठानां मोक्षस्य संकुचितस्वशक्तिवि

उपदेशात्। छान्दोग्यादिषु कथनात। नह्यचेतनप्रधाननिष्ठानां कुत्रापि-मोक्षोपदेशस्य अदर्शनात् प्रधानं जगज्जन्मादिकारणं भवति। तथा च 'अजामेकां लोहितकृष्णशुक्लां' इत्यादि श्रुतीनां पूर्वोक्तस्वविमर्शशक्तिस्वातन्त्र्यपरिकल्पितमायाशक्तिपरकत्वेनान्वयसंभवात्। तादृशशक्तिसहित षट्स्थलपरशिवलिंगमेव जगज्जन्मादिकारणम्। तस्मात्तदेव मुमुक्षुभिरुपास्यम्। उपासनाप्रकारश्च जगज्जन्मादि....रीयः:परशिवः स एव....देन पुनः पुनः.... विषयां.... चिन्तनेन संकुचितविमर्शशक्तेः कुण्डलिन्याः विकासो जायते। तदुक्तं स्पन्दसूत्रे— "मध्यविकासात् चिदानन्दलाभः" तट्टीकायां संविदेव भगवतीमध्यमित्युक्तत्वात् मध्यभूता

विमर्शशक्तिः मायादशायां स्वस्वरूपं गूहयित्वा प्राणशक्तिभूमिीकृत्य अवरोहक्रमेण बुद्धिदेहादिभुवमधिशयाना नाडीसहस्रसरणिमनुसृता सती तत्रापि पलाशपर्णमध्यशाखान्यायेन आब्रह्मरन्ध्रादधोवक्त्रपर्यन्तं प्राणशक्तिब्रह्माश्रयमध्यमनाडीरूपतया प्राधान्येन स्थिता। तत एव सर्ववृत्तीनामुदयात् तत्रैव च विश्रामात्। एवं भूतापि एषा पशूनां निमीलितस्वरूपैव स्थिता इत्युक्तम्। उक्तं च शिवसूत्रविमर्शिन्यां—"या सा शक्तिः परा सूक्ष्मा निराचारेति कीर्तिता। हृद्बिन्दुं वेष्टयित्वान्तः सुषुप्तभुजगाकृतिः॥ तत्र सुप्ता महाभागे न किंचिन्मन्यते उमे। चन्द्राग्निरविनक्षत्रैः भुवनानि चतुर्दश। क्षिप्तोदरेतु या देवि विषमूढेऽवस्था गता" इत्यादिना। तथा च तादृश परा शक्तेः संकोचप्राधान्येन देहादौ कुण्डलिनीरूपतया अवस्थितत्वात्। गुरुमुखात् शिवयोगरूपोपायं ज्ञात्वा तादृशकुण्डलिनीशक्तेः विकासः कार्यः। तद्विकासे तु

संसा.... ...व एव भवति। अत एव "गुरुरूपाय:".... । अन्यत्रापि प्रत्यभिज्ञाहृदयसूत्रे "विकल्पक्षय शक्तिसंकोच विकास-वाह-च्छेदाद्यन्तकोटिनिभालनादय इह उपाया:" इति। प्रागुक्त पंचविधकृत्यकारित्वानुसरणेन कुण्डलिनीशक्तेर्विकासो जायते। विकल्पक्षयादीन्यपि उपायान्तराणीति ज्ञातव्यम्। विकल्पक्षमस्य अग्रिमसर्वेषामुपायानां मूर्धन्यत्वात् प्रथममुक्तं शब्दज्ञानानुपाति वस्तुशून्यरूपस्य विकल्पस्य स्वस्वरूपस्थिति प्रतिबन्धकत्वात्। तत्तिरोधानेन शक्तिविकासो जायते। शक्तिसंकोचो नाम इन्द्रियद्वारेण प्रसरन्त्या एव शक्तेः आकुञ्चन क्रमेणोन्मुखीकरणम्। अनेन उन्मुखीकरणेन शक्तिविकासो जायते। 'परां च खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ्पश्यन्ति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्त चक्षुरमृतत्वमिच्छन्" इति श्रुतेः। शक्तिविकासो नाम "अन्तर्लक्ष्यो बहिर्दृष्टिर्निमेषोन्मेषवर्जितः" इत्युक्तरीत्या अन्तर्निगूढायाश्शक्तेः खेचरीमुद्रया बहिःप्रसरणं वाहच्छेदः वामदक्षिणगतयोः प्राणापानयोश्छेदः आदिकोटिहृदयं अन्तकोटिर्द्वादशान्तः ब्रह्मरन्ध्र इति यावत्। तयोः मिलनं नाम चित्तनिवेशनेन परिशीलनम् इत्यादयः संकुचितविमर्शशक्तेः ....करणे उपायाः। अयमत्राशयः प्रबलशक्तिकः रोगादिवशात् क्षीणशक्तिकोऽपि व्यायामाभ्यासवशात् महतीं शक्तिं प्राप्नोति। तथा स्वलीलावशात् संकुचितशक्तिक सन् परमेश्वर एव संसारीत्युच्यते। पुनः शिवयोगसाधनवशात् विकासितशक्तिकः सन् परमेश्वर एव भवति। परमेश्वरस्य एतादृशहीनदशाप्राप्तिं प्रति स्वलीलया एव कारणत्वं

वाच्यम् । छत्रचामरवाहनादि संपद्युक्तस्यापि राज्ञः कदाचित् स्वलीलया पादचारित्वदर्शनात् । तथा च एतादृशशक्तिविकासस्यैव मोक्षत्वमिति सिद्धम् । न तु पराभिमतविस्मृतकण्ठचामीकरप्राप्तिवत् स्वस्वरूपप्राप्तेर्मोक्षत्वम् । अस्मन्मते बन्धरूपसंकोचस्यापि विचार्यमाणत्वे विमर्शशक्तिरूपत्वेन ज्ञायमानत्वात् तादृशशक्तिविकासस्यैव मोक्षत्वम् । स्वशक्तिविकासरूपमोक्षायेति स्वप्रभानन्दशिवाचार्यैरप्युक्तत्वात् । " तथाविधश्च अयं शक्तिदरिद्रः संसारी उच्यते । स्वशक्तिविकासेतु शिव एव " इति क्षेमराजेनाप्युक्तत्वाच्च । एतादृशउपायगर्भलिंगधारणदीक्षायाः तादृशमोक्षजनकत्वात् । " मोक्षार्थिनां मुक्तिहेतुर्लिंगधारणमीर्यते " इत्यादिना सूत्रकारेणैव लिंगपुराणे उक्तत्वात् । लिंगधारणनिष्ठ एव ब्रह्मनिष्ठा........" अमृतस्येति वाक्येन धारणं प्रतिपादितम् । तन्निष्ठा एव मनुजा अतिवर्णाश्रमे रताः ॥ ते एवं महात्मानो ब्रह्मनिष्ठा उदाहृताः " इति नीलकण्ठशिवाचार्येण । " तन्निष्ठस्य मोक्षोपदेशात् " इति सूत्रघटित तन्निष्ठपदस्य लिंगधारणनिष्ठपरकत्वमित्यंगीकृतत्वात् लिंगधारणनिष्ठागरिष्ठानां वीरशैवानां मोक्षस्य उपदिश्यमानत्वात् न प्रधानातिव्याप्तं जगज्जन्मादि कारणत्वलक्षणम् ।

सच्छब्दवाच्यं प्रधानमेव कुतो न भवति । स्थूलारुन्धती-न्यायेन तस्यापि सच्छब्दवाच्यत्वमस्तु इत्यत हेत्वन्तरमाह —

सू. हेयत्वावचनाच्च ॥ ८ ॥

हेयत्वस्य निषेधस्य अवचनात् अनुक्तेरित्यर्थः । ब्रह्मणः उपास्यत्वे हेयत्वस्य अवचनात् । " नोपास्यौ प्रकृतिजीवौ "

इत्यादिना प्रधानध्यानस्य हेयत्ववचनात् जगज्जन्मादिकारणत्वेन नोपास्यं प्रधानमिति सिद्धम् । "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति वाक्येन जगदभिन्नपरशिवाभेदस्य मुमुक्षुश्वेतकेतोर्ध्येयत्वेन विधानात् प्रधानस्य सच्छब्दवाच्यत्वं न सम्भवति । यथा अरुन्धतीं दिदर्शिषुः तत्समीपस्थ स्थूलतारां अरुन्धतीत्वेन ग्राहयित्वा तां निषिध्य पश्चादरुन्धतीं....यति तथा मुमुक्षोः प्रधानोपासनस्य वक्तुमशक्यत्वात् तद्विधायकप्रमाणाभावात् । "शिव एको ध्येयश्शिवंकरस्सर्वमन्यत्परित्यज्य" "ब्रह्मविदाप्नोति परम्" "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यादिना

त्वं ब्राह्मणस्त्वदुपधावनमेव कार्यम् ।
तद्ब्राह्मणैस्त्वदितरे नभवन्त्युपास्याः ।
न ब्राह्मणा न वरवर्णनिषेवणेन ॥
सम्भावयेम यदि नः प्रपदं प्रमाणम् ।

इति हरदत्ताचार्यउक्त्या च शिवेतरध्यानस्य मोक्षाहेतुत्वावगमाच्च न प्रधानं सच्छब्दवाच्यम् ॥

अथवा हेयत्वावचनात् । यदि प्रधानं सच्छब्दवाच्यम् । "स आत्मा तत्त्वमसीति" स्थूलारुन्धतीन्यायेन उपदिष्टं स्यात् । तदा स मुमुक्षुश्वेतकेतुस्तान्निष्ठो माभूदिति मुख्यमात्मानं उपदिदिक्षुः प्रधानस्य हेयत्वं ब्रूयात् । तथा हेयत्वस्य अवचनात् न सच्छब्दवाच्यं प्रधानम् । चकारः प्रतिज्ञाविरोध हेत्वन्तरद्योतकः । तथा च प्रधानस्य सच्छब्द-

वाच्यत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः विरोधापत्तेः । यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् " इत्यादि वाक्येन- एकविज्ञानात् सर्वविज्ञानप्रतिज्ञायाः ज्ञायमानत्वात् जडप्रधानस्य जडत् प्रपञ्चकारणत्वेऽपि चेतनकारणत्वासम्भवात् तद्ज्ञानेन सर्वज्ञानासम्भवा न सच्छब्दवाच्यं प्रधानम् ।

पुनरपि हेत्वन्तरमाह—

सू. 'स्वाप्ययात्' ॥ ९ ॥

स्वस्मिन् शिवलिङ्गे अप्ययो लय इत्यर्थः । तस्मान्नप्रधानं सच्छब्द- वाच्यम् । हंसोपनिषदि "लिंगे सुषुप्तिः पद्मत्यागे तुरीयम्" इति हृत्पद्मावच्छिन्नान्तरप्राणलिंगे सुषुप्तौ सर्वेषां जीवानां लय इति स्पष्टमुक्तम् ।

अपि च "यत्रैतत्पुरुषस्वपिति नाम सता सौम्य तदासंपन्नो भवति । स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वंह्यपीतो भवतीति" श्रुतावपि जगत्कारणं ब्रह्मैवेति ज्ञायते । स्वपितीत्यत्र अपिपूर्वकेतेः लयार्थकत्वात् । अचेतनप्रधाने चेतनजीवस्य लयासंभवात् । "सुषुप्तौ शंकरे लय इति" स्मृतेश्च । प्रधाने जीवाकर्षण सत्वा- भावाच्च सर्वजीवलयाधिष्ठानस्यैव परब्रह्मणः सच्छब्दवाच्यत्वमिति सिद्धम् । आत्मसंबंधित्वात् प्रधानमेव स्वशब्देनोच्यते इत्यत्राह—

सू.' गतिसामान्यात् ' ॥ १० ॥

गतेः जीवगमनस्य सामान्यात् । ईश्वरे सुषुप्तौ समन्वयात् । आत्मीयत्वात् स्वशब्देन प्रधाने गृह्यमाणे तस्याचेतनत्वात् चेतनगतेस्तत्र समन्वयस्यासंभवात् । "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेदनान्तरम्" इति श्रुतेश्च न प्रधाने जीवलयः। केचित्तु अस्य सूत्रस्य अर्थं अन्यथाव्याचक्षते । सर्वेषु वेदान्तेषु चेतन....तोस्सामान्यात् नाचेतनं प्रधानं जगत्कारणमिति अस्य अर्थस्य 'तत्तु समन्वयादि'ति सूत्रेणैव प्रतिपादितत्वात् पुनस्तादृशार्थवर्णने पौनरुक्त्यापत्तेः ॥.... प्रधानं न सच्छब्दवाच्यम् ।

सू. श्रुतत्वाच्च ॥११॥

एवमेवेमास्सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढा इति ब्रह्मण्येव प्रत्यहं सुषुप्तावस्थायां जीवगमनस्य श्रुतत्वादित्यर्थः ॥

एतावता प्रथमसूत्रोक्त जिज्ञास्यब्रह्मणः जगज्जन्मादिकारणत्वलक्षणं अचेतनप्रधाने नातिव्याप्तमित्युक्तम् । अतः परं चेतनजीवे नातिव्याप्तिरिति दर्शयति । अतिव्याप्तिश्च "विज्ञानाध्येव खल्विमानि भूतानि जायन्ते" इत्यादिना जगज्जन्मादिकारणत्वस्य जीवगतत्वावगमात् भवत्यतो स एवोपास्य इति प्राप्ते आह—

६. आनन्दमयोऽभ्यासात् ॥ १२ ॥

अन्नमयं प्राणमयं मनोमयं विज्ञानमयं चानुक्रम्य "तस्माद्वा एतस्मात् विज्ञानमयादन्यो अन्तरात्मा आनन्दमयः" इति आनन्दमयस्य सर्वान्तरतमत्वस्य श्रूयमाणत्वात् यस्य आनन्दमयत्वं तस्यैवोपास्यत्वमिति ज्ञायते। न ह्यनादि स्वाभाविक मायापाशबद्ध तापत्रयानलदन्दह्यमान नानाशरीरप्रवेशनिर्गमनविशिष्टस्य जीवस्य आनन्दमयत्वं वक्तुं शक्यते।

ननु "तस्य प्रियमेव शिरः" इत्यादिना आनन्दमयस्य प्रियाद्यवयव योगस्य ज्ञायमानत्वात् विकारार्थे मयट्श्रवणाच्च निरवयवनिर्विकारस्य परब्रह्मणः कथमानन्दमयत्वमिति चेन्न। अभ्यासात् पुनः पुनः श्रवणात्। शिवस्य परब्रह्मण एव बहुशो वेदान्तेषु आनन्दशब्द-प्रयोगदर्शनात्। आनन्दमयं प्रस्तुत्य "तदप्येष श्लोको भवति", "रसो वै सः"। रसं ह्येव अय लब्ध्वा आनन्दी भवति। "आनन्दो ब्रह्मेति व्यजानात" "आनन्दात्मा" इत्यादिना परशिवस्यैव आनन्द-शब्दस्य निर्णीतत्वात्। आनन्दमयस्य अन्यस्य कस्यचिदनुपदेशाच्च न यस्य कस्यचित् परब्रह्मातिरिक्तस्यानन्दमयत्वं संभवति। न च प्रियाद्यव-यवयोगात् जीवस्य आनन्दमयत्व सम्भव इति वाच्यम्। अवयवा-वयविभावस्य वास्तवस्यात्र अविवक्षितत्वात्। किन्तु पक्षरूपक-ल्पनामात्रत्वात्। विज्ञानमयादीनां पक्षपुच्छाद्यवयवयोगासंभवात्।

ननु निर्विकारस्य कथमानन्दविकारत्वमित्यत्राह —

सू. विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १३ ॥

मयट् प्रत्ययस्य विकारार्थकत्वात् परब्रह्मणः निर्विकारत्वात् परब्रह्मणः न आनन्दमयत्वमिति चेन्न। प्राचुर्यात् स्वार्थिक मयट् प्राचुर्यात्। यद्यप्यन्नरसमयः इत्यत्र विकारार्थसंभवोऽस्ति तथापि प्राणमयादिषु न विकारार्थत्वम्। प्राणादीनां तद्विकारार्थत्वासंभवात्। विकारभूतस्यान्यस्य तत्राप्रतिपादनाच्च। "अन्यो अन्तरात्मा प्राणमयः" इत्यादिना प्राणमयमात्मानमुपदिश्य "तदप्येष श्लोको भवति' इति प्रतिज्ञाय "प्राणं देवा अनुप्राणन्तीति" केवल प्राणादि-शब्दा एव पठ्यन्ते न मयडन्ताः। तस्मात् स्वार्थ एव मयट् न विकारार्थे।

किंच न विकारार्थे मयडित्याह—

सू. तद्धेतु व्यपदेशाच्च ॥ १४ ॥

"को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति" इत्यत्र आनन्दमयस्य सर्वजीवानन्दहेतुत्वश्रवणात् सर्वजीवप्राप्यत्वं ज्ञायते—यथा लोके पुरुषस्वविद्ययैव परविद्याहेतुर्भवति स्वधनेन परधनहेतुर्भवति सूर्यस्वप्रकाशेन अन्यप्रकाशहेतुर्भवति तथा परमेश्वरः स्वस्वरूपानन्देन जीवानन्दहेतुर्भवति। तथा च तद्धेतोः जीवानन्दहेतोः परमेश्वरस्य व्यपदेशात् कथनादित्यर्थः।

यद्वा सः आनन्दमयः हेतुर्यस्य जीवानन्दस्य सः तद्धेतुः तस्य व्यपदेशादिति सूत्रार्थः। तथा च आनन्दविकारस्य जीवानन्दहेतुत्वा-

संभवात् न विकारार्थे मयट् स्वार्थ एवेति। न च "ब्रह्मपुच्छं प्रतिष्ठा" इत्युक्त पुच्छब्रह्मण एव आनन्दहेतुत्व व्यपदेशः। नानन्दमयस्येति वाच्यम्। अन्नमयादिष्वनन्तरश्लोकस्य पुच्छब्रह्मविषयत्वादर्शनात्। तस्यैष एव शारीर आत्मा यः पूर्वस्य" इत्यानन्दमयस्यैव परामर्शात् आनन्दमयस्य पुच्छब्रह्माभिन्नत्वात्। अवयवावयविभावस्यामुख्यत्वात्।

अथवा "ब्रह्मपुच्छं प्रतिष्ठा" इत्यत्र ब्रह्मशब्देन "ब्रह्मसंस्थो अमृतत्वमेति" इत्यत्रेव प्रणवस्याभिप्रेतत्वात् तस्य तद्वाचकत्वात् प्रतिष्ठात्वं "एतद्वै सत्यकाम परंचापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैकतरमन्वेति" "एतदालम्बनं श्रेष्ठं एतदालम्बनं परम्" इत्यादिना प्रणववाच्यस्य आनन्दमयत्वश्रवणात्। इतश्च परब्रह्म एवानन्दमयः इत्याह—

सू. "मान्त्रवर्णिकमेव गीयते" ॥ १५॥

"ब्रह्मविदाप्नोतिपरम् इत्युपक्रम्य "सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्" इत्यत्र मन्त्रवर्णोदितं यत्प्राप्यत्वेन परब्रह्म तदेवैकं "आनन्दमयमात्मानमुपसंक्रामति" इति ब्राह्मणे गीयते निर्दिश्यते। अन्यस्य प्राप्यस्य अश्रवणात्। श्रुतपरित्यागेन अश्रुतकल्पनाया अन्याय्यत्वात्। आनन्दो ब्रह्मेति व्यजानात् "इति विज्ञेयत्वेन निर्दिष्टस्यैव आनन्दमयमात्मानमुपसंक्रम्य" इत्यानन्दमय-

शब्देनैव प्राप्यत्वविधानात् । आनन्दमय परशिवलिंगमेव हृदम्बुजे-प्राप्यं धार्यमित्यर्थः ।

इतश्च आनन्दमयः परमात्मैवेत्याह—

सू. "नेतरोऽनुपपत्तेः" ॥ १६ ॥

इतरः जीवः आनन्दमयः न भवति। कुतः अनुपपत्तेः । "तदप्येषश्लोको भवति" इत्युक्त्वा "सोऽकामयत बहुस्यां प्रजायेयेति" इत्यादिना सर्वकारणत्व सर्वात्मकत्वादीनां धर्माणांमुपदिश्यमानत्वात् । तादृशधर्माणां जीवेऽनुपपन्नत्वात् नानन्दमयो जीवः ।

किंच जीवस्यानन्दमयत्वोक्ते "तस्माद्वा एतस्माद्विज्ञानमयादन्यो अन्तरात्मा आनन्दमयः" इति विज्ञानशब्दवाच्य जीवान्यत्वप्रति-पादकश्रुतेरप्रामाण्यं स्यादित्याह—

सू. "भेदव्यपदेशात्" ॥ १७ ॥

तथा च उक्तश्रुतौ आनन्दमयस्य जीवभिन्नत्वकथनात् न जीवस्या-नन्दमयत्वम् । नन्वत्र विज्ञानशब्देन अन्तःकरणं गृह्यते इति चेन्न । "व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः" इति सूत्रेण विज्ञान-शब्दस्य जीववाचकस्य वक्ष्यमाणत्वात् ।

ननु सत्वगुणस्य आनन्दरूपस्य प्रधानेऽपि विद्यमानत्वात् प्रधानस्यै-वानन्दमयत्वं किं न स्यादिति चेत् आह—

सू. "कामाच्च नानुमानापेक्षा" ॥ १८॥

अनुमीयते इत्यनुमानम् । सांख्यपरिकल्पितमचेतनं प्रधानमित्यर्थः । तस्य अपेक्षा आनन्दमयवाक्ये नास्ति । कुतः कामात् । "सो कामयत बहुस्यां प्रजायेयेत" कामनाश्रवणात् तथा च कामस्य इच्छया अचेतने असंभवात् न प्रधानस्यानन्दमयत्वम् ।

किंच न प्रधानजीवयोरानन्दमयत्वमित्याह—

सू. "अस्मिन्नस्य च तद्योगं शास्ति" ॥ १९ ॥

अस्मिन् आनन्दमये प्रकृतपरमशिवे अस्य जीवस्य च शब्देन प्रधानप्रपंचयोरपि तद्योगं नीरक्षीरवत् सिन्धुसैन्धववत् तस्य परशिवस्य योगं ऐक्यं शास्ति प्रतिपादयतीत्यर्थः ॥ "यथा नद्यः स्यन्दमानास्समुद्रे अस्तं गच्छन्ति । नामरूपे विहाय । तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैत दिव्यम्" "ब्रह्म वेद ब्रह्मैव भवति" "त त्वमसि" "अहं ब्रह्मास्मि" इत्यादि श्रुतिषु परशिवभावापत्तेर्मुक्तित्वेनोपदिश्यमानत्वात् जीवब्रह्मणोः भिन्नत्वाराध्याराधकत्व व्यापकत्वाव्यापकत्व किंचिज्ज्ञत्व सर्वज्ञत्व नियम्यनियामकत्वादि धर्माणां परस्परविरुद्धत्वेऽपि स्वस्वाभाविकशक्तिसंकोचरूपाख्यातेः उक्त उपायादिभिः विकसनदशायां तादृशाख्यातिनिवृत्या तन्निबन्धन किंचिज्ज्ञत्व सुखित्व दुःखित्वादि निवृत्तेः परशिवभावापत्तिरूपमोक्षो भवति । किंच यदाह्येवैष एतस्मिन्नदृश्येनात्मेऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽथ सोऽभयं

गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवति"। इत्यत्र जीवस्य अभयप्राप्ति शास्ति शास्त्रम्। न च शिवयोगसाधनाभ्यासात् अन्यतो मोक्षः संभाव्यते। तस्मादानन्दमयः परशिव एवेति सिद्धम्।

तत्र केचित्—रज्वारोपितसर्पवत् ब्रह्मणि जीवत्वस्यारोपितत्वात् मुक्तदशायां स्वकण्ठाभरण-दशमीविवेकसन्धानादिवत् जीवभावमापन्नस्य ब्रह्मणः स्वस्वरूपज्ञानमेव मोक्ष इति वदन्ति। अस्मिन् पक्षस्य श्रुत्यादि विरुद्धत्वेन पूर्वं निराकृतत्वात् श्रौतमुमुक्षुभिर्नादरणीयम्। ब्रह्मविदाप्नोति परम्" इत्याद्युपक्रमसिद्धवेद्यत्वप्राप्यत्वादि विरोधात्। "सोऽश्नुते सर्वान् कामान्" इति अनवाप्त सकलकामानां शिवोपासकानां सर्वैकमावाप्तिविरोधाच्च ब्रह्मणः अज्ञानाश्रयत्वे सर्वज्ञत्वादिभंगप्रसंगः। न च चन्द्रकलङ्कन्यायेन अज्ञानाश्रयत्वं संभवति। ब्रह्मणः निरंशत्वात्। यदि तयोरविरोधः। तत्वज्ञानादपि अज्ञाननिवृत्तिर्न स्यात्। "अविरोधितया कर्म नाऽविद्यां विनिवर्तते" इति तैरेवोक्तत्वात्। अतः स्वस्वरूपज्ञानमेव मोक्ष इति वक्तुं न शक्यते। भ्रमरकीट-शुक्तिसलिलादिषु स्वाभाविकधर्मनिवृत्या भ्रमरत्व मौक्तिकत्ववत् स्वाभाविकजीवभावनिवृत्या शिवभावप्राप्तिर्मोक्ष इति सिद्धम्।

किंच शिवस्य परब्रह्मणः स्वाभाविकशक्त्यनंगीकारे ब्रह्मणः प्रकाशरूपत्वेऽपि स्फटिकमणिमुकुरादेः प्रकाशवत् सच्चिदानन्दात्मक स्वस्वरूप-

परामर्शाभावात् जडत्वापत्तेः दुरुद्धरत्वात् । ज्ञानक्रियासामरस्यापन्न स्वाभाविकविमर्शशक्तिः ब्रह्मणः अस्तीत्यंगीकरणीयम् । " सन् हृदय-प्रकाशो भवनस्य क्रियाया भवति कर्ता । सैव क्रियाविमर्शः स्वस्था क्षुभिता च विश्वविस्तारा ॥" इति । सारस्वतसूत्रात् भवनस्य भूसत्तायामिति धातोरर्थस्य क्रियायाः हृदयप्रकाशस्य कर्तुत्वावगमात् । "हृदयं तद्विजानीयात् विश्वस्यायतनं महत्" इति श्रुतेः चराचरप्रपंच-भित्तिभूतात्मप्रकाशस्य हृदयत्वावगमात् । तादृशहृदयप्रकाशकर्तुक क्रियायाः स्वस्थत्वे अविभागपरामर्शदशायां चिदानन्दमात्रविश्रान्तत्वे अस्मि–प्रकाशे–नन्दामीति स्वस्वरूपविमर्शवत्वं ब्रह्मणः । अन्यथा जडत्वप्रसंगात् । अतः तादृशज्ञानक्रियासामरस्यात्मका विमर्शशक्तिः क्षुभिता चेत् विभागपरापर्शदशायां सृष्ट्युन्मुखा यदा भवति तदा विश्व-विस्तारा शिवादिभूम्यन्त षट्त्रिंशत्तत्वात्मक विचित्रविश्वस्फुरणमयी-जायते । अर्थात् पूर्वोक्तरीत्या त्रिगुणात्मकमायाशक्तेः वृश्चिक-धूमोद्गम लोमनखादीनां गोमयानलसचेतनादि परिकल्पितत्ववत् स्वविमर्शा-परपर्याय इच्छाशक्तेः परिकल्पितत्वात् । तादृशमायाशक्तेः त्रिगुणा-मकत्वात् सर्वप्रमाणप्रमेयव्यवहाराणां नानुपपत्तिः ।

अथ च "दृश्यतेत्वग्रया बुध्या" इति सूत्रेण "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुत्या च ज्ञानक्रियागर्भइच्छाशक्तिर्ज्ञायते श्रुतिस्थ चकारस्य अनुक्तइच्छाशक्त्यर्थ-कत्वात् । तथा च ज्ञानबलक्रियाज्ञानशक्ति क्रियाशक्ति गर्भा स्वाभा-

त्रिकी अनाद्यनन्ता इच्छाशक्तिः विविधैव अनन्तशक्तिरूपा अत एवास्याः परत्वं श्रूयते । “ईशनीभिर्जननीभिः परमशक्तिभिः” इत्यादि वाक्येन अन्यत्र अनन्तविधा इति श्रूयते । अथवा स्वानुभवैकसिद्धा न प्रत्यक्षादिप्रमाणसिद्धा इति दर्शनाय श्रूयते इत्युक्तम् । पराभिमतार्थे चकारस्य सांगत्याभावात् । न तादृशार्थो शक्तिपातपवित्रित हृदयैरादरणीयः । उक्तं च स्पन्दप्रदीपिकायां— “स्वभावादेकरूपापि नानात्वं प्रतिपद्यते । ज्ञानस्य शक्तिसंकल्पैर्लक्ष्मीश्चिन्तामणेरिव” इति । उक्तं च कक्ष्यास्तोत्रेऽपि “ज्ञानक्रियादिगर्भेच्छा शक्तिर्यः प्रसरात्मकः । संकल्पोक्तस्सवुन्मेषः प्रोक्त ह्येतत्स्वतन्त्रके” इति । “इच्छास्यैका विभोःशक्तिः प्राग्विधाज्ञक्रिया विधा”। अपि च “या सा शक्तिर्जगद्धातुः कथिता समवायिनी । इच्छात्वं तस्य सा देवी शिसृक्षोः प्रतिपद्यते ॥ सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु । एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् । ज्ञापयन्ती जगत्यन्ते ज्ञानशक्तिर्निगद्यते ॥ एवं भवत्विदं सर्वमिति कार्योन्मुखी यदा । जाता तदैव सा तद्वत् कुर्वन्त्यपि क्रियोच्यते ॥ एवमेषा द्विरूपापि पुनर्भेदैरनेकताम् ॥” इति उक्तं च रहस्यस्त्रोत्रेषु—“शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते । शक्तयश्च जगत्सर्वं शक्तिमांस्तु महेश्वरः” ॥ इति ।

ननु पदार्थद्वयमुच्यते इत्यनेन शक्तिशक्तिमतोर्भेदस्यैव निरूपितत्वात् कथं शिवाद्वैतनिर्वाह इति चेन्न । तद्ग्रन्थस्य विभागपरामर्शदशावच्छेदेन भेदपरकत्वात् । अविभागपरामर्शदशायां अभेदस्य जागरूकत्वात्

आद्यन्तकोट्योर्विचार्यमाणत्वे अभेदानुभवस्य प्रसिद्धत्वात्। न च भेदाभेदयोर्विरोध इति वाच्यम्। वदतो व्याघातात्। भेदाभेदयोर्विरोध इति विरुद्धोर्भेदाभेदज्ञाने विषयित्वसंबंधेन भेदाभेदाश्रयत्वस्य सत्वात्। अन्यथा विरोधस्फूर्तेरसंभवात्। तस्मात् भेदाभेदयोर्विरोधो न सार्वत्रिक इति वक्तव्यम्। अत्र्वंतद्विचारः।

"तदनन्यत्वमारंभणशब्दादिभ्यः" इति सूत्रार्थविचारे भेदाभेदयोर्विरोधपरिहारो निपुणतरं दक्ष्यते। तथा च पूर्वोक्तस्वाभाविकेच्छाशक्ति परिकल्पितमायाप्रमातृ जीवशिवभावरूपयोगस्य शासकत्वात्। अभयं प्रतिष्ठां विन्दते अथ "सोऽभयं गतो भवति" इत्यादि शास्त्रस्य आनन्दमय परशिव एवोपास्यो नत्वितरः। एतावत्पर्यन्तं पंचकृत्यकारित्वेन परशिवलिंगस्यैव जीवोपास्यत्वमित्युक्तम्। अतः परं सूर्यादिदेवोपाश्यत्वमपि तस्यैवेत्याह। तथा अक्षिण्यादावपि शिवलिंगादिरूपेण स्थितस्यैवोपास्यत्वमित्याह च....।

सू. अन्तस्तद्धर्मोपदेशात् ॥ २० ॥

ननु "य एष अन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवाक्षिणी इत्यत्र य एष अक्षिणि पुरुषो दृश्यते" इत्यत्र च उपास्यवस्तुनो आधारश्रवणात्। हिरण्यश्मश्रुरित्यादिना रूपश्रवणाच्च। "अशब्दमस्पर्शं अरूपमव्ययम्।" इत्यादिना परशिवस्य रूपा-

भावावगमात् । तस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इत्यादिना स्वमहिमप्रतिष्ठितस्य परशिवस्य अनाधारत्वस्य श्रुतत्वात् । साधार सरूप एव यः कश्चित् परशिवातिरिक्तः उपास्य इति चेन्न । "अन्तस्तद्धर्मोपदेशात्" तत्र परशिवस्वधर्माणां स एष सर्वेभ्यः प्राप्यभ्य उदितः" इत्यत्र "ययात्मा अपहतपाप्मा" इत्यादौ च "सैवर्क्तत्साम" इत्यादिना च सर्वपापाभाव सर्वात्मकत्वादीनां अन्तरुपदिश्यमानत्वात् एतादृश धर्माणां परशिवासाधारणत्वात् । चक्षुरन्तः पुरुषस्य परशिवातिरिक्तस्य सर्वात्मकत्वासंभवात् । आदित्य-मण्डलान्तर्वर्तिनः परशिवातिरिक्तस्य कस्यचित् सर्वपापरहितत्वासंभवात् । परशिवस्य सर्वकारणत्वात् सर्वात्मकत्वात् सर्वपापरहितत्वाच्च परशिव-लिंगस्यैवोपास्यत्वमिति सिद्धम् । परशिवस्य सर्वशक्तित्वात् भक्तानुग्रहार्थं घृतकठिन्यन्यायेन लीलाविग्रह परिग्रहसंभवात् । न श्रुत्युक्तरूपाद्युपन्यासो अन्यमुपास्यं बोधयति । इतश्च यथा पूर्वं जीवस्य जीवोपास्यत्वं भेदव्यपदेशादित्यनेन सूत्रेण निराकृतम् । तथा सूर्यादीनामपि सूर्याद्युपास्यत्वं न संभवतीत्याह —

सू॰ 'भेदव्यपदेशाच्चान्यः' ॥ २१ ॥

"य आदित्ये तिष्ठन् आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यश्शरीरं य आदित्यमन्तरो यमयत्येष त आत्मा अन्तर्याम्यमृतः" इत्यादिना आदित्यादिशरीराभिमानिभ्यो देवेभ्यः अन्यस्य परशिवस्य

सर्वान्तर्यामिणः व्यपदिश्यमानत्वात् । तैरपि परशिव एवोपास्यः। अत्र देवैरप्युपास्यत्वं परशिवस्यैवेति सिद्धे किं वक्तव्यं जीवोपास्यत्वं तस्यैवेति उपरिष्टादाशयः ।

ननु "अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि हवा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशोह्येवैभ्योजायानाकाशः परायणम्" इत्यत्र आकाशशब्दस्य भूताकाशपरत्वात् तस्यैव लोकवेदयोः प्रसिद्धत्वात् । अवकाशदानेन भूतान्तरुत्पत्ति कारणत्वाच्च । "सं ब्रह्म" आकाश आत्मा "इत्यादौ आकाशस्यैव ब्रह्मत्वोपदेशात्" आत्मनः आकाशः संभूतः "इत्याद्युक्त आत्मजन्यत्वस्य आकाशस्य औपचारिकत्वात् जगज्जन्मादिकारणं भूताकाश एवेति चेन्न इत्यत्र हेतुमाह—

सू. "आकाशस्तल्लिङ्गात्" ॥ २२ ॥

अत्राकाशशब्दवाच्यशिव एव भवति । न भूताकाशः तल्लिंगात् । तस्य परशिवस्य जगज्जन्मादिकारणत्वादिलिंगात् । अचेतनभूताकाशे ईक्षणपूर्वकजगज्जन्मादिकारणत्वासंभवात् । आकाशाद्वायुरित्यादिश्रुतावपि आकाशाद्यनुप्रविष्ट ईशानादिसद्योजातान्त पंचब्रह्मात्मक परशिवकारणत्वस्य श्रूयमाणत्वात् ।

किं च "सर्वाणि ह वा इमानि भूतानि" इत्यादिना उक्तजगदुभयकारणत्वस्य जडभूताकाशे असंभवात्। आकाशशब्दवाच्यं परं ब्रह्मैव धार्यं धेयमिति सिद्धम्। प्राणस्यापि तत्र तत्र जगज्जन्मादिकारणत्वस्य श्रूयमाणत्वात्। प्राणशब्दवाच्यत्वमपि ब्रह्मण इत्याह—

सू. "अत एव प्राणः" ॥ २३ ॥

"प्राणाध्येव खल्विमानि भूतानि जायन्ते" इति श्रुत्युक्तप्राणशब्दो न प्राणवायुपरः। अत एव "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इत्याद्युक्तसर्वभूतोद्गमनप्रवेशनलिंगात् ब्रह्मैव प्राणशब्दवाच्य इत्यर्थः ॥

ज्योतिश्शब्दवाच्यत्वमपि ब्रह्मण एवेत्याह—

सू. "ज्योतिश्चरणाभिधानाम्" ॥ २४ ॥

यद्यपि "अथ यदतः परो दिवो ज्योतिर्दीप्यते" इत्यादिना ज्योतिः पदवाच्यस्य द्युमर्यादत्वश्रवणात् सर्वगतस्य ब्रह्मणः द्युमर्यादत्वासंभवात् भौतिकज्योतिषः प्रसिद्धत्वाच्च सूर्यादेः ज्योतिः शब्दवाच्यत्वं भासते। तथापि चरणाभिधानात्। "पदोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि" इत्यस्मिन् पूर्ववाक्ये यत्त्रिपाद्ब्रह्म निर्दिष्टं तदेव। "यदतः परः" इत्यत्र यच्छब्देन परामृश्यते द्युसंबंधस्य उभयत्रप्रतीतेः ज्योतिश्शब्दो ब्रह्मण्यपि वर्तते। "तद्देवाज्योतिषां ज्योतिरायुर्हो-

पासते" इत्यादि श्रुतिभिः सर्वगतस्यापि ब्रह्मणः उपासनार्थं द्युमर्यादत्वं न विरुध्यते। तस्मात् चरणाभिधानात् ज्योतिश्शब्दवाच्यं परं ब्रह्म भवतीत्यर्थः।

ननु "गायत्री वा इदं सर्वं भूतं यदिदं किंच" इति पूर्ववाक्ये गायत्र्याख्यस्य छन्दसः सर्वात्मकत्वाविधानात्। तदेव ज्योतिश्शब्देन उपदिश्यते इत्याशंक्य निराकरोति—

५. छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पण निगदात् तथा हि दर्शनम् ॥ २५ ॥

पूर्ववाक्ये छन्दसः अभिधानात् न परशिवः ज्योतिश्शब्दवाच्यः इति चेन्न। तथा चेतोर्पणनिगदात्। गायत्र्याख्यछन्दोद्वारा चेतसि हृदयांभोजे अर्पणं परमशिवलिंगस्य धारणमित्यर्थः। "चेतोऽर्पणधारणं च हृदयांभोजमध्यमे" इति नीलकंठशिवाचार्योक्तेः तस्य धारणस्य "गायत्री वा इदं सर्वं" इत्यनेन निगदात् कथनात् इत्यर्थः। तथा हि दर्शनम्। यथा संवर्गविद्यायां "ते वा एते पंचान्ये पंचान्ये दशसंतस्तत्कृतम्" इत्युपक्रम्य सैषा विराट् इत्यत्र संख्यासामान्यात्। अर्थान्तरे प्रयुज्यमानस्यं छन्दोविधायिनश्शब्दस्य दर्शनम्। तथा संख्यासामान्यात् गायत्रीशब्देन साक्षात् ब्रह्मैव प्रतिपाद्यते। अक्षरावच्छिन्न गायत्र्याख्य छन्दसः सर्वात्मकत्वादिधर्मासंभवात्। संभवति च "पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि" चतुष्पदो ब्रह्मणः

षडक्षरैश्चतुर्भिः पादैः चतुष्पदया गायत्र्या संख्यासादृश्यम्। अतः गायत्रीशब्देत परमशिव एव निर्दिष्ट इति तस्यैव सर्वात्मकत्वसिद्धेः।

पूर्वस्मिन् वाक्ये प्रकृतं ब्रह्मैवेत्याह—

सू. भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥

भूतपृथिवी शरीरहृदयैः "सैष षट्पदा षड्विधा गायत्री इति व्यपदेशः केवलस्य छन्दसः नोपपद्यते। ब्रह्मणः भूतादि पादव्यपदेशस्य उपपन्नत्वात्। पूर्वस्मिन् वाक्ये प्रकृतं ब्रह्म, तदेव ज्योतिर्वाक्येऽपि यत्संबन्धात् प्रत्यभिज्ञायमानं परामृश्यते।

ननु "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इत्यत्र यत्संबन्धित्व प्रत्यभिज्ञानात्। "अथ यदतः परो दिवो ज्योतिर्दीप्यते" इत्यत्र दिवः परत्वद्योतनात्, कथमुभयोर्वाक्ययोः परमेश्वरपरत्वं इत्याशंकायामाह—

सू. उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २७ ॥

उपदेशस्य "त्रिपादस्यामृतं दिवीति" सप्तम्यादौ द्यौरधिष्ठानत्वेन कथनस्य "यदतः परो दिवो ज्योतिरिति" वाक्ये दिवः परत्वस्य ज्योतिषः कथनस्य च भेदात् न यत् पूर्वस्मिन् वाक्ये प्रकृतं ब्रह्म तदेव ज्योतिर्वाक्ये प्रत्यभिज्ञायते इति चेन्न। उभयस्मिन् पंचम्यन्ते सप्तम्यन्ते च प्रत्यभिज्ञानस्य अविरोधात्। पूर्वापरमध्यपरा-

मर्शविरोधाभावादित्यर्थः । यथा लोके सौधाग्रे मयूरः सौधाग्रात् परो मयूर इति । अतः परमेव ब्रह्म ज्योतिश्शब्दवाच्यमिति सिद्धम् ।

"अत एव प्राणः" इति सूत्रेण प्राणशब्दस्य परशिवपरत्वमुक्तम्। तथापि अनेकलिंगदर्शनात् अनेकोषां उपास्यत्वं माभूदित्याशयेन आह—

सू. प्राणस्तथानुगमात् ॥ २८ ॥

यद्यपि "मामेव विजानीहि" "इदं शरीरं परिगृह्योत्थापयति" "न वाचं विजिज्ञासीत् वक्तारं विद्यात्" इति वाक्यत्रयेण देवेन्द्र, प्राण, जीव, लिंगानां निर्दिश्यमानत्वात् प्राणशब्दो मुख्यप्राणाद्यर्थपरः इति ज्ञायते । तथापि प्राणः ब्रह्मैव ; कुतः तथानुगमात् पौर्वापर्येण विचार्यमणे वाक्ये ब्रह्मप्रतिपादने पदानां समन्वयस्य उपपन्नत्वात् "यं त्वं मनुष्याय हिततमं मन्यसे" इत्युक्त हिततमत्वं ब्रह्मप्राप्तेरन्यस्य नोपपद्यते "तं मामायुरमृतमित्युपास्व" "स वा एष प्राण एव प्रज्ञानन्दो अजरो अमृतः इत्याद्युक्त आनन्दाजरामृतप्रज्ञात्मत्वादीनां परशिवातिरिक्तमुख्यप्राणादावसंभवात् प्राणशब्दोऽत्र ब्रह्मपरक एव ।

पुनराशंक्य परिहरति—

सू. न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंध भूमाह्यस्मिन् ॥ २९ ॥

न प्राणशब्दो परशिवपरः कुतः वक्तुः इन्द्रस्य आत्मोपदेशात् । "मामेव विजानीहीति" प्रतर्दनं प्रति स्वात्मनः उपदेशात् ।

" आनन्दो अजरो अमृतः" इत्याद्युपसंहारोक्त आनन्दत्वादिधर्माणां तस्मिन्नेव देवताविशेषे कथंचिन्नेतव्यत्वात् इति चेन्न। हि यस्मात् अस्मिन् अध्याये अध्यात्म संबंधभूमा परमशिवसंबंध बाहुल्यं लक्ष्यते तस्मादित्यर्थः। तथा च आदिमध्यावसानेषु परमशिवसंबंधस्यैव बाहुल्येन प्रतिपाद्यमानत्वात् ब्रह्मण एव प्रथमतरं हिततमत्वोपन्यासेनोपक्रान्तत्वाच्च, न देवताविशेषस्य विग्रहवतः प्राणशब्दपरत्वम्।

ननु कथं तर्हि " मामेव विजानी हि " इति वक्तुरात्मोपदेश इत्यत्राह—

सू. शास्त्रदृष्ट्यातूपदेशो वामदेववत् ॥ ३० ॥

वामदेववत् यथा वामदेवः "अनेन जीवेन आत्मनानुप्रविश्य नामरूपे व्याकरवाणीति" शास्त्रदृष्ट्या सर्वजगत्स्वरूपं परमेश्वरं पश्यन् " अहं मनुरभवं सूर्यश्च " इति सर्वात्मकत्वं स्वस्योपदिष्टवान्, तथा मामेव विजानीहीत्युपदेशः शिवयोगाभ्यासपाटवेन देवताविशेषस्य शिवभावमापन्नस्य " मामेव विजानीहि " इति " स्वात्मनस्सर्वात्मकत्वेनोपदेशो न विरुध्यते।" यत्र नान्यत् पश्यति नान्यत् श्रृणोति नान्यद्विजानाति " इति श्रुत्यनुसारेण भ्रमरकीटवच्छिवोपासनया शिवत्वापन्नभक्तानां वस्तुतः शिवस्वरूपेण सर्वस्य ज्ञायमानत्वात्। शिवातिरिक्तस्य कस्यचित् गगनकुसुमायमानत्वात् सर्वं शिवमयं ज्ञात्वा मामेव विजानीहीत्युपदेशः।

किं च कृष्णावतारे अर्जुनं प्रति "वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः । ममैवांशो जीवलोको जीवभूतस्सनातनः ॥" इत्यादीनि यथा शिवात्मत्वदृष्ट्या उपदिदेश तद्वदिन्द्रोपदेशो न विरुध्यते इति भावः ।

"आनन्दो अजरो अमृतः" इत्याद्युपसंहारोक्त आनन्दत्वाजरत्वामृतत्वादीनां धर्माणां परशिवासाधारणत्वात् उपक्रातार्थजालस्य परशिवविषयकत्वेन सुदृढं प्रतिपादयितुमाह—

सू. जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३१ ॥

जीवमुख्यप्राणलिङ्गात् "वक्तारं विद्यात्" "प्राण एव प्रज्ञातेदं शरीरं परिगृह्य उत्थापयति" इत्यत्र जीवमुख्यप्राणप्राणयोः लिङ्गाद्धेतोः जीवमुख्यप्राणावेव उपास्यौ न परशिव इति चेत् न आश्रितत्वात् । "न प्राणेनापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवति यस्मिन्नेतावुपाश्रिताविति" प्राणस्यापानस्यापि परमशिवाधीनत्वात् यस्मिन्नेतावुपाश्रितावित्यनेन प्राणापानयोः परशिवाश्रितत्वोक्तत्वात् "नोपास्यौ प्रकृतिजीवौ" इत्यत्र जीवाद्युपासनस्य निरस्तत्वाच्च । इह अस्मिन्नध्याये तद्योगात् तस्य परशिवस्य योगात् तदसाधारण धर्मबाहुल्येन संबंधात् तस्यैव उपासा त्रैविध्यात् हृदब्जद्वादशान्तमध्यस्थानेषु उपासनायाः परशिवोपासनस्य त्रैविध्यात् त्रिविधत्वस्य तत्र तत्र श्रूयमाणत्वात् "हृदब्जे वा द्वादशान्ते भ्रूमध्ये वाथवा शिरे ।

ध्यायेन्मुक्त्यै सदा देवं त्रिविधोपासनं स्मृतम् ।" इति कारिकया नीलकण्ठशिवाचार्येण "उपासा त्रैविध्या" इत्यस्य सूत्रघटकस्य अर्थस्य संगृहीतत्वात् । निर्वाणमन्त्रिणा प्राणधर्मेण प्रज्ञात्मधर्मेण स्वधर्मेण च उपासनायाः यत्त्रिविधत्वं शंकरभगवत्पादाचार्येण अथवेत्यादि ग्रन्थेन अभिप्रेतमुक्तम्, तन्मूलविरुद्धमित्याभाति । अस्मिन् अन्य धर्मावगाहि बुद्धेः भ्रमत्ववत् अन्योपाधिद्वयधर्मावगाहि अन्य परशिवोपासनायाः भ्रमत्वापत्तेश्च । इष्टापत्तौ शुक्तौ रजतभ्रमानन्तरं रजतार्थिनः रजतप्राप्त्यभाववत् अनपेक्षितशुक्तिप्राप्तिवच्च । मुमुक्षोश्शिवभावप्राप्तिरूपमोक्षाभावप्रसंगः । शिवातिरिक्त प्राणादेरुपासनस्य कुत्राप्यविधीयमानत्वात् जन्मादिकारणत्वादिना स्वधर्मेण शिवस्यैवोपास्यत्वं सिद्धम् । जगज्जन्मादिकर्तुत्वानुमित सर्वज्ञत्वादिधर्मविषयकोपासनाया एव स्वशक्तिसंकोचप्रयुक्त किंचिज्ज्ञत्वादि निवर्तकत्वात् । "एषोऽन्यत्र तृटेः पातः प्रोक्तस्सर्वज्ञतादिभक्" इति रहस्यस्तोत्ररीत्या जीवस्य तृटिपाते सर्वज्ञत्व सर्वकर्तृत्व सर्वेशत्वादि विषयकोपासनया तृटिपातेत्यर्थः सर्वज्ञत्व सर्वकर्तुत्व सर्वेशत्वादिभाग्जीवो भवति । एष च विषयो गुरूपदेशेनादरात् परीक्ष्य । अत एवोक्तम्—"यस्सर्वज्ञस्सर्वविदिति" यः उक्तोपासनया सर्वज्ञः सः सर्ववित् सर्वसाक्षिसर्वाधिष्ठानरूप शिव एवेत्यर्थः ।

किंच "अहमन्नमहमन्नमहमन्नादोऽहमन्नादोऽहमन्नादः" । इति श्रुतिरपि शिवभक्तिविजृंभित शिवभावापन्नस्य सर्वात्मकशिवस्वरूपं व्यनक्ति । एषा रीतिरग्रे स्फुटीभविष्यति । जीवप्राणधर्मेण उपासनाया

जीवत्वप्राणत्वापत्या तद्विषयकोपासनायाः निष्प्रयोजनत्वात् प्राणधर्मेण प्रज्ञात्मधर्मेण च उपासनायास्त्रिविधत्वपूरणं विचारणीयम् ! अतः प्रवोक्त नीलकण्ठशिवाचार्योदत त्रैविध्यमेव उपासनायां वक्तव्यम् ।

अथवा "मामेव विजानीहि" "प्राणोऽस्मि प्रज्ञातं ममायुरमृतमित्युपास्व" इति श्रुत्या । परमशिवकलानुस्यूत बाह्यप्राणलिंगस्य उपदिश्यमानत्वात् स्वार्चकभक्तानां प्राणनहेतुत्वात् । तस्यैव प्राणशब्दवाच्यत्वात् अन्योपासनया किमित्याशंक्याह—"जीवमुख्यप्राणलिंगान्नेति चेन्नोपासा त्रैविध्यादाश्रितत्वादिह तद्योगात्" ॥

"यावदस्मिन् शरीरे प्राणो वसति तावदायुरिति" "प्राणो वै बलम्" "प्राणोऽस्मि प्रज्ञातं ममायुः" इत्यादिषु परिच्छिन्न जीवमुख्यप्राणलिंगस्य निर्देशात् सर्वव्यापकपरशिवोपासन न इति चेन्न। इष्टापत्तेः । कुतः उपासात्रैध्यात् इष्ट-प्राण-भाव संज्ञिक परशिवब्रह्मोपासनात्रयस्य अंगीकृतत्वात् । इह अस्मिन् वाक्ये तद्योगात् तस्य उपासनात्रयस्य स्थूलारुन्धती न्यायेन करतलामलकवत् स्वशक्तिप्रसरावच्छिन्न षट्स्थलपरिपूर्ण सच्चिदानन्दपरशिवसाक्षात्कारस्य साधनत्वेन संबंधात् । अत एव तस्य आश्रितत्वात् उपयुक्तत्वादित्यर्थः । प्राणोऽस्मीत्यादि वाक्ये स्थूलशरीरावच्छिन्न मुख्येष्टलिंगधर्मबाहुल्यात् इष्टलिंगोपासनम् ।

मध्ये "एष एव साधुकर्मकारयतीति" प्राणलिंगधर्मबाहुल्यस्य सर्वकर्मकारयितृत्वादेः श्रवणात् लिंगोपासनम् ।

उपसंहारे " रथस्य रेषु नेमिरर्पिता नाभावर्पिता " इत्यादिना भावलिंगधर्मभूयस्त्वावगमात् भावलिंगोपासनं चेतत्रयस्य उपक्रमोपसंहारमध्यवाक्यैर्विधीयमानत्वात् तद्वाक्यानां परमशिवान्यपरकत्वे पूर्वापरमध्यवाक्यपरामर्शविरोधप्रसंगात् आनन्दचिदात्मनां इष्ट-प्राण-भावलिंगानां उपासनात्रयस्य मुख्यत्वेन अनुभवसूत्रादौ निगदितत्वात् इष्टप्राणभावलिंगोपासनात्रयमेव शिवप्रसादसंप्राप्तशिवज्ञानसंपन्नबादरायणेन उपासा त्रैविध्यादित्यनेन सूचितं इति वक्तुं शक्यते। नोपास्यौ प्रकृति जीवौ " इत्यादौ जीवाद्युपासनस्य निषिद्धत्वात् निर्विशेषस्य ब्रह्मणः उपासना संभवात्।

किंच — " तस्याभिध्यानाद्योजनात्तत्वभावाद्भूयस्यान्ते विश्वमायानिवृत्तिः " इत्यादौ पंचम्यन्तपदत्रयेण यथाक्रमं प्राणलिंग इष्टलिंगभावलिंगोपासनात्रयस्य स्पष्टमुक्तत्वात्। अन्यत्र प्राणव्यापारजीवयोः ब्रह्माधीनत्वावगमात् धारणार्चनर्पणात्मक उपासनायोग्यत्वात् जीवसकलाभीष्टप्रदायकत्वाच्च जीवमुख्यत्वं स्वेष्टलिंगस्यैव। जीवमुख्येष्टशब्दयोः लिंगब्रह्मयोरिव पर्यायत्वात्। उक्तं च शंकरसंहितायां जीवस्य प्राणलिंगमुख्यत्व " शिष्यदेहे ततश्शक्तिपातं कृत्वा स्वविद्यया। पीठस्थ शिवलिंगे तु शिष्यप्राणं निधाय च॥ लिंगं संस्थाप्य तत्प्राणे प्राणलिंगं भवेत्ततः। दत्वा शिष्याय तल्लिंगं श्रद्धाभक्तियुताय सः। न त्यज प्राणलिंगं त्वं यावज्जीवं प्रतिज्ञया। पुनर्भवं न ते वत्स विद्यते मातृयोनिषु॥ " उक्तं च सिद्धान्तागमेऽपि— " शिष्यस्य प्राणमादाय लिंगे तत्र निधापयेत्। तल्लिंगं तु स तत्प्राणे स्थापयेदेकभावतः॥

एवं कत्वा गुरुर्लिंगं शिष्यहस्ते निधापयेत् । प्राणवद्धारणीयन्तु प्राणलिंगमिदं तव ॥ कदाचित् कुत्रचिद्वापि न वियोजय देहतः" ॥ अत एव शिवेनापि "शरीरवृत्तिर्व्रतम्" इति सूत्रितम् । तेन शरीरस्य स्थूलसूक्ष्मकारणापरपर्याय त्यागांग, भोगांग, योगांगत्रयस्य वृत्तिः यावत्पर्यन्तं वर्तनं तावत्पर्यन्तं व्रतं विराड्हिरण्यगर्भ ईश्वरापरपर्याय इष्ट-प्राण-भावलिंगत्रयधारणात्मकं व्रतं इत्यर्थो लभ्यते । तथा च सूत्रघटक उपासात्रैविध्यादित्यनेन इष्ट-प्राण-भावोपासनात्रयमेव । कथितं च "यस्य लिंगार्चनेनैव व्यासस्सर्वार्थवित्तमः" इति सूतसंहितोक्तेः । शिवसूत्रशिवभक्तव्याससूत्रयोरेकार्थत्वस्य वक्तव्यत्वावश्यकत्वात् । तस्य शिवभक्तत्वे शिवपुराणं, काश्यां तत्स्थापितशिवलिंगमपि निर्दशनमिति बोध्यम् ।

किंच—श्रुत्यन्तरेऽपि परमेश्वरस्य लिंगत्रयात्मकत्वं स्पष्टमुपदिष्टम् । "सर्वाननशिरोग्रीवस्सर्वभूतगुहाशयः । सर्वव्यापी च भगवान् तस्मात् "सर्वगतश्शिवः ।" "इष्टमूर्जं तपसामनुयच्छति सर्वदा । तत्प्राणेष्वन्तर्मनसो लिंगमाहुः । भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् । कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् । इत्यादि श्रुतिशतेन इष्ट-प्राणभावलिंगत्रयोपासनात्मकधारणस्य शरीरत्रयवर्तनपर्यन्तं स्थायित्वाभ्युपगमात् पूर्वोक्तादृशसूत्रार्थस्य युक्तत्वम् । "प्राणोऽस्मि प्रज्ञातम्" इत्याद्युपक्रमोपसंहारमध्यवाक्यानां परमशिवैकपरत्वनिर्णयस्य उचिततरत्वात् इतरेषां मुक्तिप्रदायकत्वाभावात् परमशिवप्रकरणत्वाच्च प्राणशब्दोत्र परशिवब्रह्मणि वर्तते इति राद्धान्तः । नचास्यापि नीलकण्ठशिवाचार्यो

नभिप्रेतत्वमिति वाच्यम् । "प्राणादप्यधिकं लिंगम् यस्मात् श्रेयः परं भवेत् ।" तत्प्राणलिंग मोक्षार्थी विदध्यात् हृदयांबुजे । इत्यनेन एतत्सूत्रव्याख्यानावसरे तदुक्तश्लोकेन तदभ्युपगतत्व निर्णयात् ।

अस्मिन् पादे मोक्षप्रयोजनाय शक्तिविशिष्टं लिंगरूपं ब्रह्म प्रथम-सूत्रेणोपास्यत्वेनोपदिष्टं उपासनायाः उपास्यनिष्ट किंचिद्गुणविषयकत्व-नियमात् । द्वितीयसूत्रेण प्रथमोद्दिष्टस्य काचिदसाधारण गुणानि दर्शितानि। तृतीयचतुर्थसूत्राभ्यां शास्त्रस्य यत्किंचित् तन्माहात्म्यप्रकाशकत्व समस्त-वेदान्तानां उद्दिष्टब्रह्मणि समन्वयौ दर्शितौ । 'ईक्षतेर्नाशब्दमित्यादिना श्रुतत्वाच्चेत्यन्तेन सूत्रेण प्रधाने तल्लक्षण नास्तिव्याप्तं इति दर्शितम् । आनन्दमयोभ्यासात्' इत्यादिना 'शास्त्रदृष्ट्या तूपदेशो वामदेववदित्यन्तेन सूत्रेण परशिवातिरिक्तेषु तल्लक्षणाभावात् तेषां नोपास्यत्वमित्युक्तम्'। जीवमुख्यप्राणलिंगान्नेति सूत्रेण प्रथमसूत्रोपक्रान्त परशिवलिंगोपासनस्य इष्टप्राणभावलिंगरूपावगाहितया त्रैविध्यमुक्तमिति सूत्रतात्पर्यपर्यालोचनेन प्रस्फुटं स्फुरति ।

इति श्रीमच्छिवाद्वैतप्रतिपादिकायां शांकर्यां वृत्तौ समन्वयाध्यायस्य प्रथमः पादः समाप्तः ॥

———

अथ द्वितीयः पादः

अस्मिन् प्रथमसमन्वयाध्याये परस्यैवामिततेजसः लिंगस्य सर्ववेदान्तानां प्रतिपादकत्वेन समन्वयस्य वक्तव्यत्वात् अस्मिन् पदेऽपि षट्स्थलात्मकपरमशिवलिंगोपासनमेव प्राधान्येन चिचार्यते ।

ननु "सक्रतुं कुर्वीत मनोमयः प्राणशरीरः" इत्यत्र मनोमयत्वादि धर्मविशिष्टत्वात् जीवस्यैवोपास्यत्वमिति चेन्न—

सू. सर्वत्रप्रसिद्धोपदेशात् ॥ १ ॥

"सर्वं खल्विदं ब्रह्म तज्जलानि शान्त उपासीत" अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति । तथेतः प्रेत्य भवति सक्रतुं कुर्वीत । मनोमयः प्राणशरीरः भारूपः सत्यसंकल्पः आकाश आत्मा सर्वकर्ता सर्वकामः" इत्यत्र उपक्रमे सर्वत्रप्रसिध्या सर्वात्मकपरमेश्वरस्य उपासनाया विधायमानत्वात् कथं जीवस्योपास्यत्वेनाशंका इति चेन्न । सर्वं खल्विदमिति वाक्येन उपादानोपादेययोरभेदात् इदं सर्वं ब्रह्मैवेति ब्रह्मत्वेनोपासनस्य निर्दिष्टत्वात् तदन्तर्गताजडजीवस्यापि ब्रह्मत्वेनोपासनायाः प्राप्तत्वात् तस्यैव मनआदिभिस्संबंधात् परस्य तदभावात् "अप्राणो ह्यमनाश्शुभ्रः" इति श्रुतेः तस्योपास्यत्वशंका संभवति । अतस्तन्निवारणार्थं सर्वत्र प्रसिद्धोपदेशादिति सूत्रमुक्तम् ।

तथा च उपक्रमवाक्यनिर्दिष्ट उपास्येष्टलिंगात्मकविराजउपासनायां शान्तोऽर्थात् रागादिदोषरहितो भवति ।

एवं च "सर्वं खल्विदं ब्रह्मे"ति वाक्येन इष्टलिंगोपासनमुक्तम् । 'मनोमयः प्राणशरीरः' इत्यनेन तु प्राणलिंगोपासनम् । प्राणाः शरीरं यस्य सः प्राणशरीरः । प्राणशब्देन प्राणोपलक्षितसूक्ष्म-शरीरात्मकभागांगमित्यर्थः । तच्छरीरत्वं तदभिमानिनो हिरण्यगर्भात्मक प्राणलिंगस्य तस्य मनोग्राह्यत्वात् मनः प्राचुर्यार्थक मनोमयत्वमित्यर्थः ।

ननु परमेश्वरस्य 'अप्राणो ह्यमनाश्शुभ्रः' इति श्रुत्या 'यन्मनसा न मनुते' इत्यादि श्रुत्या मनस्संबन्धत्वाभावावगमात् कथं तस्य मनोमयत्वं तादृश श्रुतीनां "भावग्राह्यमनीडाख्यं" इत्यादि श्रुतिप्रसिद्ध भावलिंगपरकत्वात् "मनसैवानुद्रष्टव्यम् , मनसैवेदमवाप्तव्यं दृश्यतेत्वग्रया बुध्या सूक्ष्मया सूक्ष्मदर्शिभिः" बुध्यालोकनसाध्येऽस्मिन् वस्तुन्यस्तमितां यदि । बुद्धियोगमुपाश्रित्य मच्चित्तस्सततं भव" इत्यादि श्रुतिस्मृतीन मनोग्राह्य प्राणलिंगपरकत्वात् । 'मनोमयः प्राणशरीरः' इत्यत्रापि प्राण लिंगमेव इष्टलिंगोपासनाधिकफलाय उपास्यत्वेनोपदिष्टम् । अग्रे "भारूप-स्सत्यसंकल्पः" इत्यादि वाक्येन तदधिकफलाय कारणशरीरयोगांगाभिमानि भावलिंगोपासनमपि निर्दिष्टम् । तस्मादिष्टादिरूपेण जीवमुख्येति सूत्रप्रतिपादित परशिवब्रह्मोपासनस्य सिद्धत्वात् न जीवस्योपास्यत्वम् ।-
"सर्वं खल्विदं ब्रह्म" इत्यादिना तत्तल्लिंगोपासनाया एव सिद्धत्वात् तद्धारणानौचित्यमिति चेन्न । समाधि शब्दित उपासनायाः तद्धारणं

विना अनुपपत्तेः बाह्याभ्यन्तरोपास्य स्वरूपधारणाभावे तदुपासनाया असंभवात् ।

ननु प्राणाधिकरणे अस्य सिद्धत्वात् पुनः किमिति चेन्न । प्राणाधिकरणे त्रिविधलिंगोपासनाविधिरेव साधिता अत्र पुनः स्पष्टार्थम् । ईक्षत्यधिकरणे प्रधानजगत्कारणत्वं निरस्तमपि "चमसवदविशेषा" दित्यादिना पुनर्निराकरणवत् बाह्यलिंगधारणं पुनर्निर्दिश्यते ।

श्रुत्यन्तरेऽपि—"दहरं विपाप्मं परवेश्मभूतं हृत्पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दहं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्" इत्यनेन ज्योतिर्लिंगानुसंधानमिति निर्दिश्य "यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः तस्य प्रकृतिलीनस्य यः परस्स-महेश्वरः" इत्यादिना अनुसंधेयः । स्वरूपमुक्त्वा "निधनपतये नमः" इत्यादिना लिंगस्य सर्वात्मकत्वमुपदिश्य "एतत्सोमस्य सूर्यस्य सर्वं-लिङ्गं स्थापयति पाणिमन्त्रं पवित्रम्" इत्यनेन इष्टलिंगधारणं विधीयते । उक्तं च लैंगे—"वेदेषु शास्त्रसंघेषु पुराणेष्वागमेषु च । ब्राह्मणस्य समाख्यातं लिंगधारणमुत्तमम्" इत्युपक्रम्य "यजुरप्याह सर्वं वै लिंगं स्थापयतीति च । तस्माद्धार्थं महालिंगं पाणिमन्त्रेति मन्त्रतः ॥ पाणौ लिंगं विनिक्षिप्य दीक्षाकाले गुरुश्शिवम् । येन स्मरति तन्मन्त्रं पाणिमन्त्रं वदन्ति हि । पवित्रत्वान्महेशस्य शिवस्य प्रतिपादनात् पवित्रीकरणात् पुंसां पवित्रमिति कथ्यते । तस्मात् सर्वेषु कालेषु धारयेल्लिंगमुत्तमम् । गच्छन् तिष्ठन् स्वपन् जाग्रदुन्मिषन्निमिषन्नपि ।

शुचिर्वाप्यशुचिर्वापि लिंगं सर्वत्र धारयेत्। लिंगधारी सदा शुद्धो निजलिंगं मनोहरम्। अर्चयेद्गन्धपुष्पाद्यैः करपीठे समाहितः"।

अपि च तत्स्वरूपं सिद्धान्तशिखोपनिषदि "गणवंशश्चेशानतस्यात्" इत्यनेन गणवंशानां ईशानमुखाविर्भूतत्वं प्रदर्श्य तेषां न सूतकादि स्पर्शो इति वक्तु "अत्याश्रमित्वात् गणवंशजानां लिंगागसंगिनां तथैव न सूतक वाप्यशुचित्वम्, एषां गच्छं स्तिष्ठन् निमिषन्नुन्मिषन् वा स्वपन् जाग्रन् लिंगधारी शुचिस्यात्"। इति निर्दिष्टम्।

अथ च तत्रैव "न तत्रोच्छिष्टं भुंजते शुद्धदेही। शीर्षे कण्ठे वक्षसि कुक्षिदेशे नाभौ हस्ते सर्वदा प्राणलिङ्गं धार्यं यथा संप्रदायं गुरोर्विदित्वा हृदये मुख्यमुक्तम्।" इत्यादिना बाह्यलिंगधारणं, लिंगधारिणः सूतकाभाववत्वं च त्रैकालिकमुक्तम्। तत्र जाग्रत्काले सूतकाभावस्य अव्याप्यवृत्तित्वे मानाभावात् पूर्वोक्त श्रुतिविरोधाच्च। तत् श्रुत्या सूतकाभावस्य व्याप्यवृत्तित्वावगमात्। दीक्षया प्रबलमलत्रयस्यैव उध्वस्तत्वे सूतकसद्भाव कथं संभवतीति विचारणीयम्।

किं च शैवदीक्षानन्तरं प्रेतत्व जीवत्व सत्वे तस्या आनर्थक्यं तदभावे कस्य दोष स्पर्श इति प्रष्टव्यो सूतकसद्भाववादी। केचिन्मूढाः शिवदीक्षानन्तरं प्रेतत्व जीवत्वाभावेऽपि शिवागमेषु शैवानां स्ववर्णाश्रमोचित पूर्वापरकर्मकर्तव्यतया विधेयत्वात् अकरणे प्रत्यवायदर्शनाच्च विधिविहित यावत्कर्मानुष्ठानं कर्तव्यमेवेति वदन्ति। तेषामिदं

मौढ्यम् । विधिविहितयावत्कर्मानुष्ठानस्य ब्रह्मणाप्यशक्यत्वात् । "न हि कर्मणि कर्मान्तरारम्भः" इति न्यायविरोधात् । प्रयोजनाभावे मन्दस्यापि प्रवृन्त्यदर्शनात् लिङ्गधारिणः प्रयोजनाभावस्य स्वप्रयोजनाभावेऽपीत्यादिना ग्रन्थेन तैरेव स्वीकृतत्वात् । सनकादेर्यावत्कर्मानुष्ठान राहित्यकृत अवैदिकत्वापत्तेः । "कर्मणो गहना गतिः", "यावतां समनुष्ठानं सप्तसागरशोषणम्" इति यावत्कर्मानुवर्तनस्य कैरप्यशक्यत्वात् । कर्मणां संकल्पाधीनत्वेन संकल्पविरोधे प्रायश्चित्तविधानात् । संकल्पिताश्रयेणाश्रमधर्मोऽनुष्ठेयः । यथा ब्रह्मचारीगृहस्थाश्रमस्वीकाराभावे तद्धर्मानपि नार्हति । गृही वनस्थाश्रमधर्मान् वनस्थो यतिधर्मान् तथा अत्याश्रमी वीरशैवो नाश्रमधर्मानर्हति । विभूत्यादींस्तु अत्याश्रमधर्मान् अर्हति । "धर्माननुतिष्ठेत" इत्यस्य स्वस्वाश्रमविहितधर्मविधायकत्वात् । तादृशधर्मानुष्ठातुरेव चित्तनैर्मल्यद्वारा ब्रह्मविचारार्हत्वात् नोपनयनाद्यग्निष्टोमादिधर्मानुवर्तनापेक्षा । एतेन शैवदीक्षितानां कर्मकरणे प्रयोजनाभावेऽपि शिवाज्ञापालनार्थं अवश्यं कर्तव्यमेवेति तैरुक्तमपि प्रत्युक्तम् ।

न च वेदबोधितकर्तव्यताज्ञानात् उपनयनाग्निष्टोमादौ प्रवृत्तिस्संभवतीति वाच्यम् । स्वप्रयोजनसाधनत्वाभावे प्रवृत्तेरसंभवात् । न तु वेदबोधित कर्तव्यताज्ञानात्प्रवृत्तिः संभवति । स्वेष्टसाधनत्वमविज्ञाय तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसंभवादिति श्री विश्वनाथपंचाननभट्टाचार्येणाप्युक्तम् । बसवेश्वरेणापि शिवदीक्षासंपन्नस्य उपनयन-

अग्निष्टोमादि कर्मानुवर्तने प्रयोजनाभावात् अंगीकृतकर्मपरित्यागापेक्षया "अनंगीकरणं वरम्" इत्यादिना कर्मोपनयनं बहुधा निरस्तम् ।

अस्त्वेतत् तत्र तत्र स्फुटीभविष्यति प्रकृतमनुसरामः । सर्वत्र श्रुत्यागमपुराणादिषु परमशिवलिंगस्य धार्यत्वेन उपास्यत्वेन च प्रसिद्धत्वात् न जीवस्योपास्यत्वम् ।

अस्मिन् अर्थे पुनर्हेत्वन्तरमाह —

सू. विवक्षितगुणोपपत्तेश्च ॥ २ ॥

विवक्षितानां वक्तुमिच्छाविषयीभूतानां गुणानां "सत्यसंकल्पः आकाशआत्मा सर्वकर्ता सर्वकामः" इत्यादि श्रुत्युक्त सत्यसंकल्पत्व व्यापकत्व सर्वकर्तृत्व सर्वकामत्वादीनां उपपत्तेः ब्रह्मोपासनाविषयत्वेनैव उपपन्नत्वात् इति सूत्रार्थः ।

ननु अपौरुषेय वेदे वक्तुरभावात् इच्छार्थः कथं संभवतीति चेन्न । प्रपञ्चमात्रं प्रति बहुस्यामितीच्छया विमर्शशक्तेः कारणत्वेन नामप्रपञ्चं प्रत्यपि कारणत्वात् 'तस्माद्यज्ञात्सर्वहुतः, ऋचस्सामानि जज्ञिरे, छन्दांसि जज्ञिरे" इत्यादि श्रुतेः ॥ "नीरूपनित्यया वाचा" इत्यादि वेदनित्यत्व बोधकानां पूर्वसाम्येन प्रवाहरूपेण स्वेच्छया आविर्भावमात्रपरकत्वात् । वेदस्य जीवाजन्यत्वमात्रेणापि अपौरुषेयत्वसम्भवात् । तथा चोक्तं आगमरहस्यस्तोत्रे — "साक्षाद्भवान्यदि विधाय

न मूर्तिमाद्यम् । तत्वं निजं तदवदिष्यदतोऽतिगुह्यम् । नाज्ञ स्यतत्रिभुवनं ुवमन्धमूक । कल्पं समस्तमसमंजसतामयास्यत् ॥" उक्तं च षाड्गुण्यविवेकेऽपि "साक्षत् त्वमेव वा श'स्त्र त्वदीयैव हि सा मतिः । शब्दद्वारेण संक्रम्ह संस्करोस्यधिकारिणः ॥" इति शास्त्रशास्त्रोः उपादेयोपादानयोः तादात्म्यम् । तथा च मुमुक्षोरुपासनायां सर्वां कर्तृत्वादीनामेव परशिवगुणानां विवक्षितत्वात् । किञ्चित्कर्तुत्वादीन' जीवगुणानां अविवक्षितत्वात् । अन्यत्रापि "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ :' इत्यादिना शिवासाधारणधर्मश्रवणाच्च तस्यैव धार्यत्वं ध्येयत्वमिति सिद्धम् ॥

परशिवोपासनायां विवक्षितगुणानां उपपत्तिमुक्त्वा किञ्चित्कर्तुत्वादि विशिष्टस्य उपास्यत्वे तेषामनुपपत्तिमाह—

सू. अनुपपत्तेस्तु न शरीरः ॥ ३ ॥

तु शब्दोऽवधारणार्थः परशिवस्यैवोपास्यत्वं न शरीरस्य किञ्चित्कर्तु- अनुपपत्तेः सर्वकर्तृत्वादीनां विवक्षितानां अनुपपत्तेरित्यर्थः ।

इतश्च न तस्योपास्यत्वमित्याह—

सू. कर्मकर्तुव्यपदेशाच्च ॥ ४ ॥

"एतमितः प्रेत्य अभिसंभवितास्मि" इत्यत्र शिवोपासनानंतरं शरीरपातादूर्ध्वं शिवस्य कर्मत्वेन इतरस्य कर्तृत्वेन प्राप्तव्य प्राप्तृभावस्य व्यपदेशात् कथनादित्यर्थः । किञ्च तस्यैवोपास्यत्वमित्याह—

सू. शब्दविशेषात् ॥ ५ ॥

" अयमन्तरात्मन् पुरुषो हिरण्मयः " इत्यत्र शारीरविधायक सप्तम्यन्तपदात् पुरुष इति उपास्याभिधायक प्रथमान्तपदस्य विशेषात् भेदादित्यर्थः ॥

इतश्च शिवस्यैवोपास्यत्वे स्मृतिरपि प्रमाणमस्तीत्याह—

सू. स्मृतेश्च ॥ ६ ॥

" ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ " इत्यत्र परशिवस्यैव प्राणलिंगरूपेण सर्वप्राणि हृदयान्तर्वर्तित्वावगमात् । स्वहृदये स्वस्योपास्यत्वासंभवात् शिवस्यैव प्राणलिंगरूपेण धार्यत्वं ध्येयत्वं च संभवति । श्रुतावपि " तस्मिन् यदन्तस्तदुपासितव्यं " इत्यनेन हार्दाकाशमध्यवर्तिनः प्राणलिंगस्य अनुसंधानमुक्तम् । तच्च वीरशैवानां इष्टलिंगार्चनादिरूपं वस्त्वेकमपि-बहिर्लक्ष्यान्तर्लक्ष्यभेदेन द्विविधम् । तथाचात्र प्राणलिंगधारणध्यानमेव उक्तं न तु बाह्येष्टलिंगधारणमिति न भ्रमितव्यम् । अन्याश्च स्मृतयोऽपि बाह्येष्टलिंगधारणे प्रमाणानि सन्ति । मनुस्मृतौ—शिवध्यानपरो भूत्वा शिवलिंगांगसंयुतः । शिवेतरपरित्यागी ध्यानयोगी स उच्यते ॥ " इति ध्यानयोगिनिरूपणे । उक्तंच तत्रैव—" अन्तर्धारयितुं लिंगमशक्तः शक्त एव हि । बाह्यं च धारयेल्लिंगं तद्रूपमिति निश्चयात् ॥' शंखस्मृतौ च—" कीटो भ्रमरयोगेन भ्रमरो भवतिध्रुवम् । मानवश्शिव-योगेन शिवो भवति सर्वदा ॥ वामहस्तस्थितं लिंगं सावधानेन

पूजयेत् । मस्तके हृदये कण्ठे धारयेत् सर्वदा द्विजः ॥" पाराशर्यस्मृतौ — "काश्यां मृतानां जन्तूनां यतीनां लिंगधाररिणाम् । ब्रह्मत्वमेव भवति प्रेतत्वं न हि विद्यते ॥ शैवं लिंगार्चनं यस्य यस्यचाग्निपरिग्रहः । वानप्रस्थयतीनां च शरीरे नास्ति सूतकम् ॥" सिद्धान्तागमे— "श्रुतिस्मृतिपुराणेषु वैदिकानां वरानने । लिंगधारणमाख्यातं सर्वसिद्धिप्रदायकम् ॥"

ननु वीरशैवधर्मप्रतिपादकानां श्रुत्यागमादीनां षडंगषड्लिंगस्थलानां उत्तरोत्तरधर्माचरणस्य पूर्वपूर्वधर्माचरणानन्तर्यात् क्रमिकतया तादृश धर्माचरणस्य कालहस्तिश्रीशैलादि देशस्थित तन्तुमययज्ञोपवीतधारणलिंगधारणादि वैदिकतान्त्रिकधर्मसमुच्चयानुष्ठानपराराध्ये विहितत्वेन नेतुं शक्यत्वात् आराध्येतर केवल वीरशैवप्रतिपादकत्वं कथामिति चेन्न । "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम् ॥" इति श्वेताश्वतरोपनिषदि "अत्याश्रमी सर्वदा सकृद्वा जपेदिति" कैवल्योपनिषदि च श्रूयमाणत्वादत्याश्रमिशब्दस्य "ब्रह्मचारीगृहस्थश्च वानप्रस्थश्च भिक्षुकः । अतिवर्णाश्रमी चेति क्रमाच्छ्रेष्ठा विचक्षणाः ॥" "अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते । यस्य वर्णाश्रमाचारो गलितस्वात्मदर्शनात् ॥" इत्यादिभिः अतिवर्णाश्रमिणः श्रेष्ठत्वावगमात् । अतिवर्णाश्रमादि शब्दानां वर्णाश्रमाचरणधर्मशीलेषु वृत्यभावात् । पंचमाश्रमवतां वीरशैवब्राह्मणानां पारकत्वौचित्यात् । लिंगोपनिषदि "चतुर्थाश्रमस्सन्यासः पंचमो लिंगधारणम्" इत्युक्तत्वात् वीरशैवानां लिंगधारिणां पंचमाश्रमवत्वं सिद्धम् ।

ननु अतिवर्णाश्रमाचारादि शब्दानां प्रतियोगिप्रसक्तिसापेक्षाणां प्रतियोगिसम्बंधं विना कृतेषु आराध्यव्यतिरिक्तेषु वृत्तिः कथमुपपद्यते इति चेन्न । स्वरूपसिद्धान्तोपनिषदि "गणवंशश्चेशानतस्यात्" "अत्याश्रमित्वाद्गणवंशजानां लिंगांगसंगिनाम्" वेदान्तसारोपनिषदिच–"ईशान कास्याद्गणवंशजानां लिंगांगशोभामोक्षमार्गैकनिष्ठाः ॥" इत्युक्तत्वाच्च 'अतिवर्णाश्रमाचारास्संभवन्त्यूर्ध्ववक्त्रतः । ते वै साक्षान्महादेवे मोदन्तेह्यागमेषु च ।" इत्याद्युक्तत्वाच्च अतिवर्णाश्रमादिशब्दानां रूढ्या वीरशैवानां वाचकत्वात् । न चात्याश्रमिशब्दः कृताश्रमधर्माचरणेषु वर्तते । न चोक्तं प्रतियोगिप्रसक्तिसापेक्षकाणां अत्याश्रमादिशब्दानां आराध्यव्यतिरिक्तेषु वृत्तिर्न संभवतीति अपहतपाप्मादि शब्दानां ब्रह्मप्रतियोगिकानां ब्रह्मणि पापासंभवात् प्रवृत्तेरसंभवापत्तेः । योगाद्रूढेर्बलीयस्त्वात् अत्याश्रमादि शब्दानां वीरशैवपरकत्वमेव वर्णाश्रमधर्मवतां आराध्यविप्राणां अत्याश्रमिशब्दाभिधेयत्वायोग्यत्वात् परमेश्वरपञ्चमुखसंभूत प्रमथगणनायकघण्टाकर्णगजकर्णरेणुकदारुकगोत्रजातानां केवलातिवर्णाश्रमधर्मानुष्ठायिनां केवलवीरशैवानामेव उक्तश्रुत्यागमपुराणेषु अत्याश्रमिशब्दप्रतिपादनौचित्यात् । न च प्रमथानां परमेश्वरपंचमुखसंभूतानां अत्यन्तरंगाणां प्राकृतमनुष्यवत् प्राकृतस्त्रीपरिग्रहाभावात् कथमेतेषां आधुनिकानां वीरशैवानां तद्वंशजातत्वम् । तथापि यद्यस्ति तर्हि आराध्यविप्राणामपि तद्वंशजत्वमस्तु इति वाच्यम् । "द्वारोपोपस्पृशा द्वारापाय स्वाहा द्वाराप्युपस्पृशो द्वाराप्यै स्वाहेति" ईशान्यवस्यारुयकर्मणि द्वारापशब्दवाच्य नन्दिकेश्वरस्य तत्पत्न्याश्चेशादेव्याः पुराणादिषु प्रसिद्धायाः विद्यमानत्वेन

भक्तानुग्रहार्थं परमेश्वरस्य किरातरूपादि धारणवत् शिवदीक्षया प्राकृतांशांतिरोभूय स्त्रीपरिग्रहसंभवात् । तद्वंशजत्वस्यापि केवलानां वीरशैवानां संभवात् आराध्यविप्राणां सर्वथा तद्वंशजत्वस्यानुचितत्वात् वीरशैवधर्माचरणाभिमाने तद्वंशजत्वमस्तीत्युच्येत यदि तर्हि भारद्वाज अगस्त्य अंगिरस विश्वामित्र भार्गववासिष्ठादि गोत्रजन्यत्वं न स्यात् । न चेष्टापत्तिः । वृश्चिकभयात् पलायमानस्य आशीविषमुखनिपतनमिव ब्राह्मणत्वस्यापि भंगस्स्यात् । न च ऋषिगणोभयवंशजत्वं अस्माकमाराध्यविप्राणां संभवतीति वाच्यम् । उत्पत्त्या उभयवंशजत्वमिति चेत् "गर्दभेन संभवति तस्माद्गर्दभोद्विरेता" इति श्रुत्या गार्दभवदेकस्य उभयवीर्योत्पत्तौ अत्यन्तलोकहास्यता स्यात् । शिष्यसंप्रदायेनेति चेत् तादृशसंप्रदायस्य गौणतया चतुर्थवर्णस्यापि संभवात् वीरशैवानां गणवंशजत्वात् अत्याश्रमिशब्दवाच्यत्वेन तदनुष्ठीयमान अष्टावर्ण पंचाचारधर्माणां ब्रह्मविद्यांगत्वम् । न चोपनयनसंस्काराभावात् तदनुष्ठितधर्माणामश्रौतत्वात् तदनुष्ठायिनां ब्रह्मविद्याधिकारत्वाभावात् "संस्कारपरामर्शात्तदभावाभिलापाच्चेति" सूत्रे ब्रह्मक्षत्रियवैश्यानां उपनयनसंस्कारविशिष्टत्वात् ब्रह्मविद्याधिकारः न शूद्राणामिति उपनयनासंस्कृतानां ब्रह्मविद्याधिकारस्य निषिद्धत्वात् इति वाच्यम् । शिवदीक्षाया एव उपनयनस्थानीयत्वात् शिवदीक्षासंस्कृतानां तत्सूत्रे ब्रह्मविद्याधिकारस्य विहितत्वात् । एतदपि अपशूद्राधिकरणे स्फुटी भविष्यति ।

ननु शिवदीक्षाया उपनयनस्थानीयत्वे "यज्ञोपवीतं परमं पवित्रं" इत्यादि श्रुत्युक्त यज्ञोपवीतस्याप्यावश्यकत्वात् तदभावात् न तत् स्थानी-

यत्वं इति चेन्न । "यज्ञो वै विष्णुः" इति श्रुत्या विष्णोर्यज्ञत्वावगमात् ईश्वरशक्तेरेव पुंभावं स्वीकृत्य विष्णुरूपत्वात् "विष्णुवल्लभाय नमः" इत्युक्तत्वाच्च । यज्ञेन उपवीतं अविनाभावेन संबद्धं शिवलिंगमित्यर्थः । शिवलिंगैकवाचक परमपवित्रशब्दसमभिव्याहृत यज्ञोपवीतशब्दस्य लिंगवाचकत्वौचित्याच्च । "पवित्रन्ते विततं ब्रह्मणस्पते" "सर्वलिंगँ स्थापयति पाणिमन्त्रं पवित्रम्" इत्यादि ऋगादिमन्त्राणां उपबृंहणवाक्ये पवित्रशब्दस्य शिवलिंगपरकत्वेन व्याख्यातत्वात् सच्चिदानन्दात्मक शिवलिंगस्यैव यज्ञोपवीतशब्दवाच्यत्वम् । "ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते" इति श्रुत्या पवित्रशब्दस्य चिल्लिंगवाचकत्व विधानात्—

"सूत्रमन्तर्गतं येषां ज्ञानयज्ञोपवीतिनाम् ।
ते वै सूत्रविदुर्लोके ते च यज्ञोपवीतिनः ॥"

"यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ।
सूचनात्सूत्रमित्याहुः सूत्रं नाम परं पदम् ॥"

इत्यादिना ब्रह्मोपनिषदि लिङ्गस्यैव सूत्र यज्ञोपवीतशब्दवाच्यत्वे सिद्धे तस्यैव धार्यत्वात् ।

नन्वस्तु तद्ब्रह्मशब्दप्रतिपाद्यशिवलिङ्गधारणं तन्तुमयस्यापि । "हरिकेशायोपवीतिने" इत्यादिना शिवचिह्नत्वावगमात् तद्धारणे का हानिरिति चेन्न । "क्रियाङ्गं तद्धि वै स्मृतम्" इति श्रुत्या तस्य स्थूलकर्माङ्गत्वात् तद्धारणस्य परमप्रयोजनानुपयुक्तत्वात् । "स शिखावपनं

कृत्वा वहिस्सूत्रं त्यजेब्दुधः " इत्यादिना तस्य निषिद्धत्वात् । शिवचिह्ना-नामनन्तत्वात् तत्तद्धारणस्य कैरप्यशक्यत्वात् । प्रयोजनाभावे प्रेक्षावतां प्रवृत्त्यभावाच्च । एतेन नियमविधिश्च तान्त्रिकतप्तलिङ्गशूलडमरुशंख-चक्राङ्कननिषेधपूर्वक श्रौतभस्मरुद्राक्षलिङ्गधारणस्वीकारात् । 'हरि-केशायोपवीतिने, रुद्रशिखेत्यादौ " भस्मरुद्राक्षादिवच्छिवस्यैव शिखा-सूत्रश्रवणाच्छिवलांछनमिति सिद्धं " इति तन्तुमयधारिभिरुक्तं निरस्तम् । "इतो भ्रष्टस्ततो भ्रष्ट" इति न्यायेन उभयमार्गभ्रष्टत्वात् । एषामुभय-धारणवतां कथं ब्रह्मविद्याधिकारस्संभवतीति विद्वद्भिर्निष्पक्षपातबुद्धिभिर्वि-चारणीयम् । "त्वं देवेषु ब्राह्मणोऽस्यहं मनुष्येषु ब्राह्मणः ब्रह्मणो वै ब्रह्मणमुपधावत्युपधावामि" । हरदत्ताचार्येण—"त्वं ब्रह्मणस्त्वदुपधा-वनमेव कार्यम्" इत्यादिना तत् श्रुत्यर्थस्य उक्तत्वात् ।

किञ्चस्य —

> **पितामहस्तु वैश्यस्स्यात् क्षत्रियः परमो हरिः ।**
> **ब्राह्मणो भगवान् रुद्रः सर्वेषामुत्तमोत्तमः ॥**
>
> **ब्राह्मणो वै सदा लोके ब्राह्मणं चोपधावति ।**
> **महाब्राह्मणमीशानमुपधावेन्नचेतरः ॥**

इत्यादिना पराशरपुराणे उपबृंहितत्वाच्च । परमब्राह्मणमुखाविर्भूत गणवंश-जानामस्माकं कैवल्योपनिषत् लिङ्गोपनिषत् स्वरूपसिद्धान्तोपनिषत् श्वेता-श्वतरोपनिषदादि प्रसिद्ध अत्याश्रमादि शब्दवाच्य केवलवीरशैवानां सर्वोत्कृष्टत्वात् तदनुष्ठीयमाणधर्माणां श्रौतत्वाद्ब्रह्मविद्याङ्गत्वमिति भावः ।

तथा च परशिवलिङ्गस्य धार्यत्वेन ध्येयत्वेन स्मृत्यादि सिद्धत्वात् नत्वितरस्योपास्यत्वम् ।

"एष आत्मा अन्तर्हृदय" इति श्रुतौ परिच्छिन्न पुण्डरीकाय-तनत्व श्रवणात् कथं सर्वगतस्योपास्यत्वमित्याशङ्क्य परिहरति

सू अर्भकौकस्त्वात् तद्व्यपदेशाच्चनेति चेन्न
निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

अर्भकं अल्पं हृदयपुण्डरीकादिकं ओकः स्थानं यस्य, तस्य भावः, तस्मात् । तद्व्यपदेशाच्च । "अणीयान् व्रीहेर्वा" इत्यत्र तस्य जीवस्य असाधारण अनीयस्त्वं धर्मकथनाच्च, न सर्वगतस्य परशिव-स्योपास्यत्वं संभवतीति चेन्न । हृत्पुण्डरीकादौ नीचाय्यत्वात्, व्यापकस्यापि ज्योतिर्लिङ्गादिरूपेण ध्यातुं शक्यत्वात्, अणीयस्त्वमपि व्योमवत्सम्भवति । यथा सर्वगतस्यापि व्याम्नः सूचीरन्ध्रः कर्णशष्कुल्याद्य वच्छेदेन परिच्छिन्नत्वं, स्वरूपेण व्यापकत्वं तथा सर्वगतस्यापि परमेश्वरस्य शरीरत्रयावच्छेदेन लिङ्गत्रयात्मना । न च परिच्छिन्नत्वा परिच्छिन्नत्वयोरसामानाधिकरण्यात् एकस्य परिच्छिन्नत्वस्य बाधितत्वात् उपाधेर्मिथ्यात्वात् इति वाच्यम् । तद्ब्रह्निर्नवह्निः, श्रुतिर्न गगनं, इत्यादि प्रतीत्यभावात् गगनादौ अविच्छिन्नत्वानवच्छिन्नत्वयोरिव ब्रह्मण्यपि अवच्छिन्नत्वानवच्छिन्नत्वयोः पारमार्थिकत्वस्य स्वीकारात् ।

ननु उपाधेरपारमार्थिकत्वे तदवच्छिन्नत्वस्य कथं पारमार्थिकत्व-मिति चेन्न उपाधेरपारमार्थिकत्वे तदवच्छिन्नत्वस्य पारमार्थिकत्वं मास्तु जगत्सत्यत्ववादिभिरस्माभिः तस्यापि सत्यत्वस्यैव स्वीकृतत्वात् ।

अन्यथा परिच्छिन्नलिङ्गत्रयोपासनया अपरिच्छिन्न परशिवाप्तिर्न स्यात् । "यद्यथेहोपासते" इत्यादि श्रुतेः । "यं यं भावं स्मरन्वापि" इत्यादि स्मृतेश्च । तथा च परशिवस्यैव स्वस्वातन्त्रशक्त्या अनेकरूपत्वात् । भक्तानुग्रहार्थं इष्टादि लिङ्गरूपेण स्थूलादिशरीरावच्छिन्नत्वं न विरुध्यते इति भावः ।

ननु परशिवस्य हृत्पुण्डरीकादि सम्बन्धस्वीकारे जीववत्तस्यापि सुखदुःखानुभवप्रसङ्ग इत्याशंक्य परिहरति—

सू. सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

भक्तचिन्तामणेः परशिवस्य स्वलीलाकृतदिव्यमङ्गलविग्रहस्य जीववत् सम्भोगप्राप्तिरिति चेन्न, वैशेष्यात् । "अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः' इत्यादिना अणुत्व-महत्व-सर्वान्तर्यामित्वादेः परमेश्वरस्यैवोपदेशात् । "तस्मिन्यदन्तस्तदुपासितव्यम्" इत्यादिना हृत्पुण्डरीकोपास्यत्वोपदेशात् "एष अपहतपाप्मा" इति अपहतपाप्मत्वनिर्देशात् जीवपरमेश्वरयोर्वैशेष्यं, विशेष एव वैशेष्यं भेद इत्यर्थः । चैतन्यस्वरूपेणैकत्वेऽपि विभुत्वाणुत्व-सर्वज्ञत्व-किञ्चिज्ञत्वादिना तयोर्भेदोऽपि स्वाभाविक इति वक्तुं शक्यते । इदमत्र ज्ञातव्यम्—ब्रह्मधर्ममायागुणरूपायाः अविद्याशक्त्या संबद्धत्वात् संकुचितस्वशक्तिरत एव ज्ञानक्रियासामरस्यात्मनश्शिवस्य अंशरूपत्वाज्जीवस्येव न शिवस्य सुखदुःखादि साक्षात्कारः सम्भवति । एतदप्यग्रे "अंशो-

नानाव्यपदेशादित्यदि सूत्रव्याख्यानावसरेवक्ष्यते । तथा च शिवस्य मायिकसत्वरजस्तमोगुणरहितत्वात् अकुण्ठितेच्छाद्यनेक कल्याणगुणपूर्णत्वात् न जीवतौल्यम् । यद्यपि शिवातिरेकेण पदार्थान्तरं नास्तीत्यङ्गीक्रियते तथापि जीवब्रह्मविभागवत् स्वविमर्शशक्त्यनादि परिकल्पित माया-संबन्धाज्जीवः तदसंबन्धाच्च शिवो भवति । यथा कुण्डलीभूतसर्पस्य दीर्घीभूतसर्पस्य ह्रस्वत्वदीर्घत्वादिना प्रभाकरप्रभातन्मण्डलयोः व्यापकत्व-परिच्छिन्नत्वादिना भेदस्वाभाविकः । पुनः कुण्डलाकारं स्वप्रयत्न-विशेषेण विहाय यथावत्सर्पो भवति, तथा जीवेशयोः किञ्चिज्ज्ञत्व-सर्वज्ञत्वादिना भेदः, शिवयोगसाधनाभ्यास प्रयत्नविशेषेण जीवत्वं विहाय शिवो भवति । अतः शिवजीवभेदाभेदयोः पारमार्थिकत्वात्, संसारदशापन्नजीवभोगादेरिव न भोग इति भावः ।

शिवस्यैव सर्वसंहारकत्वं इति दर्शयितुं अधिकरणान्तरमारभते—

अत्ता चराचरग्रहणात् ॥ ९ ॥

"यस्य ब्रह्म च क्षत्रं च उभे भवत ओदन" इत्यत्र अत्ता, संहर्ता, परमेश्वर एव, कुतः? चराचरग्रहणात् । स्थावरजङ्गमात्मकस्य चराचरस्य जगतः ब्रह्मक्षत्रशब्दाभ्यां उपलक्षणत्वेन ग्रहणादित्यर्थः । तथा च सर्वजगत्संहर्तृत्वस्य इतरस्मिन्नसंभवात् । "अनश्नन्नन्योऽभि-चाकशीति" अभोक्तृत्वप्रतिपादकश्रुतेः प्राकृतकर्मफलभोक्तृत्वनिषेध-परकत्वात् ब्रह्मणस्सर्वसंहर्तृत्वस्य सर्ववेदान्तसिद्धत्वात् तस्यैव सर्वसंहर्तृत्व-मिति भावः ।

पुनर्हेत्वन्तरमाह—

प्रकरणाच्च ॥ १० ॥

"न जायते म्रियते वा विपश्चित्" इत्यादेः असाधारण अनाद्यनन्तत्वादि धर्मावच्छिन्न ब्रह्मप्रकरणादित्यर्थः। तथा च ब्रह्म-प्रकरणपठित सर्वसंहर्तृत्वं नेतरस्योपपद्यते इति भावः।

अथेदानीं जीवब्रह्मणोः एकदेशवृत्तित्वात् बिम्बप्रतिबिम्बभावो न संभवतीत्याह—

गुहां प्रविष्टौ आत्मानौ हि तद्दर्शनात् ॥ ११ ॥

"ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ" इत्यत्र गुहां प्रविष्टौ शिवजीवौ, न तु बुद्धिजीवौ, हि यस्मात्, आत्मानौ, आत्मस्वरूपसमानस्वभावौ, तस्मादित्यर्थः। बुद्धेरात्मत्वेन साम्याभावात्। सर्वगतस्य परमात्मनः गुहाप्रवेशो न उपपद्यत इति यद्युच्येत तदा उपपत्तिमाह—तद्दर्शनादिति। "यो वेद निहितं गुहायां परमे व्योमन्" "आत्मानमन्विच्छय गुहां प्रविष्टम्" इत्यादिश्रुतिषु परमेश्वरस्यापि 'गुहाप्रवेशदर्शनात्' इत्यर्थः।

ननु "ऋतं पिबन्तौ" इत्यनेन "छायातपौ" इत्यनेन च कर्मफलभोक्तृत्वछायातपवत्परस्परवैलक्षण्ययोरुक्तत्वात् कथं शिवजीवयोः गुहाप्रविष्टत्वमिति चेन्न। छत्रिन्यायेनापि कर्मफलभोक्तृत्वस्य आत्मनो-रविरुद्धत्वात् मलसम्बन्धतदसम्बन्धाभ्यां आत्मनोः परस्परं वैलक्षण्यस्य

स्वीकृतत्वात् । एवं च शिवजीवात्मनोः गुहारूप एकदेशनिरूपितवृत्तित्वस्य कथनात् न तयोः बिम्बप्रतिबिम्बभावो युज्यते । बिम्बप्रतिबिम्बयोर्लोके एकत्रावस्थित्यभावस्य सर्वजनप्रसिद्धत्वात् ।

पुनर्हेत्वन्तरमाह—

सू. विशेषणाच्च ॥ १२ ॥

"आत्मानं रथिनं विद्धि, शरीरं रथमेव च । सोऽध्वनः पारमाप्नोति" इत्यत्र गन्तृगन्तव्यत्वेन विशेषणात् । जीवेश्वरवेव गुहाप्रविष्टौ न तु बुद्धिजीवौ रथिरथरूपविवक्षया शिवजीवयोर्विशेषणोपदेशाच्च ।

सर्वव्यापकस्य परमेश्वरस्य गुहावर्तित्वमुपदिश्य तस्यैव प्रदेशान्तरं दर्शयति—

सू. अन्तर उपपत्तेः ॥ १३ ॥

"य एष अक्षिणि पुरुषो दृश्यते । एष आत्मेति होवाच । एतदमृतमभयमेतद्ब्रह्म" इत्यादि श्रुतौ परमेश्वर एव अन्तरः अक्षिमध्यवर्ती उपदिष्टः । न तु जीवः छायात्मा वा कुतः ? उपपत्तेः । आत्मत्व अमृतत्व अभयत्व ब्रह्मत्वादीनां धर्माणां परमेश्वर एव उपपत्तेः युक्तत्वादित्यर्थः ।

सर्वव्यापकस्य परशिवस्य कथमक्षिस्थानकत्वमित्याशंकायामाह—

सू. स्थानादि व्यपदेशाच्च ॥ १४ ॥

"यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तरोऽयं चक्षुर्न वेद यस्य चक्षुश्शरीरम्। यश्चक्षुरन्तरोयमयत्येष आत्मा अन्तर्याम्यमृतः" इत्यत्र चक्षुस्थानत्वस्यापि परशिवस्य निर्दिष्टत्वात् हृदयाद्युपास्यत्ववत् अक्ष्युपस्यत्वमपि तस्यैवोपपद्यते उपासनायाः किञ्चिद्गुणविषयकत्वनियमात्। तदप्यादि शब्देनोच्यते "तस्योदितिनाम हिरण्यश्मश्रुः" इत्यादि श्रुतौ। प्राकृत गुणातीतस्य परशिवस्य नामरूपव्यपदेशात्। "तदादि मध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम्। उमासहाय परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्", "द्वावेतौ ब्रह्मणो रूपम्" इत्यादिना परस्यैव निराकारत्वसाकारत्वावगमात् न तयोस्तत्रविरुद्धत्वं शङ्कनीयम्।

इतश्च अक्ष्यन्तः पुरुषः साक्षाच्छिव एवेति निर्दिशति—

सू. सुखविशिष्टाभिधानादेव च ॥ १५ ॥

सुखविशिष्टस्य परब्रह्मणः "प्राणो ब्रह्म" इत्यादि उपक्रमवाक्ये श्रूयमाणत्वात् इहापि तस्यैवाभिधानात्। "आचार्यस्तु ते गतिं वक्ता" इति श्रुत्या गतिमात्रस्यैव प्रतिज्ञानात् नान्यस्योपास्यत्वम्। "एतं हि सर्वाणि वामान्यभिसंयन्ति" इत्यत्रापि सुखविशिष्टाभिधानात ब्रह्मैवोपास्यम्। "प्राणं च हास्मै तदाकाशं चोचुः" इति श्रुत्या कं शब्दस्य खं शब्दस्य च ब्रह्मप्रतीकभूताकाशार्थस्य प्रतिपादनात् नार्थान्तरमुपास्यत्वेनोपदिष्टम्।

पुनर्हेत्वन्तरमाह—

सू. श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

श्रुतौ अभ्यस्ता उपनिषत् आत्मविद्या, येन तस्य या ब्रह्मविदः गतिः, देवयानाख्या, तस्याः अभिधानात्। "ते अर्चिषमभिसंभवन्ति" इत्युत्तरवाक्ये कथनादित्यर्थः तथा च सैवगतिः, इहोपकोसलस्य अक्षिपुरुष विदः उपदिश्यमाना दृश्यते । तस्मात् अक्षिपुरुषस्य ब्रह्मत्वं सिद्धम्।

आसन्नर्थे हेत्वन्तरमाह—

सू. अनवस्थितेरसम्भवाच्च नेतरः ॥ १७ ॥

इतरः छायापुरुषादिः न अक्ष्यन्तः पुरुषो भवति। कुतः अनवस्थितेः। उपासकस्य सर्वत्र छायासम्पादक पुरुषान्तरस्य असान्निध्यात्। असम्भवाच्च अमृतत्वादि गुणानामसम्भवच्चेत्यर्थः। अक्ष्यन्तः पुरुषश्शिव एवेत्यर्थः।

सर्वगतस्य शिवस्य चक्षुरन्तरोपास्यत्वमुपदिश्य सर्वान्तरोपास्यत्वमप्याह —

सू. अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरोऽयं पृथिवी न वेद यस्य पृथिवी शरीरम्। यः पृथिवीमन्तरो यमयत्येष त आत्मा अन्तर्याम्यमृतः" इत्यादि "य इमं च लोकम्" इत्याद्युपक्रम्य अन्तर्यामि ब्राह्मणवाक्यं श्रूयते। तत्र अधिदैवादिषु पृथिव्यादिषु यः अन्तर्यामी उक्तः सः परशिव एव, कुतः? तद्धर्मव्यपदेशात्। तस्य परशिवालिङ्गस्य

धर्माणां पृथिव्याद्यधिदेवतानियन्तृत्व अमृतत्वात्मत्वादीनां व्यपदेशात् कथना दित्यर्थः ।

ननु परमशिवस्य ब्राह्मणः निर्धर्मकस्य यमयितृत्वासम्भवात् शुद्धसत्त्वप्रधानमायाप्रतिबिम्बरूपेश्वरस्यैव सर्वनियन्तृत्वादिकमिति चेन्न । तादृश प्रतिबिम्बे अन्तर्याम्यमृत इत्युक्त अमृतत्वासम्भात् । तस्मादनन्तस्य शिवस्यैव सर्वनियन्तृत्वसम्भवात् । न च सर्वनियन्तृत्व सर्वकतृत्वादि धर्मानवच्छिन्नस्य शिवान्यस्यैव परब्रह्मत्वम् इति वाच्यम् । तादृश निर्धर्मकस्य स्वस्वरूपज्ञानरहितस्य स्फटिकशिलादि वज्जडत्वापत्तेः । तत्सत्वे प्रमाणाभावाच्च अण्डरसन्यायेन स्वविमर्शशक्त्यविभागपरामर्शदशायां तस्यैव निर्गुणत्वं विभागपरामर्शदशायां च सगुणत्वमिति वक्तुं शक्यत्वात् ।

ननु "विश्वाधिको रुद्र" इत्यादौ विश्वाधिकत्व निर्देशात् विश्वान्तर्यामित्वं कथमुपपद्यते इति चेन्न । व्योमवत्परिपूर्णस्य महेश्वरस्य विश्वाधिकत्व विश्वान्तर्यामित्वयोरविरोधात् ।

ननु नियन्तृत्वमित्यत्र नियमनं, चेतनसान्निध्यात् जडस्य व्यापारः, तच्छक्तिमत्वं नियन्तृत्वं तच्च अचिन्त्यमायाशक्तेश्चिदात्मनः शरीरं विनैवोपपन्नम् । निर्गुणपरब्रह्मणः इति चेन्न । भवन्मते ब्रह्मातिरिक्तस्य वस्तुनो अभावात्; तत्सान्निध्यस्यासम्भवात् ।

किञ्च–नियामकस्यापि नियामकान्तराङ्गीकारे अनवस्था प्रसङ्गः । न च तयोर्भेदाभावात् नानवस्थेति वाच्यम् । मिथ्याभूतसत्ययोरत्यन्त-

भिन्नत्वात् । उपध्यवच्छिन्नानवच्छिन्नयोः भेदस्य मिथ्यामायावादि स्वीकृतत्वात् । अन्यथा तत्त्वमस्यादिवाक्ये लक्षणानुपपत्तेः । तस्मात् सर्वनियन्तृत्वकर्तृत्व सर्वज्ञत्वादि धर्मविशिष्टस्यैव परब्रह्मणशिवस्य सर्वान्तर्यामित्वं सिद्धम् ।

ननु महदहंकारादिरूपेण परिणामित्वात् साङ्ख्योक्त प्रधानस्यैव अन्तर्यामित्वमस्तु इत्यत्राह—

सू. न च स्मार्तं अतद्धर्माभिलापात् ॥ १९ ॥

स्मार्तं सांख्यस्मृतिनिर्दिष्टं प्रधानमित्यर्थः । चकारात् तत्सत्वगुण प्रतिफलितं चैतन्यमपि ग्राह्यम्. न अन्तर्यामि भवति । कुतः ? अतद्धर्माभिलापात् । प्रधानादि भिन्न परशिवधर्माणां अभिलापादित्यर्थः ।

'अदृष्टो द्रष्टा, अश्रुतश्श्रोता, अमतो मन्ता, अविज्ञातो विज्ञाता' इत्यत्र उक्त अदृष्टत्वादीनां प्रधाने सत्वेऽपि द्रष्टृत्वादीनां तत्रासत्वात् । न प्रधानस्यान्तर्यामित्वम् ।

"ननु अजामेकां" इत्यादि श्रुतौ प्रपञ्चकारणत्वस्य निर्देशात् ब्रह्मसम्बन्धमात्रेण सूर्यकान्तादाविव तत्र प्रवृत्तिसम्भवात् । तस्यैव अन्तर्यामित्वं वक्तुं शक्यते इति चेन्न । "सऽकामयत बहुस्यां प्रजायेय", "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादिना परशिवस्यैव ब्रह्मण अन्यनिरपेक्षतया जगज्जन्मादि हेतुत्वावगमात् । किञ्च-तत्प्रतिबिम्बतेश्वरस्यापि नान्तर्यामित्वम् । तस्य मिथ्यात्वात् । ब्रह्मप्रधानयोर्नीरूपत्वात् बिम्बप्रतिबिम्बभावकल्पनाया असम्भवात् ।

"अखण्डाद्वैतभानेतु सर्वं शिवमयं जगत्।" "सर्वं खल्विदं ब्रह्म" इत्यादि वाक्येन निर्दिष्टं जगतः परब्रह्मशिवस्वरूपत्वं मिथ्याभूतमाया तत्प्रतिफलित ईश्वरोपादानकत्वे नैव सम्भवति। तस्माद्विश्वात्मक परशिवस्यैव सर्वविश्वान्तर्यामित्वं सिद्धम्।

ननु जीवस्य चेतनत्वात् द्रष्टृत्वादि धर्माणां तत्र सम्भवात्तस्यैव आन्तर्यामित्वं कुतो न भवतीत्याशङ्कायामाह—

सू. शारीरश्चोभयेऽपि हि भेदेनैन मधीयते ॥ २० ॥

शरीरश्च जीवोऽपि नेत्यनुवर्तनं अन्तर्यामि न भवति। कुतः? एनं जीवं उभयेऽपि काण्वामाध्यन्दिनाश्च भेदेन अन्तर्यामि भिन्नतया यथा—"यो विज्ञाने तिष्ठन्" इती काण्वा, "य आत्मनि तिष्ठन् इति माध्यन्दिनाः" अधीयते पठन्ति। अत्र विज्ञानात्मशब्दयोः जीवपरत्वात् जीवस्य प्रतिबिम्बरूपत्वे आत्मशब्दवाच्यत्वं न स्यात्। तस्य मिथ्यात्वात्। तत्त्वज्ञानेन उपाधिनाशे मोक्षः इत्यङ्गीकारे जीवेश्वरयोर्नाश एव मोक्ष इति सम्पद्यते। अतो बौद्धादिमतप्रवेशापत्तिः। आत्महननमपुरुषार्थः इति अपुरुषार्थत्वापत्तिश्च।

ननु घटाकाशोपाधिभूत घटस्य नाशे तस्य आकाशमात्रवत् अन्तःकरणावच्छिन्न चैतन्यस्योपाधिभूत अन्तःकरणनाशे तदवच्छिन्न चैतन्यं चैतन्यमात्रं भवति। कुतो दोषप्रसक्तिरिति चेत्। तस्य जीवत्वाङ्गीकारे घटाद्यवच्छिन्न चैतन्यस्यापि जीवत्वापत्तेः उपाध्योर्जडत्वाविशेषात्। तस्मात् अजडान्तःकरणविशिष्टस्य जीवत्व वाच्यम्। अत

एव " चित्तमात्मेति शिवेन सूत्रितम् । अन्यथायमात्मनि तिष्ठन्निति " अन्तर्यामि ब्राह्मणवाक्यविरोधः स्यात् ।

ननु "नान्यतोऽस्ति द्रष्टा" इत्यादिना परमेश्वरात् अन्यद्रष्ट्रादेरभावस्य ज्ञायमानत्वात् द्रष्टृद्वयं एकस्मिन् शरीरे नोपपद्यत इति चेन्न । " द्वा सुपर्णेति " मन्त्रेण जीवब्रह्मणोस्सामानाधिकरण्यस्य निर्दिष्टत्वात् नान्यतोऽस्ति द्रष्टेति श्रुत्या अधिष्ठात्रन्तरो निषिद्धः । न तु किञ्चिज्ञ जीवोऽपि । "यत्र हि द्वैतमिव भवति" इत्यनेन जीवब्रह्मणोः सङ्कुचित स्वशक्त्यवस्थायां स्वाभाविकभेदो निर्दिष्टः यत्रत्वस्य " सर्वमात्मैवाभूत् तत्केन कं पश्येत् " इत्यादिना विकसितस्वशक्तिदशाय तयोः स्वाभाविको अभेदः ।

नन्वेतादृशमोक्षदशायां अभेदस्यैव स्वीकारे भेदस्य स्वाभाविकत्वं न सिध्यति इति चेन्न ।

तत्रापि " सदा पश्यन्ति " " मम साधर्म्यमागताः " " मुक्तानां परमा गतिः " " सायुज्यं प्रतिपन्नाय ', " यस्मिन् पदे विराजन्तो मुक्ता संसारबन्धनैः " इत्यादिना भेदस्य ज्ञायमानत्वात् उक्तः ।

एवं च समस्तवेदान्तानां भेदाभेदप्रतिपादकत्वात् । जीवब्रह्मणो भेदाभेदावपरमार्थिकाविति वाच्यम् । तस्मात् सर्वान्तर्यामित्वं शिवस्यैव सिध्यति तस्यैव सर्वनियामकत्वात् ।

परशिवस्य सर्वश्रेष्ठत्वं दर्शयितुं अधिकरणान्तरमारभते—

सू. अदृश्यत्वादिगुणको धर्मोक्तेः ॥ ११ ॥

" यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं, तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः " इत्यादि-श्रुतौ अदृश्यत्वादि गुणको परमेश्वर एव । कुतः धर्मोक्तेः ।" "यस्सर्वज्ञस्सर्वविदि" त्यादिना परशिवासाधारणसर्वसाक्षित्वादि धर्माणां उक्तेः वचनादित्यर्थः ।

अस्मिन्नर्थे हेत्वन्तरमाह—

सू. विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

इतरौ प्रकृतिजीवौ न भूतयोनिशब्दवाच्यौ । कुतः? विशेषणभेदव्य-पदेशाभ्याम् । विशेषणं च भेदव्यपदेशश्च ताभ्यां " दिव्योह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः । अप्रणो ह्यमानश्शुभ्रो ह्यक्षरात्परतः शिवः " इत्यत्र दिव्यत्व अप्राणत्वादि विशेषणात् । अक्षरात्परतः पर इत्यनेन च भेदव्यदेशाच्च " क्षरं प्रधानं अमृताक्षरं हरः । क्षरात्मना वीशते देव एकः " इति श्रुत्या जीवस्य अक्षरशब्दवाच्यत्वात् " कूटस्थोऽक्षर अच्यते " इति स्मृतेश्च ।

पुनरपि हेत्वन्तरमाह—

सू. रूपोपन्यासाच्च ॥ २३ ।

भूतयोनिः परशिव एव। कुतः, रूपोपन्यासाच्च 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशश्श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वान्तरात्मा' इत्यादि श्रुतौ परमेश्वरस्य सर्वभूतान्तरत्वस्य सर्वात्मकत्वस्य च रूपस्य उपन्यासात् प्रधानजीवयोः सर्वभूतान्तरत्व सर्वात्मकत्वयोरयोगात् अदृश्यत्वादिगुणकः परमेश्वर एवेति सिद्धम्।

परशिवस्य विश्वकारणत्वादि धर्मानुद्दिश्य वैश्वानर परमेश्वरः इत्याह—

सू. वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" इत्यादि श्रुतौ वैश्वानरः परमेश्वर एव उपास्यत्वेन निर्दिष्टः।

ननु "अयमग्निर्वैश्वानरो येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति। यमेतत्कर्णावपिधाय शृणोति" इति बृहदारण्यकश्रुत्या वैश्वानरशब्दस्य जठराग्नौ प्रयोगदर्शनात् "एष वाग्निर्वैश्वानरः" इत्यादिना प्रसिद्धभूताग्न्यादौ वैश्वानरशब्दस्य वर्तमानत्वात्। किञ्च" "प्रादेशमात्रं" इत्यनेन वैश्वानरशब्दवाच्यस्य परिच्छिन्नत्वावगमात् परमेश्वरस्य तदसम्भवात् न वैश्वानरः इतिचेन्न। साधारणशब्दविशेषात् साधारणशब्दयोः वैश्वानरात्मशब्दयोः विशेषात्। वैश्वानरशब्दस्य

जाठरभूताग्न्यादि साधारण्येऽपि आत्म शब्दस्य जीवपरसाधरण्येऽपि च "कोऽनात्मां"? किं ब्रह्म? इति "आत्मानमेवेमं वैश्वानरं संप्रत्यध्येऽषि। तमेव नो ब्रूहि" इत्यादिषु परमेश्वरमात्रवृत्ति ब्रह्मादिशब्दप्रयोगादित्यर्थः

अत्रैव हेत्वन्तरमाह—

सू. स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

"अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ" विति। "अग्निरास्यं द्यौर्मूर्धे" त्यादिषु याद्वश्वरूपत्वं स्मर्यमाणं प्रतिपाद्यमानं तत् अनुमानं स्यात्। परमेश्वर एव वैश्वानर इत्यत्रानुमानकं स्यादित्यर्थः। तथा च विश्वरूपत्वादिधर्मस्य परमेश्वरादन्यत्र जठरादावनुपपद्यमानत्वात्। वैश्वानरः परमेश्वर एवेति सिद्धम्।

पुनर्हेत्वन्तरमाह—

शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ॥ २६ ॥

ननु वैश्वानरशब्दादिभ्योऽन्तः प्रतिष्ठानात् "सयोह्वैनमग्निं वैश्वानरं पुरुषोऽन्तः प्रतिष्ठितं वेद" इत्यत्र पुरुषान्त प्रतिष्ठितत्वस्येश्वरेऽसंभवात् ईश्वरादन्य एव वैश्वानर इति चेन्न। तथा दृष्युपदेशात्। तथा जाठराग्न्यवच्छिन्नस्य शिवस्य दृष्टेरुपासनया उपदेशात् कथनात्।

असम्भवात् परमेश्वरादन्यस्मिन् द्युमूर्धत्वादीनां धर्माणामसम्भवात। पुरुषमपि चैनं एनं वैश्वानरं पुरुषमधीयते वाजसनेयिन.। "सयो हैनमेवाग्नि" मित्यादिना।

अन्यत्रानुपपत्तिमाह—

अत एव न देवताभूतश्च ॥ २७॥

अत एव प्रागुक्तद्युमूर्धत्वादिधर्माणां असम्भवादेव भूतं प्रसिद्ध-भूताग्निः, देवता, तदभिमानि देवता च एतद्वयमपि, न, वैश्वानर-शब्दवाच्यमित्यर्थः। तथा च सर्वान्तर्यामित्व सर्वात्मकत्व द्युमूर्धत्वादि-धर्माणां शिवादन्यत्रानुपपन्नत्वात् स एव वैश्वानरः इति भावः

जाठराग्न्यवच्छिन्नस्य शिवस्य उपास्यत्वमुक्त्वा केवल शिवस्य उपास्यत्वमित्यस्मिन् अर्थे आचार्यमतं दर्शयति।

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

साक्षात् जाठराग्न्यविशिष्टे केवलब्रह्मण्यपि अविरोधं, वैश्वानरशब्दस्य विरोधराहित्यं, जैमिनिः, मन्यते इत्यर्थः। विश्वश्चासौ नरश्च विश्वनरः विश्वरूपः परशिवः विश्वनर एव वैश्वानरः। तथा च विश्वरूपपरशिवे वैश्वानरशब्दस्य योगव्युत्पत्त्या वृत्तिसम्भवात् वैश्वानर-शब्दवाच्यः सर्वव्यापकः परशिव एव। "रुद्रो वा एष यदग्निः। तस्यैते तनुवौ घोरान्या शिवान्या" इति श्रुतौ अग्नेः साक्षात्परशिवा-

त्मकत्वोपदेशात् । अग्रं नयतीति व्युत्पत्त्या च अग्निशब्दवाच्योऽपि सर्व-श्रेष्ठः परशिव एव ।

ननु व्यापकस्य प्रादेशिकत्वं कथं उपपन्नस्यादित्यशङ्कायांमाश्मरथ्य-मुनिमतं दर्शयिति—

अभिव्यक्तेराश्मरथ्यः ॥ २९ ॥

अपरिमितस्यापि परब्रह्मणश्शिवस्य प्रादेशमात्रपरिणामवत्वप्रात-पादक श्रुतिरुपपद्यते । कस्मात् अभिव्यक्तेः, परशिव एव भक्तानु-ग्रहार्थं हृदयादिप्रदेशविशेषेषु अभिव्यज्यते ।

"सर्वानन शिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी च भगवान् तस्मात् सर्वगतः शिवः" इति श्वेताश्वतरश्रुतावपि सर्वगतस्यापि भक्तो-पासनार्थं परिच्छिन्नत्वं व्यपदिश्यते । तस्मादत्रापि प्रादेशिकत्वं न विरुध्यते इति भावः ।

अस्मिन् अर्थे आचार्यान्तरमतं दर्शयति—

अनुस्मृतेर्बादरिः ॥ ३० ॥

"अनुस्मृतेः हृदयादि प्रदेशविशेषेषु परशिवस्यावगमात् सः परमेश्वरः प्रादेशमात्रः इत्युच्यते । यथा आढकादि परिमितं तण्डुलादिकं आढकादिकमित्युच्यते तथा प्रदेशावगतः परमेश्वरः प्रादेश" इति बादरिराचार्यो मन्यते ।

इतश्च सर्वगतस्य शिवस्य परिच्छिन्नत्वं न विरुध्यते इत्यत्र जैमिनिमतमाह—

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

प्रादेशमात्र श्रुतिः प्रादेशमात्रसंपत्तेरुपपद्यत इति जैमिनिराह। तथाहि वैश्वानरस्य प्रादेशमात्रत्वे श्रुत्यन्तरं दर्शयति। वाजसनेय ब्राह्मणे इत्यर्थः। "प्रादेशमात्रमिह वै देवास्सुविदिता अभिसम्पन्नास्तथा तु वा एतान् वक्ष्यामि। यथा प्रादेशमात्रमेवाभिसम्पातयिष्यामीति"। सहोवाच "मूर्धानमुपदिशन्नुवाच", एष एवावतिष्ठन्वैश्वानर" इति। चक्षुष्युपदिशन्नुवाच। एष वै सुतेजा वैश्वानर इति। नाशिके उपदिशन्नुवाच। एष वै पृथग्वर्त्मात्मा वैश्वानर इति। मुख्यमाकाशमुपदिशन्नुवाच। एष वै बहुलो वैश्वानर इति। अप उपादिशन्नुवाच। एष वै रयिर्वैश्वानर इति। चुबुकमुद्दिशन्नुवाच। एष वै प्रतिष्ठा रयि वैश्वानर" इत्यादिना द्युलोकप्रभृतिषु वैश्वानरावयव मूर्धादि सम्पत्तेर्दर्शनात्। जैमिनिः परशिवब्रह्मणः प्रादेशमात्रत्वमविरुद्धमिति मन्यते।

पुनर्हेत्वन्तरमाह—

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

एनं सर्वव्यापकपरशिवं अस्मिन् भ्रूमध्यादौ आमनन्ति जाबालादयः इति शेषः। कस्मिन् प्रतिष्ठित इति प्रश्ने वरणायां नास्यां च प्रतिष्ठित

इति । का वै वरणा का च नासीति सर्वानिन्द्रियकृतान् दोषान् वारयति। तेन वरणा भवतीति। सर्वानीन्द्रियकृतान् दोषान् नाशयति तेन नाशी भवतीति निरुच्य, कतमच्चास्य स्थानं भवतीति भ्रवोर्घ्राणस्य च यस्सन्धिः। स एव द्युलोकस्य च परस्य च सन्धिर्भवतीति। जाबालश्रुतौ परशिवस्य प्रादेशमात्रत्व व्यपदेशात् परशिवस्य जाठराग्न्यवच्छिन्नतया उपास्यत्वेन वैश्वानरश्शिव एव सर्ववेदान्तेषु प्रायेण परोपासनस्यैव निर्दिष्टत्वात् शिवलिङ्गव्यतिरिक्ते परब्रह्मशब्दवाच्यत्वस्य गगनकुसुमायमानत्वात् वैश्वानरशब्दवाच्यं शिवलिङ्गमेवेति सिद्धम्।

इति श्रीमच्छिवाद्वैतप्रतिपादिकायां शाङ्करीवृत्तौ समन्वयाध्यायस्य द्वितीयः पादः समाप्तः।

तृतीयः पादः

केषाञ्चित् श्रुतिवाक्यानां षड्विधलिङ्गतात्पर्येण सर्वजगन्मय सर्वज्ञ-परशिवब्रह्मणि समन्वयप्रकारं निरूप्य पुनः केषाचिद्वाक्यानां संशयनिरसनाय सर्वज्ञसार्वभौमेण व्यासेन तृतीयः पादः प्रारभ्यते ।

सू. द्युभ्वाद्यायतनं स्वशब्दात् । १ ॥

द्यौश्च भूश्च द्युभुवौ ; द्युभुवौं आदी यस्य तत् द्युभ्वादि तस्य । "यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः" इत्यत्र, सूत्रे मणिगणा इव पृथिव्यन्तरिक्षमनःप्राणादिजगतः, ओतत्वविशिष्टस्य आयतनं स्थानं ब्रह्म भवति, न तु प्रधानक्षेत्रज्ञ भूतवायूनां आयतनत्वं सम्भवति स्व शब्दात् तस्मात् "तमेवैकं जानथ आत्मानं" इति । आत्मशब्दश्रवणादित्यर्थः ।

किञ्च "प्रपञ्चोपशमं शान्त शिवमद्वैत चतुर्थं मन्यन्ते । स आत्मा स विज्ञेयः । इति माण्डूक्यश्रुतावपि आत्मशब्दस्य परशिव परत्वात् नेतरो द्यभ्वाद्यायतनं भवितुमर्हति ।

ननु "ह प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मानमन्यावाचो मुञ्चथामृतस्यैष सेतुः" इत्यत्र सेतु शब्दनिर्देशात् सेतोश्च पारवत्वोपपत्तेः ब्रह्मणस्तदनुपपत्तेः ; अनन्तमपारमिति श्रवणात् शिवादन्यस्य द्युभ्वाद्यायतनत्वं स्यादित्याशङ्कायां हेत्वन्तरमाह —

सू. मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

मुक्तैरुपसृप्यं मुक्तोपसृप्यं आणवमायीयकार्मिक मलत्रयदोषादिमुक्तैः-

मलत्रयं चोक्तमध्यात्मनये—

गोपितस्स्व महिम्नोऽस्य संमोहाद्विस्मृतात्मनः ।
यस्संकोचस्स एवास्य आणवो मल उच्यते ॥ १ ॥
ततष्षट् कञ्चुकव्याप्तिविलोकितनिजस्थितेः ।
भूतदेहे स्थितिर्यासौ मायीयो मल उच्यते ॥ २ ॥
यदन्तःकरणाधीनारब्धकर्मेन्द्रियादिभिः ।
बहिर्व्याप्रियते कार्मं मलमेतस्य तन्मतम् ॥ ३ ॥ इति ।

उपसृप्यं, प्राप्यं ब्रह्म द्युभ्वाद्यायतनं तस्य प्राप्यत्वस्य व्यपदेशात् ।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

इत्युक्त्वा 'यथा नद्यस्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरुपे विहाय; तथा विद्वान् नामरुपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं" "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" इत्याद्यै। "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवत्यत्र

ब्रह्म समश्नुते" इत्यादौ च ब्रह्मणः मुक्तोपसृप्यत्वस्य प्रसिद्धत्वात्। प्रधानादेर्मुक्तोपसृप्यत्वस्य क्वचिदप्यदर्शनात् द्युभ्वाद्यायतनं ब्रह्मैव।

पुनर्हेत्वन्तरमाह—

सू॰ नानुमानमतच्छब्दात् ॥ ३ ॥

अनुमानं प्रधानं न द्युभ्वाद्यायतनं भवति। कुतः? अतच्छब्दात् प्रधानप्रतिपादकशब्दाभावात्। "यस्सर्वज्ञस्स सर्ववित्" इति श्रुत्युक्त सर्वज्ञत्वादि धर्माणां अचेतनप्रधान वाच्यावसत्वात्। सर्वकारण सर्वाधिष्ठान परशिवस्यैव द्युभ्वाद्यायतनत्वम्।

नन्वचेतनत्वात् प्रधानस्य तदायतनत्वाभावेऽपि जीवस्य किं न स्यादित्याशंक्याह—

सू॰ प्राणभृच्च ॥ ४ ॥

प्राणभृज्जीवोऽपि द्युभ्वाद्यायतनो न भवति। अतच्छब्दादिति पूर्वोक्त हेतुरेवानुकृष्यते। यद्यपि जीवस्य चैतन्यमात्मशब्दवाच्यत्वं च दृश्यते; तथापि "एषोऽणुरात्मा चेतसा वेदितव्यः" "वालाग्रशतभागस्य शतधा कल्पितस्य च। जीवो भागस्सविज्ञेयः" इत्यादि श्रुतिषु जीवस्य परिच्छिन्नत्वादि व्यपदेशादेवातच्छब्दत्वं सर्वव्यापक स्वस्वातन्त्र्यशक्तिविशेषस्यैव द्युभ्वाद्यायतनत्वम्।

हेत्वन्तरमाह—

सू. भेदव्यपदेशाच्च ॥ ५ ॥

इतश्च जीवो द्युभ्वाद्यायतनो न भवति । कुतः ? भेदव्यपदेशात् ; भेदव्यपदेशः तस्मादित्यर्थः "तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथ" इत्यादौ जीवब्रह्मणोः ज्ञातृज्ञेयत्वादिभिः स्वाभाविक-भेदस्य व्यपदेशात् । किञ्चिज्ज्ञस्य जीवस्य प्राणभृतः मुमुक्षुत्वात् ज्ञातृत्वं, ब्रह्मणः ज्ञेयत्वं, तस्यैव द्युभ्वाद्यायतनत्वं न जीव-स्येत्यर्थः ।

पुनश्शिवस्यैव द्युभ्वाद्यायतनत्वमित्याह—

सू. प्रकरणात् ॥ ६ ॥

प्रकरणं तावत् परशिवब्रह्म एवेदम् । "तस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा श्रुतेः जीवप्रधानादीनां ज्ञानेन सर्वज्ञानासम्भवात् तेषां सर्वोपादानत्वाभावात् परमशिवज्ञानेन सर्वविज्ञानसम्भवात् तस्य सर्वजगदुपादानत्वात् । दर्शपूर्णमासादि प्रकरणपठित "समिधो यजति" इत्यादि वाक्यानामिव परशिवब्रह्मप्रकरणपठित भेदाभेदप्रतिपादक समस्तवेदान्त वाक्यानां परशिवपरकत्वात् शिवप्रकरणमेवेदम् ।

ननु "नेऽह नानास्ति किञ्चन" इत्यादि श्रुत्या सर्वप्रपञ्चनिषेधस्य अवगम्यमानत्वात् सर्ववेदान्तानामुपक्रमोपसंहारादि षड्विधलिङ्गतात्पर्येण निर्विशेषब्रह्म परत्वमेवेति चेन्न । "नेऽह नानास्ति किञ्चन" इति

श्रुत्या सर्वस्य शिवात्मकत्व बोधनात् न प्रपञ्च निषेधोऽभ्युपगम्यते। अन्यथा "आत्मैवेदं जगत्सर्वं" "सदेव सौम्येदमग्र आसीत्" "ज्ञाऽज्ञौ द्वावजावीशानीशौ" "सर्वं खल्विदं ब्रह्म" इत्यादि श्रुतीनामप्रामाण्यं स्यात्। तस्मात् निर्विशेषब्रह्माद्वैतवादोऽवैदिकः।

ननु "एकमेवाद्वितीयं ब्रह्म" इत्यादिना ब्रह्मणः स्वगत सजातीय विजातीय भेदत्रयरहितत्वस्य सिद्धत्वात् कथमवैदिक इति चेन्न। तस्याः "सर्वं शिवमयंजगत्" "सर्वं खल्विदं ब्रह्म" "लिङ्गमध्ये जगत्सर्वं त्रैलोक्यं सचराचरम्" इत्यादि वाक्यानामिव शिवस्य सर्वजगदात्मकत्वे तात्पर्यात्। अन्यथा भवदभिमतार्थस्य एकेनैवपदेन निर्वाहे पदद्वयस्यानर्थक्यं स्यात्। न च तवाप्येतत्समानमिति वाच्यम्। पदद्वयस्य "सर्वं शिवमयं जगत्" इत्यस्मिन्नर्थे आदरातिशयार्थत्वात्।

किञ्च—"शिव एको ध्येयश्शिवङ्करः सर्वमन्यत्परित्यज्य" "ज्ञात्वा शिवं शान्तमत्यन्तमेति" इत्याभ्यां श्रुतिभ्यां शिवशब्दवाच्य स्वप्रकाशिता शक्तिविशिष्टस्यैव ब्रह्मणः ध्येयत्व ज्ञेयत्वदर्शनात्। तद्ज्ञानस्यैव अत्यन्तशान्तिहेतुत्वव्यपदेशात् "ईशं ज्ञात्वा अमृता भवन्ति" इति श्रुत्या ईशितृत्वशक्तिविशिष्टस्य ज्ञानादमृतत्वश्रवणात्" "ज्ञाननिर्मथनाभ्यासात् पाशं दहति पण्डितः" इत्यादिना शिवज्ञानस्यैव मुक्तिहेतुत्वात् निर्विशेष निश्शक्तिक ब्रह्मज्ञानस्याप्रयोजकत्वात् द्युभ्वाद्यायतनं परमशिव एवेति सिद्धम्।

अपि च परशिवपरत्वे हेतुमाह—

सू. स्थित्यदनाभ्यां च ॥ ७ ॥

द्युभ्वाद्यायतनं परशिव एव, कुतः ? स्थित्यदनाभ्यां च। स्थितिश्च अदनश्च, स्थित्यदने, ताभ्यामिति, स्थित्यदनयोः पञ्चम्यन्तपदोपस्थाप्यत्वम् "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचकाशीति" अस्मिन्मन्त्रे कर्मफलभोक्तृत्वं जीवस्य, तत्साक्षित्वेन स्थितिमत्वं च परमेश्वरस्य निर्दिश्यते। तस्माद्युभ्वाद्यातनं परमेश्वर एव भवति। अन्यथा शिवजीवयोर्भेदप्रतिपादकश्रुतेरसङ्गतत्वं स्यादित्यर्थः।

ननु "एक एव रुद्रो न द्वितीयाय तस्थे" इत्याद्यनेक श्रुतिभिः सर्वप्रपञ्चनिषेधपूर्वक ब्रह्माद्वैतस्य व्यवस्थापितत्वात्। "द्वासुपर्णा सयुजा" इति श्रुतिसिद्ध शिवजीवयोर्भेदस्य न पारमार्थिकत्वमिति चेन्न। सृष्टेः पूर्वं अण्डरसन्यायेन सर्व प्रपञ्चस्य अविभागपरामर्शदशायां व्यक्तमूर्तामूर्तोभयप्रपंचाभावात् अद्वितीयत्व निर्गुणत्व प्रतिपादक श्रुतीनां तद्दशापरत्वं वक्तव्यम्। भेदप्रतिपादक श्रुतीनां विभागदशापरत्वं इत्यस्मिन्नाशये "नान्यः कश्चिन्मर्त्यो व्यतिरिक्तः" "आत्मा वा इदमग्र एवासीत् नान्यत् किञ्चनमिषत्" "सदेव सौम्येदमग्र आसीत्" "यदा तमस्तन्न दिवा न रात्रिः न सन्नचा सच्छिव एव केवलः, अहमेकः प्रथममासं वर्तामि च भविष्यामि च" इत्यथर्वशिरस्तैत्तिरीय, छान्दोग्य श्वेताश्वतरादिश्रुतयस्सन्ति।

ननु सृष्टेः प्राक् जगत्कारण प्रकृतेः परशिवसद्भावात् कथं तदाद्वैतमिति चेन्न । "देवात्मशक्तिं स्वगुणैर्निगूढां", "पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च" इत्यादि श्रुतिषु शक्तिशक्तिमतोरभेददर्शनात् । उक्तं च वायुसंहितायां "शक्त्यादि च पृथिव्यन्तं शिवतत्वसमुद्भवम् । तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा" "परास्य विविधा शक्तिः प्रबोधानन्दरूपिणी । एकानेकस्वरूपेण भाति भानोरिव प्रभा" इति वदन्ति च अभियुक्ता अपि— "शक्त्योश्च जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः । शक्तिस्तु शक्तिमद्रूपात् व्यतिरेकं न गच्छति । तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव । शक्तिशक्तिमतोर्यस्मादभेदस्सर्वदा स्थितः । अतस्तद्धर्मधर्मित्वात् पराशक्तिः परात्मनः । न वह्नेर्दाहिका शक्तिर्व्यतिरिक्ताविभाव्यते" इति ।

तथा च जगदाकारस्वविमर्शशक्तेः शिवाभिन्नत्वात् तादृशशक्तिः परिकल्पितस्वसंकोचापरपर्यायाख्यात्यात्मक अविद्याशक्तिविशिष्टस्य सच्चिदानन्दात्मनः जीवत्व किञ्चिज्ञत्व अणुत्वादयस्स्वाभाविकधर्माः सृष्ट्युत्तरकालावच्छेदेनेति ज्ञायन्ते । तथा च भेदप्रतिपादक श्रुतीनां एतत्कालपरत्वं वक्तव्यम् । एवं च द्युभ्वाद्यायतनत्वस्य जीवस्य वक्तव्यत्वे भेदश्रुतेरसङ्गतिस्स्यादित्यतो । महेश्वर एव द्युभ्वाद्यायतनम् ।

मुक्तोपसृप्यत्वेन निर्दिष्टस्य द्युभ्वाद्यायतनस्य परशिवस्य साक्षात्कारवतः निरतिशयसुखं दर्शयितुमाह—

३. भूमासंप्रसादादध्युपदेशात् ॥ ८ ॥

"यो वै भूमा तत्सुखमि"ति भूम्नस्सुखस्वरूपं श्रूयते। तल्लक्षणन्तु "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" इत्यनेन निर्दिश्यते। अत्र भूमा प्राण एव भवितुमर्हति। तत्रापि सुखस्वरूपस्य सत्वात् "प्राणो वा अमृत"मिति श्रवणात्। "यत्र नान्यत्पश्यति" इति श्रुतिविहित लक्षणमपि सुषुप्त्यवस्थायां सर्वव्यापार निवृत्तिदर्शनात् सम्भवति।

ननु "श्रुतं ह्येव भगवद्दृशेभ्यस्तरति शोकमात्मविदि"ति "सोऽहं भगव शोचामि तं मा भगवांश्शोकस्य पारं तारयतु" इति ब्रह्मलिङ्गबाहुल्यात् महेश्वर एव भूमा इति चेन्न। "प्राणो ब्रह्मेति" नारद-सनत्कुमारप्रश्न प्रतिवचन द्योतनात्। तथा हि अस्ति भगवो नाम्नो भूयः" इति। "वाग्वाव नाम्नो भूयसि" इति। "अस्ति भगवो वाचो भूयः" इति। मनो वाव वाचो भूय" इति च भूयः प्रश्नप्रतिवचनाभ्यां प्राण एवात्र भूमशब्दनिर्दिष्टः इति चेदुच्यते।

भूमा परमेश्वर एव। कुतः? संप्रसादादध्युपदेशात्। सम्प्रसादस्सुषुप्तिः "स वा एष एतस्मित् सम्प्रसादेरत्वाचरित्वा" इति श्रुत्या सम्यक् प्रसादोऽस्मिन्निति संप्रसादः इति व्युत्पत्त्या च सम्प्रसादस्सुषुप्त्यवस्था, तस्यां च प्राणो जगर्तीति संप्रसादः प्राण इत्यभिप्रेतः; तस्मात् अधि प्राणादूर्ध्वं उपदेशात् कथनात् प्राणोपदेशानन्तरं

" एष तु वाति वदति, यस्सत्येनाति वदति "। इत्यत्र तु शब्देन प्राणाद्यतिवादित्वं व्यावर्त्य सत्यशब्दवाच्य परमात्मवादस्य अतिवादत्वं उक्त्वा भूमानमवतारयति। किञ्च—" तरति शोकमात्मवित् " इत्यादिना आत्मज्ञानेन मोक्षस्य उपदिश्यमानत्वात्, जडप्राणवायोर्मोक्षानुपयुक्तत्वात् आत्मशब्दस्य परशिवप्रसिद्धत्वात् " ब्रह्मवेदाप्नोति परं " इत्यादि श्रुतिषु शिवज्ञानस्यैव मोक्षोपदेशाच्च भूमा परमेश्वर एव।

भूमशब्दवाच्यत्वं परमेश्वरस्यैवेत्यत्र हेत्वन्तरमाह—

सू. धर्मोपपत्तेश्च ॥ ९ ॥

भूम्नि श्रूयमाणधर्माणां परमात्मन्युपपद्यमानत्वात् परशिव एव भूमा " यत्र नान्यत्पश्यति नान्यच्छृणोति, नान्यद्विजानाति स भूमा " इत्यादिना सृष्टेः पूर्वं सर्वव्यवहाराभावादि धर्माणां शिवस्योपपद्यमानत्वात् " यत्रत्वस्य सर्वमात्मैवाभूत्। तत्केन कं पश्येत्, केन किं वदेत् " इत्यादि श्रुत्यन्तरेण सर्वशिवात्मकज्ञानवतां प्राकृतप्रपञ्च व्यवहाराभावो मुक्तजीवधर्म इत्यवगम्यते "। अत एव " तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् " इति शिवोपासकस्य शुद्धचित्तस्य आत्यन्तिक पाशनिवृत्तिपूर्वक शिवसायुज्यं नदीसमुद्र दृष्टान्तेन निर्दिष्टम्। सर्वप्रपञ्चस्य शिवत्वेन पश्यतां शिवातिरिक्तस्य कस्यचिदभावात् प्रपञ्चनिषेधक श्रुतीनामपि प्रामाण्यमवगन्तव्यम्।

ननु " यावन्नविमोक्षेदसंपत्से " इति वाक्येन जीवन्मुक्तस्य विदेहमुक्तिपर्यन्तं प्रपञ्चभोगव्यपदेशात्। कथं जीवन्मुक्तानां प्रपञ्च-

निषेध उपपद्यते इति चेन्न। जीवन्मुक्तानां शिवज्ञानिनां सर्वस्य शिवात्मकत्वेन दर्शनात्। तेषां देहाद्यन्तः करणसद्भावेऽपि सर्वशिवात्मक ज्ञानसद्भावात्। जगदात्मक शिवोऽहमिति विद्वदनुभवाच्च। प्रपञ्चस्य शिवातिरिक्तत्वेन निषेधानुभवस्तेषां युज्यते। "यदा त्वन्मय एवाहमिति भावनया त्वयि। प्रलीनाहंकृतिग्रन्थिः पश्यत्येव-त्वदात्मताम्॥

ननु शिवोऽहमिति वृत्तेः शक्तिसंकोचरूपबन्धतिरोधायकत्वे भवदुक्तरीत्या तस्यापि तिरोधायकान्तरं स्वीकरणीयम् इत्यनवस्था स्यात्, अन्यथा द्वैतापत्तेः इति चेन्न। तादृश चित्तवृत्तेः चित्तस्वरूपत्वात्। तस्य चिति स्वरूपत्वात।

उक्तं च शिवसूत्रे–"चित्तमात्मे"ति स्पन्दसूत्रेऽपि "चितिरेव चेतनपदादवरूढा चैत्यसङ्कोचिनी चित्तम्" इति। 'न हि दृष्टेऽनुपपन्नं' इति न्यायेन जीवन्मुक्तानां सर्वशिवात्मकदृष्टिर्नानुपपद्यते। शिवस्य प्रपञ्चनिरूपिताभिन्ननिमित्तोपादानकारणत्वात्। जगदभिन्न शिवोऽहमिति दृष्टिस्सम्भवति। "यो वै भूमा तत्सुखं, नाल्पे सुखमस्ति" इति भूम्नः सुखत्वं दर्शितम्। यो वै भूमा तदमृतमिति अमृतत्वमपि परमशिवासाधारण धर्मः। किञ्च—"स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नीति। आत्मैवेदं सर्वं आत्मतः प्राणाः" इत्यादिना सृष्ट्युत्तरकाले तस्यैव स्वशक्त्युन्मेषरूपे जगति स्वमहिम्नि प्रतिष्ठितत्व सर्वकारणत्व सर्वात्मकत्वादि धर्माणां कथनात् भूमशब्दनिर्दिष्टः परशिव

एव । एतादृशधर्मविशिष्ट भूम्नः ध्यानादिकं गुरुमुखाद्विदित्वा यः अनुतिष्ठति तदा शक्तिविकासरूपमुक्तिं भवति । उक्तं च—

श्रीकुलरत्नमालायां—

यदा गुरुवरस्सम्यक्कथयेत्तन्नसंशयः ।
मुक्तस्तेनैव कालेन यत्र तिष्ठति केवलम् ॥

किं पुनश्चैकतानस्तु परे ब्रह्मणि यस्सुधीः ।
क्षणमात्र स्थिता योगी स मुक्तो मोचयेत्प्रजाः ॥

मृत्युजित्यप्युक्तम्—

निमेषोन्मेषमात्रन्तु तत्त्वं यद्युपलभ्यते ।
तदैव किल मुक्तोऽसौ न पुनर्जन्मचाप्नुयात् ॥

उक्तं च कुलसासीऽपि (?)

अहो तत्त्वस्य माहात्म्यं ज्ञातमात्रस्य सुन्दरम् ।
श्रोत्रान्तरन्तु संप्राप्ते तत क्षणादेव मुच्यते ॥ इति ।

ननु तदानीं शरीरादिकमप्यस्य जीवन्मुक्तस्य कथं न निवर्तते इत्याशंकायामपि "नैसर्गिकः प्राणसम्बन्धः" इति शिवेन सूत्रितम् । तथा च भूमपदवाच्य लिङ्गरूप परमशिवार्चनार्पणानुभवादिना सङ्कुचित चित्तं कुण्डल्यपरपर्यायं विकासयन् सच्चिदानन्दभाग्भवतीत्यर्थः ।

ब्रह्मणः परमशिवस्य सर्वव्यापकत्वमुपदिश्यं अक्षरशब्दवाच्यत्व-मप्याह—

सू. अक्षरमम्बरान्तधृतेः ॥ १० ॥

"स होवाचैतद्वैतदक्षरं गार्गि ब्राह्मणं अभिवदन्त्यस्थूल-मनण्वदीर्घमतो हि तमस्नेहमच्छायम्" इत्यत्र यदक्षरमुक्तं तत्परब्रह्म अम्बरान्तधृतेः अम्बरान्तस्य स्वशक्तिप्रकटीकृतस्य विश्वस्य धृतेः धारणात्। यद्यपि "ओमित्येकाक्षरं ब्रह्म" "ओंकार एवेदगँ सर्वम्" तदक्षरसमाम्नायः" इत्यादिषु वर्णस्य ओंकारस्य ब्रह्मात्मकत्व सर्वात्मकत्वादि दर्शनात् अक्षरशब्दवाच्यत्वं ओंकारस्य। "पुरुषोऽक्षर उच्यते" इत्यादिना पुरुषस्यापि संभवति। तथाप्यत्र पृथिव्याद्याकाशान्तस्य सर्वप्रपञ्चस्य धारकत्वासम्भवात् "ओंकार एवेदगँ सर्वम्" इति श्रुतेः सर्वात्मकब्रह्मवाचकत्वेन स्तुत्यर्थत्वं वाच्यम्।

अम्बरान्तधृतेः प्रधानेऽपि सत्वात् तत्रातिव्याप्तिमाशङ्क्य परिहरति—

सू. सा च प्रशासनात् ॥ ११ ॥

सा आकाशान्तधृतिः परशिवस्यैव, कुतः? प्रशासनात्, नियमनात्। न ह्यचेनप्रधाने एतादृशी नियमनशक्तिः सम्भवति। दृष्टं च लोके राजादिषु नियमनशक्तिमत्त्वम्। वेदेऽपि "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिना उक्तं प्रशासनं परशिवादन्यत्र नैव सम्भवति। जीवोऽपि नाक्षरशब्द-

वाच्यः । तस्य सर्वज्ञत्वादसर्वशक्तिकत्वात् जगत्प्रशासनशक्तिमत्त्वासम्भवात् । सर्वशक्तिकस्य सर्वज्ञस्य परमेश्वरस्य तु सर्वनियामकत्वात् सम्भवति । सर्वनियामकत्वं च उक्तम्—"ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां" इत्यादिना सर्वशक्तिकत्वं च । "परास्य शक्तिर्विविधैव श्रूयते" इत्यादिना उक्तम् । उक्तं च श्री पौष्करायां—"चिन्तामणौ स्वरूपेण न किञ्चिदुपलभ्यते । अथ चाभिमतं सूते ब्रह्मैवं सर्वशक्तिकम्" ज्ञानसम्बोधेऽपि—"स्वभावादेकरूपापि नानात्वं प्रतिपद्यते । ज्ञानस्य शक्तिसंकल्पैर्लक्ष्मीश्चिन्तामणेरिव" ॥ अनेन सूत्रेण पृथिव्यादाकाशान्तप्रपञ्चाधिष्ठानशिवस्य नियमनशक्तिमत्त्वमुपदिष्टम् । निश्शक्तिकस्य धृत्यसम्भवात । स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिना शक्तेस्स्वाभाविकत्वोपदेशात् । ब्रह्मणो निर्विशेषत्ववादोऽप्ययुक्तः । दाहानुकूल शक्तेर्वह्नेरविभक्तत्वेऽपि "वह्निर्दहती" त्यत्र भेदव्यवहारवत् शक्तिशक्तिमतोर्भेदाभेदस्सिद्धः ।

पुनर्हेत्वन्तरमाह—

सू. अन्यभावव्यावृत्तेश्च ॥ १२ ॥

परशिवस्यैव अक्षरशब्दवाच्यत्वं तस्यैवाम्बरान्तधृतित्वं नान्यस्य कस्यचित् । "अन्यभावव्यावृत्तेः" अन्यस्य प्रधानोदः विभावो धर्मः तस्य व्यावृत्तेः अचेतनप्रधानधर्मभिन्न द्रष्टृत्वादि धर्मश्रवणात् । तथाहि—"तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतंमन्तृ अविज्ञातं

विज्ञातृ" इति तस्मात् अक्षरशब्दवाच्यशिवलिङ्गस्यैव जन्मकर्मनिवर्तकत्वात्। तदेवोपास्यं स्वाज्ञाविनाभूतं शुद्धमानसैरित्यर्थः।

शिवस्य अनुग्रहेण उपासकस्य शिवसाक्षात्कारो भवतीत्युपपादयितु मधिकरणान्तरमारभते—

सू॰ ईक्षति कर्मव्यपदेशात्सः ॥ १३ ॥

"यः पुनरेतं त्रिमात्रेणे"त्यादि श्रुतौ परं पुरुषमभिध्यायीतेत्यत्र अभिध्यानविषयत्वेनोक्तः पर शब्दवाच्यः शिव एव। न हिरण्यगर्भो न वा नारायणः। "एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते" इति वाक्ये जीवघनात् जीवसमष्ट्यात्मक हिरण्यगर्भात् परस्य ध्येयत्वोक्तेः। न तस्य परत्वं नारायणस्यापि न युज्यते। ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते" इत्यत्र ब्रह्मविष्णुकालरुद्रादीनां कार्यकोटिप्रविष्टत्वदर्शनात्।

ननु "नाराणं महाज्ञेयं विश्वात्मानं परायणम्"। इत्यादिना तस्य विश्वात्मकत्व श्रवणात्, पुरुषशब्दवाच्यत्वाच्च। तस्यैवाभिध्यानविषयत्वमस्तु" इति चेन्न। "एतस्मात् जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते" इत्यत्र जीवघनात् हिरण्यगर्भात्, परात् उत्कृष्टात् नारायणात् परं उत्कृष्टं, पुरि दहरपुण्डरीके, शयं उपास्यत्वेन वर्तमानमत एव पुरुषं परशिवं "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षम्" इत्यादि श्रुतेः। शिवोपासकः ईक्षति पश्यति इति निर्देशात्, न नारायणस्योपास्यत्वं "एक एव शिवः साक्षात्ततोऽन्यत्सकलं मृषा। तस्मात् सर्वान् परित्यज्य ध्येयान्

विष्ण्वादिकान् सुरान् । शिव एव सदा ध्येयः सर्वसंसारनाशकः ।" इति श्रुतेः । "सर्वमन्यत्परित्यज्य शिव एको ध्येयः शिवंकरः" इति श्रवणाच्च । न नारायणस्योपास्यत्वं "नारायण परं ब्रह्म तत्त्वं नारायणः पर" इत्यादौ परमशिवोपासकस्य नारायणस्य श्वेतकेत्वादौ इव औपचारिकत्वेन ब्रह्मत्वेनोपदेशात् "नारायणपरंब्रह्म" इत्यत्र नारायणात् यत्परं उत्कृष्टं तत् ब्रह्म इत्युपदिशति । "तद्विष्णोः परमं पदम्" इति वाक्येऽपि तस्य श्रेष्ठत्वावगमात् । नारायणादधिकं शिवपदं मुमुक्षुभिरुपास्यम् ।

किञ्च विश्वात्मानं परायणमित्युक्त विश्वात्मकत्वमपि नारायणस्य उमाशक्त्यंशत्वादुपपन्नं भवति । "पुरुषो वै रुद्रः, वासुदेवः परा प्रकृतिः" ।

"एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले ।
भोगे भवानी पुरुषेषु विष्णुः क्रोधे च काली समरे च दुर्गा ।"

इत्यादिना शिवशक्त्यंशत्वं स्पष्टमुक्तम् । तस्मादीक्षतिकर्मतया उपदिश्यमानः परशिव एव सर्वोपास्यः ।

परशिवस्य भक्तानुग्रहाय दहरात्मकत्वमित्याह—

सू. दहर उत्तरेभ्यः ॥ १४ ॥

"यदिदमस्मिन्" इत्यदि श्रुतौ अन्तर्यामित्वेनोक्तः दहराकाशशब्दवाच्यं वस्तु परशिव लिङ्गमेव । ननु आकाशस्य भूताकाशे-

प्रसिद्धत्वात् । सूचीरन्ध्रादिवत् तस्य दहरत्वात् सर्वव्यापकस्यापि आकाशस्य अन्तः प्रविष्टत्वेन दहरवाच्यत्वं भूताकाशस्य । "यदिदमस्मिन् ब्रह्मपुरे दहरं" इत्यादिना जीवे ब्रह्मपुरमिति ज्ञायमानत्वात् "यस्यात्मा शरीर" मिति श्रवणात् "वालाग्रशतभागस्य शतधा कल्पितस्य च जीवो भागः" "एषोऽणुरात्मा चेतसावेदितव्यः" इत्यादिना जीवस्य क्षुद्रपरिमाणकत्वदर्शनात् दहरशब्दवाच्यत्वमस्तु इति चेत्—उत्तरेभ्यः हेतुभ्यः इति शेषः । "एष त आत्मा अपहतपाप्मा विजरोविमृत्यु-र्विशोको विजिघित्सोऽपिपासः । सत्यकामः सत्यसङ्कल्पः" इति वाक्ये शेषप्रसिद्धहेतुभ्यः । तथा च अपहतपाप्मत्वादीनां धर्माणां भूताकाशजीवयोरनुपपद्यमानत्वात् न तयोर्दहरवाच्यत्वमित्यर्थः ।

शिवस्यैव दहरशब्दवाच्यत्वं इत्यत्र उत्तरहेतुघटक हेतुद्वयमाह-

सू. गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १५ ॥

गतिश्च शब्दश्च गतिशब्दौ ताभ्यामित्यर्थः । "इमाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति अनृतेनहि प्रत्यूढा" इति वाक्यशेषोक्ताभ्यां दहराकाशकर्मकगति ब्रह्मलोकशब्दाभ्यां दहरवाच्यं शिवलिङ्गमेव । तथा ह्येतद्दृष्टं श्रुत्यन्तरे—"एषौ सौ परमो हंसो भानुकोटिप्रतीकाशो येनेदं व्याप्तं तस्याष्टधा वृत्तिर्भवति पूर्वदले पुण्यमतिः आग्नेये निद्रालस्यादयो भवन्ति । याम्ये क्रौर्यमतिः नैरृते पापे मनीषा, वारुण्यां क्रीडा, वायव्ये गमनादौ बुद्धिः, सौम्ये रतिप्रीतिः ईशान्ये द्रव्यादानं, मध्ये वैराग्यं, केसरे जाग्रदवस्था, कर्णिकायां स्वप्नः

लिङ्गे सुषुप्तिः " इत्यत्र हृत्पुण्डरीकान्तर्वर्ति दहराकाशरूप परशिवलिङ्ग-गमनं दृष्टमित्यर्थः । लिङ्गब्रह्मशब्दयोः घटकुम्भादिवत् पर्यायत्वात् । प्रत्यहं सुषुप्तौ प्रजाशब्दवाच्य जीवानां ब्रह्मणि गमनं दृष्टम् । तदेव दहराकाशपदवाच्यस्य ब्रह्मत्वे लिङ्गं हेतुः ब्रह्मलोकमित्यत्रापि ब्रह्मैव लोकमित्यर्थो बोध्यः । अन्यथा महाकैलासाभिधानं ब्रह्मणः शिवस्य लोकं प्रति प्रत्यहं गमनासंभवात् अहरहर्गच्छन्ति " इत्यस्य अप्रामाण्यं स्यात् — " एष ब्रह्मलोकस्सम्राडिति होवाच " इत्यादौ ब्रह्माभिन्नोलोक इत्यवगमाच्च । तथा च दहराकाशवाच्य अन्तर्लिङ्ग-धारणापरपर्याय ज्योतिर्लिङ्गानुसन्धानं प्रत्यहं कर्तव्यमिति—

अस्मिन्नर्थे हेत्वन्तरमाह—

सू. धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः ॥ १६ ॥

धृतेः सर्वलोकविधारकत्वात् " अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय " इति श्रुतेः । अस्य सर्वलोकविधारणरूपस्य महिम्नः अस्मिन् प्रकृत दहरपदवाच्ये उपलब्धेः, उपलभ्यमानत्वात् । " एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः " इत्यत्र सर्वलोकविधारणरूपमहिमा दृश्यते । स च शिवादन्यत्र न सम्भवती-त्यतो दहराकाशवाच्यं शिवलिङ्गमेव ।

किञ्च — " दहरोऽस्मिन्नन्तराकाशः " इत्युक्त दहराकाशवाच्यः परशिव एवेत्यत्र हेत्वन्तरमाह —

सू. प्रसिद्धेश्च ॥ १७ ॥

श्रुत्यन्तरं दहराकाशः परशिव एवेति प्रसिद्धेरित्यर्थः । तथा हि " दहरं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थं । तत्रापि दहं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यं " इत्यत्र " हृत्पुण्डरीकं विरजं विशुद्धं " इत्यारभ्य " उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तं, ध्यात्वा मुनिर्गच्छति भूतयोनिं " इत्यत्रापि प्रसिद्धत्वात् ।

ननु 'दहराधिकरणे विषयत्वेन गृहीत दहरोऽस्मिन्नन्तराकाशः' इति विषयवाक्येन दहराकाशवाच्यत्वं शिवस्य ज्ञायते । पूर्वोक्त-क्षुचीरुद्र कैवल्यवाक्याभ्यां दहरपुण्डरीक मध्यवर्तित्वेन ज्योतिर्लिङ्ग-स्योपास्यत्वं प्रतीयते । तथा च विरुद्धार्थप्रतिपादकवाक्यानां अप्रामाण्यापत्तिरिति चेन्न । दहराकाशशब्देन चिदाकाशशक्तिरुच्यते । " आकाशशरीरं ब्रह्म " सत्यात्मप्राणारामं मन आनन्दं " इत्यादिना चिदाकाशशरीरत्वस्योपदेशात् शक्तिशक्तिमतोरभेदात् । उक्तं च कूर्मे

केषां भगवती देवी शङ्करार्धशरीरिणी । शिवा सती हैमवती यथावद्ब्रूहि पृच्छताम् ॥ कूर्मे आह—" रहस्यमेतद्विज्ञानं जन्तूना-मेकमोचनं व्योमसंज्ञा पराकाष्ठा ज्ञानरूपातिलालसा " स्वाभाविकी च तन्मूला प्रभा भानोरिवामला । एका माहेश्वरीशक्तिरनेकोपाधियोगतः ॥ परापरेण रूपेण क्रीडते तस्य सन्निधौ । सेऽयं करोति सकलं पश्य-कार्यमिदं जगत् ॥ एका शक्तिश्शिवो ह्येकश्शक्तिमानुच्यते शिवः ॥

शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः। अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः ॥

तत्रैव देवीवाक्यमपि—"मां विद्धि परमां शक्तिं महेश्वरसमाश्रयाम्। अनन्यामव्ययामेकां यां पश्यन्ति मुमुक्षवः ॥ अहं वै सर्वभूतानामात्मा सर्वान्तरा शिवा। शाश्वतैश्वर्यविज्ञानमूर्तिस्सर्वप्रवर्तिका" इत्यादिना। कूर्मपुराणे नारायणेन "घृतकाठिन्यवन्मूर्तिः सच्चिदानन्दलक्षणा। शिवाभिधेन सैवास्ति शिव एव हि सा सदा" इति सूतगीतायां च द्वैताद्वैतात्मकशिवाद्वैतस्य प्रतिपादितत्वात् शिवस्य दहरात्मकत्व दहरमध्यवर्तित्वयोरविरोधात् दहराकाशमध्यवर्तित्वेन प्रसिद्धेरित्यर्थः।

अन्यव्यावृत्तिपुरस्सरं पुनर्विवेचयति—

सू. इतर परामर्शात् स इति चेन्नासम्भवात् ॥ १८ ॥

इतरस्य शिवादन्यस्य जीवस्य परामर्शात् "अथ च एष सम्प्रसादो अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेण अभिनिष्पद्यते, एष आत्मेति होवाच तदमृतमभयं" इति वाक्ये संप्रसाद शब्दवाच्य सुषुप्त्यवस्थावज्जीवस्य उपस्थितेः। सः जीव एव दहराकाशः तस्यैव हृत्पुण्डरीकान्तरुपास्यत्वं" इति चेन्न। असंभवात्। अपहतपाप्मत्व सत्यसंकल्पत्वादि धर्माणां तत्रासंभवादित्यर्थः।

असम्भवेन हेतुना जीवाशंकावारणेऽपि पुनरुत्तरप्रजापतिवाक्ये अपहतपाप्मत्वादिधर्मकः जीव एवेति अवस्थात्रयवर्तित्वलक्षणेन हेतुना आशङ्क्य संकुचित चिति रूप चित्तविशिष्ट संसारिणो जीवस्य विकसित स्वशक्तिदशायां अपहतपाप्मत्वादयो धर्माः सम्भवन्तीति समाधत्ते—

सू. उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

उत्तरात्, प्रजापतिवाक्यात् जीव एव दहराकाशः। उत्तरवाक्ये "य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामस्सत्यसंकल्पस्सोऽन्वेष्टव्यस्सविजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति स सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाति" इति जीवस्य अपहतपाप्मत्वादीनां सम्भवात्। य एषो अक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच "य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाच "तद्यत्रैतत्सुप्तस्समस्तस्सम्प्रसन्नः सुप्तं न विजानात्येष आत्मेति होवाच" इत्युक्त अवस्थान्तरवर्तित्वस्य जीवस्यैवोपपद्यमानत्वात् स एव दहराकाशः—उपास्यः तस्यैव शरीरात्समुत्थितस्य परं ज्योतिः प्रत्यभिधानात् इति चेन्न। "आविर्भूतस्वरूपस्तु—तु शब्दो पूर्वपक्षनिरसनार्थः, आविर्भूतं विकल्पक्षयाद्युपायगर्भलिङ्गधारणात्मक शिवदीक्षया विकसितं स्वस्य आत्मीयस्य रूपं पञ्चकृत्यकारित्वं, यस्य सः

मुक्तः अपहतपाप्मत्वादि पारमेश्वरधर्मानर्हति अर्थात् शिवभावापन्न जीवन्मुक्तं शिवरूपतया "एष संप्रसादो" इत्यादि श्रुतिर्व्याचष्टे । तस्यैवा-पहतपाप्मत्वादि धर्माणां सम्भवात् । स्वशक्तिसंकोचरूप अख्यात्यात्मक बन्धविशिष्टस्य जीवस्य पारमेश्वर धर्मासम्भवात् जीवः उत्तरवाक्याद्दहरा-क शः इति वक्तुं शक्यते जीवो यदाविर्भूत स्वरूपो भवति तदा तस्य शिवरूपत्वात् तादृशस्यैव रूपं उद्दिश्यैव "अयमात्मा अपहतपाप्मा-विजरो विमृत्युः' इत्यादि श्रुतिः न तु जैवरूपं अपहतपाप्मत्वादिकं व्यनक्ति । आविर्भूतस्वरूपस्तु" इति वदता भगवता व्यासेन भावी मिथ्यात्ववादः खण्डित इति स्फुरति । अयमत्राशयः । आस्माकीन सिद्धान्ते व्यक्तो भवति । जोवो नाम परशिवस्य स्वलीलास्वातन्त्र्य-संकुचित इच्छादि शक्तिविशिष्टत्वदशायां मलावृतत्वात् शिव एव संसारीजीव इत्युच्यते । तथा च अप्रतिहत स्वातन्त्र्यरूप इच्छाज्ञान-क्रियाशक्तीनां शिवासाधारणानां क्रमेण संकोचप्राधान्यप्रयुक्त आणव-मायीयकार्ममलत्रयरूपत्वात् । तथा सर्वकर्तृत्व सर्वज्ञत्व पूर्णत्व नित्यत्व व्यापकत्व शक्तीनां यथाक्रमं संकोचप्राधान्येन कला-विद्या-राग-काल नियतिरूपत्वात् । "सर्वस्वतन्त्रता सर्वज्ञता सम्पूर्णता तथा । नित्यत-व्यापकता चेति पञ्चैता शक्तयः प्रभोः ॥ अपि संकोचरहिताः संकुचद् रूपतां गताः । कलाविद्यारागकाल नियत्याख्या क्रमेण ताः ॥" इत्युक्तत्वात् । एतादृश संकुचितशक्तिविशिष्टः मलावृतः जीव इति बोध्यम् । मलत्रयस्यैव बन्धत्वात् तदुक्तं —"ज्ञानं बन्धः" (प्र.सू. २) योनिवर्गः कलाशरीरम् (प्र.सू. ३) इति सूत्रद्वयेन । ज्ञानमत्र नाहं

शिव इति। शिवाभेदस्फुरणावरक स्वस्वातन्त्र्यशक्तिपरिकल्पित-सङ्कोचरूप अख्यात्यात्मक अज्ञानस्वरूपं नाहं पूर्णः इत्यपूर्ण मन्यत्व-रूपाणवमलसहितत्व संकुचितज्ञानम्।

नन्वेतस्य बन्धस्य चित्प्रकाशातिरिक्तत्वे तस्याचेत्य(?)मानत्वात् अन्याभ्युपगत चित्प्रकाशभिन्नमाया प्रकृत्यादेरिवासत्वात्। तदनति-रिक्तत्वे प्रकाशमानत्वेन प्रकाशैकरूपत्वात् कथं जीवस्य बद्धत्वं इति चेन्न।

"चिति संकोचात्मा चेतनोऽपि सङ्कुचित विश्वमयः" (प्र सू. ४) इति सूत्ररीत्या विश्वशरीरशिवैकरूप एव जीवः। केवलं तन्माया-शक्त्या अनाविर्भूतस्वरूपत्वात् जीवस्य स्वाभाविकबद्धत्व व्यवहारः। आविर्भूत स्वरूपस्तु शिव एव। तिरोहित स्वरूपत्वे जीव इति तद्दशायां चिति संकोचरूपचित्तविशिष्टत्वात् जीवस्य स्वाभेदेन हृत्पुण्डरीकादौ शिवलिङ्गधारणवत्वं एतादृश अन्तर्लिङ्गधारणाद्बाह्य-लिङ्गधारणाविनाभूतात् दीक्षागुरुनिर्दिष्टोपायात् चित्तस्य चितिरूपत्वे मुक्तः शिव एव। न हि चित्तस्य चितेरधिष्ठानस्य अन्यथाभाव उपपद्यते, तदतिरिक्तस्य गगनकुसुमायमानत्वात्। उक्तं च अभियुक्तैः —"अख्यातिर्यदि न ख्यातिः ख्यातिरेवावशिष्यते। ख्याति चेत् ख्याति रूपत्वात् ख्यातिरेवावशिष्यते" इति।

शिवसूत्रविमर्शिन्यामपि—"यथा च व्यतिरिक्तस्य मलस्या-नुपपन्नत्वं तथास्माभिः श्रीस्वच्छन्दोद्योते पञ्चमपटलान्ते दीक्षाविचारे

वितत्य(?)दर्शितम् " इति । चित्तस्य चिति सङ्कोचत्वमपि । " चितिरेव चेतनपदादवरूढा चेत्य संकोचिनी चित्तम् ॥ (प्र.सू. ५) इति सूत्रेणोक्तम् । " चित्तमात्मेति " शिवेनापि सूत्रितम् ' पदवाक्य प्रमाणज्ञेन मरितोण्टदार्येणापि शिवजगन्मयस्थले—" पत्रशाखादिरूपेण यथा तिष्ठति पादपः । तथा भूम्यादिरूपेण शिव एको विराजते । " इत्यस्य श्लोकस्य व्याख्यानावसरे शिव एव स्वसमवेत शक्तितादात्म्य-क्रोडीकृतभूम्यादिरूपेण प्रतिस्फुरणतया भातीति सामान्यत उक्त्वा विशेषतश्च धृत्या धरणिः, करुणया जलम्, उज्वलतया तेजः-परमानन्दस्पन्दनयनवायुः, चिद्व्याप्त्या व्योम, चितिसंकोच चित्तविशिष्टो, जीव इति चित्तस्य चिति संकोचरूपत्वमुक्तम् । मायाप्रमातुर्जीवस्य स्वरूपमेव चित्तम् । चित्तस्वरूप एव माया प्रमाता परस्परं साक्षित्वात् । चित्तशक्ति-शक्तिमतोर्भेदाभेदस्य विवक्षितत्वात् । उक्तं च प्रत्यभिज्ञा-सूत्रे—" तन्मयो माया प्रमाता " इति । उक्तं च मोक्ष धर्मे—" चित्तमेव हि संसारो रागादिक्लेशभूषितम् । तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते " इति । बौद्धे च—" रागादिमलिनं चित्त संसारस्त-द्विविक्तता । संक्षेपात्कथितो मोक्षः प्रहीनावरणैर्जनैः ॥ इति । नारद संग्रहे च —" सर्वो विकल्प स्संसारो नान्यो बन्धो विकल्पतः ॥ इति । एतदभिप्रायेण शिवसूत्रेऽपि चित्तमात्मेत्युक्तम् ।

नन्वेतत् स्वाभाविकपरमेश्वरस्वरूपस्य पञ्चकृत्यकारित्वस्य चित्त-दशायां तिरोहितत्वे संसारित्व दशायां स्वरूपहानिरिति चेत न; संकुचित चिच्छक्तितया संसारिभूमिकायामपि शिववत् किंचित् पञ्चकृत्य

कारित्वस्य दर्शनात् तथापि तद्वत् पञ्चकृत्यानि करोतीति सूत्रेणोक्तम्। आत्मीयपञ्चकृत्यकारित्वस्य तिरोधानदशायां अस्य बन्धः। तदुक्तं तृतीयाध्याये "पराभिध्यानात्तु ततो ह्यस्य बन्धविपर्ययौ" इति। एतादृश चितिसंकोचरूपं चित्तात्मकबन्धस्य दीक्षात्रयविलयत्वे 'परंज्योतिरुप सम्पद्य स्वेन रूपेण अभिनिष्पद्यते।' इति स्वेन रूपेण पञ्चकृत्यकारित्वेन स्वरूपेण अभिव्यक्तिर्भवतीत्यर्थः। तदुक्तं तत्त्वप्रकाशिकायां "यो जयति परे तत्त्वे दीक्षयाचार्यमूर्तिस्थः" इति उक्तं च प्रत्यभिज्ञा सूत्रे "तत्परिज्ञाने चित्तमेव अन्तर्मुखीभावेन चेतनपदाध्यारोहाच्चितिः" इति। गुरुमुखाच्च स्वस्वरूपपरिज्ञाने अख्यातिलक्षण कारणापसरणात् स्वशक्तिव्यामोहितृत्वरूप संसारित्वनिवृत्तौ स्वातन्त्र्यलोभात् चित्तमेव बहिर्मुखतारूपसंकोचं जहत् अन्तर्मुखत्वेन चेतनपदाध्यारोहात् क्रमेण संकोचकछाया अपि विगलनेन स्वरूपापत्या चितिर्भवति। अर्थात् चिच्छक्ति-रूपां परां भूमिमाविशति। तथा चोक्तम्-"स पुनश्शाम्भवेच्छातश्शिवा-भेदं परामृशन्। क्रमान्मन्त्रेशतन्नेतृरूपो याति शिवात्मताम्॥ इति। आचार्यमूर्तिस्थश्श्रीगुरुः शिष्यगत शक्तिपातं दृष्ट्वा कृत्वा वा दीक्षापुरस्सरं शिष्यस्य शिवाभेदं ज्ञापयति तदा शिवाभेदं परामृशन् क्रमात् शिवता-माप्नोति। उक्तं च दीक्षालक्षणगुरुकारुण्यस्थले "इति शुद्धेन शिष्येण प्रार्थितः परमो गुरुः। शक्तिपातं समलोक्य दीक्षया योजये-दमुम्॥ दीयते च शिवज्ञानं क्षीयते पाशबन्धनम्। यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः'॥ "दीक्षया नाहं शिवः नाहं पूर्णः" इत्याद्याकारक मलमायापाशबन्धनविलये शिवस्वरूपज्ञानलाभे

शिव एव भवति । एष च दीक्षाविचारो क्रियासारादौ विस्तरतः प्रदर्शितः । नीलकण्ठशिवाचार्यादिभिः तत एवावगन्तव्यः । तथा च दीक्षया आविर्भूतस्वरूपो यदा भवति तदा तस्य जीवत्वाभावात् । ब्रह्मधर्मोपदेशस्य युक्तत्वात् तस्य ब्रह्मत्वात् । "तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" ; "ब्रह्म वेद ब्रह्मैव भवति" इत्यादि श्रुतिषु मुक्तस्य शिवत्वं सूचितम् । "अन्तर्बहिश्च तत्सर्वं परिपूर्णं महेश्वरम् । भावयेत्परमानन्दलब्धये पण्डितोत्तमः ॥ शिवोऽहमिति भावो हि शिवतापत्तिकारणम् । न ज्ञानमात्रं नाचारो भावयुक्तश्शिवो भवेत्" ॥

ज्ञानं वस्तु परिच्छेदो ध्यानं तद्भावकारणम् ।
तस्मात् ज्ञानी महादेवे ज्ञानयुक्तो भवेत्सुधीः ॥
नैरन्तर्येण सम्पन्नो भवेद्ध्यातुं शिवं प्रति ।
तद्भावो जायते यद्वत् कृमेः कीटस्य चिन्तनात् ॥
गुरोः कटाक्षवेधेन शिवो भवति मानवः ।
रसवेधाद्यथा लोहो हेमतां प्रतिपद्यते ॥

इत्यादि स्मृतिरपि मुक्तस्य शिवत्वं ब्रूते । इदमत्र ज्ञातव्यम्—ज्ञानक्रियाशक्तिरूपशिवदीक्षया तत्संकोचप्रयुक्त मलविगलनेसति जीवस्य आविर्भूतस्वरूपत्वात् शिवः न तु शुद्धस्फटिकस्य स्वाच्छ्य शौक्ल्यरूपं प्राग्विवेकग्रहणात् रक्तनीलाद्युपाधिभिरव्यक्तमिव भवति । विवेकग्रहणात् स्फटिकः शौक्ल्यन स्वेन रूपेण अभिनिष्पद्यते । तथैव देहाद्युपाध्यविविक्तस्य जीवस्य श्रुतिकृतविवेकज्ञानं शरीरात्समुत्थानम् ।

तत्फल स्वरूपेणाभिनिष्पत्तिः, नामकेवलात्मस्वरूपावगति विवेकविज्ञाना-भावात् अविनाभूतस्वरूपस्सन् विवेकविज्ञानादाविर्भूतस्वरूपः इत्युच्यते । "तं ध्यात्वा मृत्युमतीत्य नान्यः पन्थाविमुक्तये" इति । "तं ध्यात्वा मुनिर्गच्छति भूतयोनिं" इति च कैवल्य श्रुतेः । 'यदि वाचनिका-ज्ञानान्मुक्तिः स्याद्भावनां विना । शरीमानसैर्दुखैर्मुच्येरन् सर्वजन्तवः" इति । अन्या च युक्तिः "रसायनं विना स्वदात्सूचितं ह्यपि सिद्धिदम्" इति । अन्यच्चोक्तं 'आगोपबालवन्दितं भगवंस्त्वमित्थं । ज्ञातप्युपय विरहान्न तु मोक्षदोऽसि । नन्तस्थित भवति धेनुषु तृड्विहर्तुः क्षीरं तदेव पुनरभ्यवहारतस्स्यात् इति । स्वस्वरूपावरकाज्ञानस्य अन्यथाऽ-निर्वचनीयताख्यातित्वाभावात् । अस्मन्मते शिवजीवयोर्भेदस्य मित्थ्या-ज्ञानकृतत्वाभावात् शिवशक्तिस्वातन्त्र्यपरिकल्पितसंकोचकृतत्वात् तयोरभेदस्य विकसितस्वशक्तिदशायां उपपन्नत्वात् कूर्माङ्गभङ्गि-अहिकुण्डलस्वर्णकुण्डलन्यायादिभिः स्वरूपस्यैव स्वेच्छया संकाचस्वरूप-स्यैवाविर्भाव इति । "आविर्भूतस्वरूपस्तु" इत्युक्त्वा ज्ञायमानस्मात् तथा चाविर्भूतस्वरूपः अपहतपाप्मत्वादिधर्मानर्हति । तस्य शिवात्म-कत्वात् उक्तं च षाड्गुण्यविवेके

"एवं त्वन्मय एवाहमिति भावनया त्वयि ।
प्रलीनाहंकृतिग्रन्थिः पश्यत्येव त्वदात्मताम्" इति ॥

उक्तं च स्पन्दकारिकायां "निजाशुद्धासमर्थस्य कर्तव्येष्वभिलाषिणः । यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम्" स्वाभाविकाशुद्ध अविद्या

असमर्थस्य संकुचितशक्तेरित्यर्थः । "तदा स्यात्परमं पदम्" इत्यस्य स्वस्वरूपे स्थितिर्भवेदित्यर्थ । सर्वस्रष्टृत्वादि पञ्चकृत्यकारित्व स्वरूपाविर्भावोऽपि "अपित्वात्मबलस्पर्शात् पुरुषस्तत्समो भवेत् ।" इति स्पन्दकारिकोत्तरार्धेन उक्तः ।

ननु तत्साम्यघटक तद्भेदस्य स्वरूपविकासदशायामपि सत्वे कथं मुक्तत्वं नैयायिकांगीकृत निर्दुःखत्वादिना सादृश्यस्यैव मुक्तित्वे कथं वा आविर्भूतस्वरूपस्य शिवात्मकत्वं इति चेन्न । तत्सादृश्यं तदभिन्नत्वं वक्तव्यं "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुत्या तत्समत्वासम्भवस्य दर्शितत्वात्" "गगनं गगनाकारं सागरस्सागरोपमः । रामरावणयोर्युद्धं रामरावणयोरिव" इत्यादाविव तत्समत्वं तदभिन्नत्वमेवेति बोध्यम् । "शिवस्वरूपो भवति शिवस्वरूपो भवति" इति श्रुतेः । श्रीमरितोण्टदार्येणापि "प्रसन्ने सति मुक्तोऽभून्मुक्तश्शिवसमो भवेत्" इत्यत्र शिवसाम्यस्य शिवाभिन्नत्वात्मकत्वस्य उक्तत्वात् । न च 'मुक्तश्शिवसमो भवेत्' । 'पुरुषस्तत्समो भवेत्" इत्युक्तवर्त्म्यां सिद्धान्तशिखामणिस्पन्दप्रदीपिकाकाराभ्यां श्रीकण्ठाचार्याङ्गीकृत तत्समानगुणसार कैवल्य लक्ष्मीरूपमोक्षस्येव शिवसमानगुणसारकैवल्यमभिप्रेतमिति वाच्यम् । "स्वप्रकाशविराजन्तमनामयमनौपमम् ।" इत्यत्र अनौपमपदेन निर्दिष्टशिवसादृश्यरहितत्वोक्तेः विरोधः स्यात् । मुक्तजीवसादृश्यस्य सत्वात् । अतश्शिवसमानगुणसार कैवल्यं श्रीसिद्धान्तशिखामणिकाराणामनभिप्रेतमिति ज्ञायते । एवं श्रीस्पन्दप्रदीपिकाकार श्रीकल्लटाचार्येणापि नाङ्गीकृतम् । अन्यथा अतत्सततप्रयुक्तस्पन्दतत्त्वविविक्तये जाग्रदेवनिजा

भावमचिरेणाधिगच्छति " इति स्वोक्तिर्विरोधः स्यात् । "स्पन्द-तत्त्वविविक्तये" इत्यस्य स्वरूपाभिव्यक्त्यर्थं निजं आत्मीयं भावं स्वभावं अचिरेण आशुमधिगच्छति इति व्याख्यातवता उत्पलाचार्येणाप्यनङ्गीकृतत्वात् न तत्समानगुणसारं कैवल्यं उक्त श्रुतिविरोधात् अनेकेश्वरप्रसंगात् मुक्तस्य ईश्वरत्वाभावे ईश्वरनियम्यत्वाद्बद्धाविशेष-प्रसङ्गात् । ईश्वरत्वे अनेकेश्वराणामिन्नाभिप्रायकतया कार्योच्छेद-प्रसङ्गाच्च ।

ननु मुक्तदशायां शिवजीवयोर्भेदस्य "मम साधर्म्यमागतम्" इत्यत्र साधर्म्यपदेन ज्ञायमानत्वात् आगता इति । "मुक्तानां परमा-गतिः" "सायुज्यं प्रतिपन्नाय" "यस्मिन् पदे विराजन्ते" "मुक्ताः संसारबन्धनैः" इति च बहुवचनबलात् मुक्तात्मनां भेदस्य श्रुत्याद्युक्तस्य सत्वात् कथं शिवाभिन्नत्वं मुक्तस्य" इति चेदुच्यते । शिवव्यावर्तक स्वशक्तिसंकोचप्रयुक्तहेतूनां देवतिर्यङ्मनुष्यादि भेदानां कामक्रोधादि भेदानां च निवृत्तौ मुक्तजीवानां अभिन्नत्वात् तस्य शिवाभिन्नत्वात् न मोक्षदशायां भेदो वक्तुं शक्यते । तत्र बहुवचनस्य भूतपूर्वगत्या जीवगतानेकत्वार्थकत्वादविरोधात् । अन्यथा "ब्रह्म वेद ब्रह्मैव भवति" "यस्सर्वज्ञस्सर्ववित्" "अहमन्न महमन्नमहमन्नादोऽहमन्नादोऽहमन्नादः" "अहं ब्रह्मास्मि" इत्यादि श्रुतेर्विरोधः स्यात् ।

ननु यथा परिपूर्णगुरुत्वादिभिः समानानां स्वर्णकलशरत्नव्रीहि प्रभृतीनां पदार्थानां भेदकस्य लक्षणस्याभावेऽपि व्यक्तीनां नानात्वं

दृश्यते । तथा कथंचिदपि भेदप्रतिपत्तिहेतूनां अभावेऽपि एकाकाराणां मुक्तात्मनां भेदस्सिध्यति । उक्ताभेदप्रतिपादक श्रुतीनां च मुक्तात्मनां स्वरूपस्य शिवस्वरूपात्यन्तसमत्वात् अविरोधः इति चेदुच्यते । छत्रचामरवाहनादि सहितराज्ञः पादचारित्वादिवत् । विश्वोत्तीर्ण विश्वात्मक सर्वकर्तृत्व सर्वज्ञत्व परिपूर्णत्व नित्यत्व व्यापकत्व-शक्तिः परशिव एव संकुचित कला-विद्या-राग-काल-नियतिरूपशक्ति-र्भवति । तथाविधश्चायं शक्तिदरिद्रसंसारीत्युच्यते । स्वशक्ति-विकासेतु शिव एव ।

ननु राज्ञः पादचारित्वदशायां अहं राजा इति वत् शिवस्य संसारित्वदशायां शिवोऽहमित्येव कुतो न प्रत्यभिज्ञायते इति चेन्न । राज्ञोऽपि कदाचिन्नाहं राजा इति वत् "नाहं शिवः नाहं पूर्णः" इत्यादि प्रतीतेरुपपद्यमानत्वात् । तथा च शिव एव योगीव स्वशक्ति वैचित्र्येण नानाजीवरूपतया भासते । परिपक्वहृदयं शिष्यं यदाचार्य मूर्तिस्थस्सन् अनुग्रहशक्त्या परतत्वे योजयति तदा जीवश्शिव एव । अन्यथा "यथा नद्यः स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इत्यादि श्रुतिविरोधापत्तेः । यथा नीरक्षीर, सिन्धुसैन्धवयोजनानन्तरं व्यक्तिगत द्वित्वमपि न दृश्यते तथा मुक्तात्मशिवयोरिति वक्तव्यम् । अहिकुण्डलं, स्वर्णकुण्डलमित्यत्र अहेस्स्वर्णस्य कुण्डलमिति विभागः कुण्डलाकारं परित्यज्य यदा स्वरूपमापद्यते तदा तत्रैव विभागस्य लीनत्वात् न विभक्तप्रत्ययो भवति । तथा मुक्तदशायां

विभागस्य शिव एव लीनत्वात् जीवशिवयोरेकत्वमेवेति निश्चीयते। एतादृश लीनविभागाभिप्रायेणैव मुक्तदशायां भेदो वर्तत इत्युक्तम्। यथा च विभागातिरिक्त भेदो न सिध्यति तथा वक्ष्यते। तथा च आविर्भूत स्वरूपस्य शिवत्वात् शिवस्यैव दहराकाशवाच्यत्वम्। तस्यैवापहतपाप्मत्वादिकं उपास्यत्वं च सिध्यति ; न तु संकुचितशक्तेर्जीवस्येति भावः।

ननु दहराकाशस्य शिवत्वे "अथ एष संप्रसादः" इत्याद्युक्त जीवपरामर्शस्य वैयर्थ्यं स्यात् इत्याशंकायामाह—

सू. अन्यार्थश्च परामर्शः ॥ २० ॥

परामर्शः-जीवपरामर्शः-अन्यार्थः-ब्रह्मस्वरूपप्रतिपादनार्थः—न तु जीवस्वरूपविवक्षया तदुपास्यत्वविवक्षया वा "अस्मात् शरीरात् समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यत्र यत्परंज्योतिरुपसम्पद्य जीवे अपहतपाप्मत्वादि स्वरूपं निष्पद्यते तत् स्वरूपत्वात् जीवस्य तद्ब्रह्मैवोपास्यमित्यर्थः।

दहरायतनत्वस्य ब्रह्मणोऽनुपपन्नत्वात् दहराकाशवाच्यत्वं उपास्यत्वं च कथमित्यत्राह—

सू. अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

ननु व्यापकस्य परशिवस्य अल्पपरिमाणासम्भवात् "दहरोऽस्मिन्नन्तराकाश" इत्याकाशस्य अल्पत्वश्रुतेः दहराकाशवाच्यत्वं

जीवस्यैवेति चेन्न। तदुक्तं-"अर्भकौकस्त्वात्" इत्यत्र सर्वव्यापकस्यापि शिवस्य भक्तोपासनार्थं व्योमदृष्टान्तेन प्रादेशिकत्वमुक्तमित्यर्थः।

सर्वगतस्य शिवलिङ्गस्य अन्तर्यामित्वमुक्त्वा तस्य स्वप्रकाशत्वमाह—

सू. अनुकृतेस्तस्य च ॥ २२ ॥

"न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इत्यत्र सर्वप्रपञ्चप्रकाशकत्वेन अवगम्यमानं वस्तु परशिव एव। न तेजो विशेषः, तस्य सूर्यचन्द्रादि प्रपञ्चस्य अनुकृतेः, अनुकरणात् "तमेव भान्तमनुभाति सर्वं" इत्यनुभानादित्यर्थः। तस्य भासा सर्वमिदं विभाति" इत्यत्र चन्द्रसूर्यादेः स्वेनैवप्रकाशासम्भवस्य दर्शितत्वाच्च। तस्येति तत्पदेन परशिवस्योच्यमानत्वात्। अत्र "तमेव भान्तमनुभाति सर्वं" इत्यनेन चित्प्रकाशान्तर्गतत्वेनैव सर्वेषां प्रकाशः न तदनन्तर्गतत्वेन केषांचित्प्रकाश, इति परशिवस्य विश्वात्मकत्वम्। "तस्य भासा सर्वमिदं विभाति" इत्यनेन विश्वोत्तीर्णत्वमप्युक्तमिति बोध्यम्।

हेत्वन्तरमाह—

सू. अपि च स्मर्यते ॥ २३ ॥

कृष्णगीतासु स्मर्यते इत्यर्थः। तथाहि "न तद्भासयते सूर्यो न शशांको न पावकः"। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम।"

"यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति । श्लोकद्वयेन स्वस्याभास्यत्व सर्वभासकत्वयोर्निर्दिष्टत्वात् स्वयं प्रकाशस्वरूप विश्वोत्तीर्णत्व सर्वावभासकत्वरूपविश्वात्मकत्वयोरसिद्धत्वात् भास्यभासकयोरभेदात् घट इति ज्ञानं मठ इति ज्ञानमित्यभेद प्रतीतेः । उक्तं च स्पन्दकारिकायाम्—" यस्मात् सर्वमयो जीवस्सर्वभावसमुद्भवः । तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः । तेन शब्दार्थचिन्तासु न सावस्था न याऽशिवः भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥" इति । जीवस्य बोद्धृरूपत्वात् तस्य बोधरूपत्वात् तस्य बोध्यरूपत्वात् जीवात्मा सर्वमयः विश्वरूप इत्यर्थः । उक्तं च " यदैव विदितविश्वं तदानीमेव चिन्मयम् । यन्नास्ति भागो वेद्योऽसौ नाथयो वेदकाद्बहि ॥ वेद्यो वेदकतामाप्तो वेदकस्संविदात्मताम् । संवित्त्वदात्माचेत् सत्य उदिदं त्वन्मयं जगत् ॥ आत्मैवेदं जगत्सर्वं नेहनानास्ति किञ्चन " इति श्रुतेश्च । अन्यच्चोक्तम्—' त्वदात्मकत्वं भावानां विवदन्ते न केचन । यत्प्रकाश्यदशां याता नाप्रकाशः प्रकाशते " तथा " न प्रकाशाः प्रकाशन्ते त्वत्प्रकाशोदयं विना " इति । उक्तं च स्वात्मसप्ततौ—' यद्यद्वस्तु स्वभावेन ज्ञानेन विषयीकृतम् । तद्वत्तादात्म्यमायाति जीवस्सर्वमयोह्यतः " इति । अन्यच्च संवत्प्रकरणे ' यथा मना समाविष्टं सर्वं तद्रूपमिष्यते । तथा ज्ञानसमाविष्टं सर्वं तद्रूपमीक्ष्यताम् ॥

तथा च चिति संकोच चित्तविशिष्ट जीववेद्यस्य जीवरूपत्ववत् शिवप्रकाशेन प्रकाश्यमानानां सर्वेषां शिवात्मकत्वमिति भावः ।

एतादृश विश्वात्मकविश्वोत्तीर्ण परशिवस्य श्रुत्युक्तांगुष्ठमात्रत्वादिक-मप्युपपद्यते इत्याह—

सू. शब्दादेव प्रमितः ॥ २४ ॥

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते" इति । "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्यस्स उश्व एतद्वैतत्" इत्यत्र अङ्गुष्ठमात्रः पुरुषः परशिव एव ।

ननु संकुचित शक्तिकजीवस्य "नाहं पूर्णः" इति आणव-मलोपपन्नत्वात् । "चित्तमात्मेति" शिवसूत्रेणापि तस्य अणुत्वस्य ज्ञायमानत्वात् । "स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः । अंगुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः" इति श्रुत्यन्तरेणापि तस्यैव अंगुष्ठमात्रत्वसिद्धेः । "मध्य आत्मनि तिष्ठति" इत्यनेन देहान्तर्वर्तित्वावगमाच्च । अंगुष्ठमात्रः पुरुषो जीव एवेति चेन्न, शब्दादेव; ईशानशब्दादेव, साक्षात् शिवः प्रमितः निश्चित इत्यर्थः । "ईशानः सर्वविद्यानामीश्वरस्सर्वभूतानां" इत्यादि श्रुत्यन्तरे तस्यैव ईशानशब्दवाच्यत्वात् । "ईशानो भूतभव्यस्य" इत्यादि श्रुत्युक्त भूतभव्येश्वरत्वस्य "ज्ञाज्ञौ द्वावजावीशानीशौ" इत्यनीशस्य जीवस्य अनुपपन्नत्वात् "सर्वो वै रुद्रः" इत्यादौ तस्यैव चराचरात्मकत्व श्रवणात् । "नमस्ते भगवन्विश्वेश्वराय" इत्युपक्रम्य सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय" इत्यन्तेन तस्यैव विश्वोत्तीर्णत्व श्रवणाच्च ।

अंगुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः । ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ॥ इत्यादि परशिवस्यैव अंगुष्ठमात्रत्वनिर्देशात् न जीव इत्यर्थः ।

ननु विश्वातीत विश्वात्मक शिवस्य परब्रह्मणः अंगुष्ठमात्रत्वमनुपपन्नमित्याशङ्कायामाह—

सू॰ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥

अत्र तु शब्दः पूर्वपक्षनिरासार्थः । हृद्यपेक्षया विश्वोत्तीर्ण विश्वात्मकापरिच्छिन्नस्यापि परशिवस्य हृदयापेक्षया परिच्छिन्नत्वं सम्भवति, ज्योतिर्लिङ्गोपासनाशास्त्रस्य मनुष्याधिकारत्वात् । मनुष्यमात्राधिकारत्वात् । एतेन मनुष्यमात्रस्यैव ब्रह्मविद्याधिकारत्वं सुचितम् । भक्तानुग्राहकः परशिवः मनुष्यहृदयपरिमितस्वरूपं परिगृह्य तदुपासनासिद्धये ज्योतिर्मयप्राणलिङ्गरूपतया उपासकहृत्पद्मे तिष्ठतीत्यर्थः ।

नन्वेवं अन्तर्लिङ्गधारणस्य मनुष्यत्वावच्छिन्नमात्रनिष्ठत्वे अथर्वशिरसि—"ते देवा रुद्रं ध्यायन्ति" इति श्रूयमाण रुद्रकर्मकध्यानं ज्योतिर्लिङ्गानुसन्धनम्, अन्तर्लिङ्गधारणमिति यावत् । उक्तंचाचार्येण —"ज्योतिर्लिङ्गानुसन्धानमान्तरं लिङ्गधारणमिति लिङ्गधारणचन्द्रिकाकारेणापि —"मुखे मन्त्रो हृदि ध्यानं मस्तके लिङ्गधारणम्" इत्यत्र हृदि ध्यानमित्यस्य अन्तर्लिङ्गधारणार्थकत्वमुक्तम् । अनुपपन्नमित्याशङ्काशान्तये देवताधिकरणमारभते—

सू॰ तदुपर्यपि बादरायणः सम्भवात् ॥ २६ ॥

तदुपर्यपि मनुष्याणामुपर्यपि देवादीनामाभ्यन्तरब्रह्मलिङ्गधारणं सम्भवतीति बादरायणाचार्यो मन्यते । कुतः? सम्भवात् । तेषामपि अपवर्गेच्छायाः सम्भवात् । उक्तं च श्रीमन्नीलकण्ठशिवाचार्यचरणैः—

यथा मनुष्यैर्धर्तव्यं लिंङ्ग देवैस्तथैव हि ।
अधिकारं देवतानां मनुते बादरायणः
तदुपर्यपि देवानां विष्ण्वादीनां च सम्भवात्
तेषां विग्रहवत्वाच्च ह्यधिकारोऽत्र निश्चितः ॥ इति ।

विग्रहवत्वं च तेषां "इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादिना तैत्तिरीयादौ श्रूयते । उक्तं च रेणुकागस्त्यसंवादेऽपि—

"ब्रह्मविष्ण्वादयो देवा मुनयो गौतमादयः । धारयन्ति सदा लीङ्गमुत्तमाङ्गे विशेषतः ॥ लक्ष्म्यादि शक्तयस्सर्वा शिवभक्तिविभाविताः । धारयन्त्यलिकाग्रेषु शिवलिङ्गमहर्निशम् ॥" तत्रैव "ब्रह्मा विष्णुश्च रुद्रश्च वासवाद्याश्च लोकपाः । मुनयस्सिद्धगन्धर्वा दानवा मानवास्तथा । सर्वे च ज्ञानयोगेन सर्वकारणकारणम् । पश्यन्ति हृदये लिंङ्ग परमानन्दलक्षणम्" इत्यादिना ब्रह्माभ्यन्तरधारणमप्युक्तम् । लक्ष्म्यादित्यनया रेणुकभगवत्पादाचार्योक्त्या स्त्रीणां लिङ्गधारणं विधीयते ।

ननु देवानां विग्रहादिमत्वे कर्मणि विरोधः स्यात् इत्याशङ्क्य निराकरोति—

सू. विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥

एकस्य देवशरीरस्य अनेकत्र युगपत्सन्निधानासम्भवात् कर्मणि-विरोधः स्यादिति चेन्न ।

"अनेकप्रतिपत्तेः" योगिनामिव देवतानामपि अनेकशरीरधारणस्य दर्शनात् । "कति देवाः", इत्युपक्रम्य त्रयश्च त्रीच शता ; त्रयश्च त्रीच सहस्रा इत्युक्त्वा "कतमेते" ? इति पृच्छायां "महिमान एवैषामेते त्रयस्त्रिंशत्वेव देवाः" इत्यादिषु कथनादित्यर्थः । तस्मात् एकस्मिन् दिने एव क्रियमाणेषु अनेकेषु यागेषु एकस्यैव देवस्य अनेक-शरीरपरिग्रहसम्भवात् । तत्र सान्निध्यात् न विरोध इति भावः ।

वैदिकशब्दे विरोधमाशङ्क्य परिहरति—

सू. शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥२८॥

शब्दे वैदिकेन्द्रादिशब्दे विरोध इति चेत् न । विरोधा-नित्यत्वविरोध इति चेन्न । अन्तः प्रभावात् । अतः वैदिकात् देवेन्द्रादिशब्दात् इन्द्रादीनामुत्पत्तेः इन्द्रादिशब्दानां आकृतिवाचकत्वात् व्यक्तिपरत्वाभावात् इन्द्रादिव्यक्तिनाऽशेपि तेषामनित्यत्वादिकं न स्यात् । तथा च इन्द्रादिव्यक्तिविनाशेऽपि तत्तदाकृतेरविनाशेन इन्द्रादि वैदिक-शब्दानां नित्यत्वादविरोधः । तत्र वेदस्य इन्द्राद्यर्थजनकत्वं च

प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यां सिद्धं भवति। तथा हि "वेदेन रूपे व्यकरोत् सता सति प्रजापतिः, स भूरिति व्याहरत्। स भूमिमसृजत्" इत्यादि श्रुतिः "सर्वेषां च स नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाप्य निर्ममे"॥ अत एव च नित्यत्वम्। अत एव वेदस्य देवादि प्रपञ्चं प्रति कारणत्वादेव नित्यत्वम्। अविरुद्ध मित्यर्थः। वेदानां परमेश्वरविमर्शशक्तिस्वरूपत्वात् नित्यत्वात्। तन्मिथ्यात्वे वेदबाह्य पाषण्डमतप्रवेशप्रसक्तेश्च। "वाचो नित्या" इत्यादि श्रुति विरोधाच्च नानित्यत्वमित्यर्थः। इन्द्रादि देवानां प्रतिकल्पं विलक्षणनामरूपवत्वात् वेदस्य कथं तत्प्रतिपादकत्वं इत्याशङ्क्याह—

सू. समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥

समाननामरूपत्वात् सर्वेषां इन्द्राणां सर्वेषु कल्पेषु समाननामरूपत्वात् आवृत्तावपि इन्द्रपरंपरायाः अङ्गीकृतत्वेऽपि अविरोधः वेदस्य इन्द्रप्रतिपादकत्व विरोधो नास्ति। कुतः? दर्शनात्। श्रुतेः स्मृतेश्च इत्यर्थः। तदुक्तं—"सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथोस्वः।" "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोऽति तस्मै तगुँहि देव मात्मबुद्धिप्रकाशं, मुमुक्षुर्वै. शरणमहं प्रपद्ये" इत्यादि श्रुतिः स्मृतिरपि "आप एव ससर्जादौ तासु वीर्यमवासृजत्। तदण्डमभवद्धैमं सहस्रांशु समप्रभं। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः। ब्रह्माणं विदधे पूर्वं वेदानस्मै प्रयच्छति॥" उक्तं च सिद्धान्तशिखामणौ—"जगत् सिसृक्षुः प्रथमं

ब्रह्माणं सर्वदेहिनाम् । कर्तारं सर्वलोकानां विदधे विश्वनायकः ॥ तस्मै प्रथमपुत्राय शङ्करः शक्तिमान् विभुः । सर्वज्ञः सकला विद्यास्सानुग्रहमुपादिशत् ॥ इति ।

मतान्तरमाह—

सू. मध्वादिष्वसम्भवात् अनधिकारं जैमिनिः ॥ ३१ ॥

"असौ वा आदित्यो देवमधु" इत्यादि श्रुतौ आदित्यमण्डल प्राप्तिफलकेषु मधुविद्यादिषु आदित्यादीनां अधिकारासंभवात् स्वस्यैवोपास्यत्वोपासकत्वाभावात् विद्यात्वाविशेषात् ब्रह्मविद्यायामपि अनधिकारं जैमिनिराचार्योमन्यते ।

तत्र हेत्वन्तरमाह—

सू. ज्योतिषि भावाच्च ॥ ३२ ॥

नक्षत्रमण्डलेष्विव लोके आदित्येन्द्रादिशब्दानां ज्योतिर्मण्डले अचेतने प्रयुज्यमानत्वात् विग्रहवद्देवतायामप्रयोगात् नाधिकार इति भावः ।

तन्मतं निराकरोति—

सू. भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

तु शब्दः पूर्वपक्षनिराकरणार्थः । बादरायणः आचार्यः । मधुविद्यादिषु देवानामधिकाराभावेऽपि ब्रह्मविद्यायामधिकारं मन्यते । यद्यपि ज्योतिर्मण्डलादेरचेतनत्वान्नाधिकारः । तथाप्यस्ति हि तद्व्यतिरिक्ता

मण्डलाभिमानिनी विग्रहवती चेतना देवता पुराणेषु प्रतिपाद्यते इत्यर्थः । "अहहारेत्वा शूद्र तवै सः गोस्तिरिति" श्रुतौ शूद्रशब्दप्रयोगात् संस्काराभावप्रयुक्तशूद्रत्वाश्रयाणामपि ब्रह्मविद्यायामधिकारोऽस्तीति शङ्कां परिहरति —

सू. शुगस्य तदनादर श्रवणात्तदा द्रवणात् सूच्यते हि ॥ ३४ ॥

अस्य जानश्रुतेः तदनादरश्रवणात् हंसोक्तानादरवाक्यश्रवणात् शुगुत्पन्ना, तदा द्रवणात् तया आचार्यं प्रत्याद्रवणात् आगमनात् सूच्यते शूद्रशब्देन प्रतिपाद्यते इत्यर्थः। हि शब्दो हेत्वर्थकः । यतः शूद्रशब्दो न रूढः । किन्तु यौगिकः । ततः अदीक्षितस्य शूद्रस्य अन्तर्लिङ्गानुसन्धानरूप ब्रह्मोपासनं मोक्षप्रयोजकमित्यर्थः । अत्रैवाधिकरणे स्फुटीभविष्यत्येतत्—

ननु योगाद्रूढेर्बलीयस्त्वात् रुढोऽर्थः कस्मान्नाद्रियते तत्राह —

सू. क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

उत्तरवाक्ये "अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणा ब्रह्मचारीभिभिक्ष" इत्यत्र अभिप्रतारी चैत्ररथः क्षत्रिय इत्यवगम्यते । (चैत्ररथाख्येन क्षत्रियेण सह पाठालिङ्गात्) कापेयाख्य याजकयोगस्य "एतेन चैत्ररथं कापेया अयाजयन्" इत्यादिना श्रूयमाणत्वात् चैत्ररथक्षत्रियेण सह पाठालिङ्गात्

क्षत्रियत्वगतेः क्षत्रियत्वनिश्चयादित्यर्थः । अतोऽत्र क्षत्रिय एव शूद्र-शब्दो वर्तते । तस्मान्नादीक्षितस्य शूद्रस्य ब्रह्मविद्यायामधिकारः ।

ननु शूद्रस्य तत्त्वमस्यादि महावाक्यविचारजन्यब्रह्मविद्याया-मनधिकारे तस्य मोक्षः कथं स्यादित्यत्राह—

सू. संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३६ ॥

"पवित्रन्ते विततं ब्रह्मणस्पते", "सर्वलिङ्गं स्थापयति", "लिङ्गव्रतं चरेत्", "भृगुर्वै वारुणिः वरुणं पितरमुपससाद । अधीहि भगवो ब्रह्मेति" "तं होपनिन्ये" "चतुर्वर्णानां धारणं कुर्यात्" "सर्व वर्णेषु धारणम्" "अयं मे हस्तो भगवान्" "याते रुद्र शिवातनूरघोराऽपापकाशिनी" "त्र्यम्बकं यजामहे", "शिरसि महादेवस्तिष्ठत्विति धारयेत्" इत्यादिषु शिवदीक्षासंस्कारस्य परामर्शात् । संस्कारो नाम शिवदीक्षेति वायवीये कृष्णोपमन्युसंवादपरिशीलनेन ज्ञायते । तथा हि—

"इदानीं श्रोतुमिच्छामि शिवसंस्कारमुत्तमम्" इति प्रश्ने—उपमन्युः—"हन्त ते कथयिष्यामि सर्वपापविशोधनम् । संस्कारं परमं पुण्यं शिवेन परिभाषितम् ॥ सम्यक् कृताधिकारस्यात्पूजादिषु नरो यतः । संस्कारः कथ्यते तेन षडध्वपरिशोधनम् ॥ दीयते येन वै ज्ञानं क्षीयते पाशबन्धनम् । तस्मात्संस्कार एवायं दीक्षेत्यपि च कथ्यते ॥"

इत्यादिभिः क्रियासारकारादत्त श्लोकैः शिवदीक्षाया संस्कारत्व-दर्शनात्। एतादृशसंस्कारस्य को वाधिकारीत्यपेक्षायां "शक्तिपातानुसारेण शिष्योऽनुग्रहमर्हति। शिवधर्माधिकारस्य तन्मूलत्वात्समासतः" इत्यादि बहुवाक्यैः यत्र "शक्तिपातः" तस्याधिकारित्वमुक्तम्। अनधिकरित्वं च—

"यत्र शक्तिर्न पतिता तत्र शुद्धिर्न जायते।
न विद्या न शिवाचारो न मुक्तिर्न च सिद्धयः॥
तस्माल्लिङ्गानि संवीक्ष्य शक्तिपातस्य भूरिशः।
ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत्"॥"

इत्यादिनोक्तम्। एतद्वैपरीत्येऽपि—"योन्यथा कुरुते मोहात् स विनश्यति दुर्मतिः। तस्मात्सर्वप्रयत्नेन गुरुः शिष्यान् परीक्षयेत्" इत्यादिना निन्दाचोक्ता। शक्तिपातचिह्नानि तु—"लक्षणं शक्तिपातस्य प्रबोधानन्दसम्भवः। सा यस्मात्परमा शक्तिः प्रबोधानन्दरूपिणी। आनन्दबोधयोर्लिङ्गमन्तःकरणविक्रिया। यथा स्यात् कम्प रोमांच स्वरनेत्राङ्गविक्रिया" इत्यादिभिरुक्तानि बोद्धव्यानि।

उक्तं च सिद्धान्तशिखमणौ—"शक्तिपातं समालोक्य दीक्षया योजयेद्गुरुः॥" इति।

किञ्च—"किमत्र बहुनोक्तेन भक्तास्सर्वेऽधिकारिणः। मम पञ्चाक्षरे मन्त्रे तस्मात् श्रेष्टस्ततो हि सः" इत्यनेन मनुदीक्षाधिकारित्वा-

मपि भक्तमात्रे कथनात् । किञ्च—"भगवन् मोक्षमार्गोऽयं त्वया सम्यगुदाहृतः । तत्राधिकारिणं ब्रूहि तत्र मे संशयो महान्" । इति रामप्रश्ने "ब्रह्म क्षत्रियविट्शूद्रा स्त्रियश्चात्राधिकारिणः" । इति परमशिवेनैव सर्वेषां मोक्षमार्गाधिकारित्वस्योक्तत्वात् ।

किंच—तेनैव—"बहुनात्र किमुक्तेन यस्य भक्तिः शिवार्चने । स एवात्राधिकारी स्यान्नान्यचित्तः कथंचन" । इत्युक्तत्वाच्च मोक्ष-मार्गभूतब्रह्मविद्यायां मनुष्यमात्राधिकारित्वं ज्ञायते ।

किञ्च—वीरशैवधर्मशिरोमणिकारैरपि "यश्च मत्करुणापात्रं चरमं जन्म यस्य वै । तस्यैव जायते भक्तिर्मम लिङ्गस्य धारणे" ॥ इत्या-गमश्लोकमुक्त्वा लिङ्गधारणे शिष्यस्य भक्त्युद्रेकमालोक्य "हस्तमस्तक-संयोगमाचरेच्च शिवं स्मरन् । अर(?)वस्तु तिष्ठ शिवाज्ञेतीष्टाङ्गीकुर्या-ङ्गुरूस्ततः ॥

इत्यादिना शिवसंस्कारस्य भक्तमात्राधिकारित्वमुक्तम् ।

किञ्च—"भक्तिमात्र पवित्रा हि सर्वे एवाधिकारिणः" । इत्य-न्यत्र उक्तत्वाच्च । "परिपक्वमलान् शम्भुः सकलानां च मध्यतः । कृपया परया वीक्ष्य दीक्षयेद्देशिकोत्तमः ॥ गुरुश्च स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् ॥ ब्राह्मणं, क्षत्रियं वैश्यं द्विवर्षं त्रिवर्षं तथा ॥ प्राणद्रव्यप्रदानाद्यैरादेशैश्च समागमैः । आक्रुष्टास्ताडिता वापि ये विषादं न यान्त्यपि । ते योग्या संयताः शुद्धाश्शिवसंस्कारकर्मणि ॥

अहिंसका दयावन्तः नित्यमुद्युक्तचेतसः । अमानिनो बुद्धिमन्तस्त्यक्तस्पर्धाप्रियंवदाः ॥ ऋजवो मृदवो स्वस्था विनीता स्थिरचेतसः । शैवाचारसमोपेता शिवभक्ता द्विजातयः ॥ किमत्र बहुनोक्तेन योऽपि सोऽपि शिवाश्रितः ॥ संस्कार्यो गुर्वधीनश्चेत् संस्कारात् प्रतिभिद्यते " इत्युक्तत्वाच्च शिवसंस्कारार्हत्वं सर्वेषामिति सिद्धम् ।

न च स्त्रीशूद्रादीनां शिवसंस्कारार्हत्वेऽपि " स्त्रीशूद्रौ नाधीयेतां " इत्यादिना वेदाध्ययनस्यैव निषिद्धत्वे वेदार्थविचारानर्हत्वात् कथं ब्रह्मविद्यायां अधिकारः इति वाच्यम् । " तदभावाभिलापाच्च " तेषां शूद्रत्वादीनां धर्माणां अभावस्य अभिलापात् कथनादित्यर्थः । अभिलप्यते च लिङ्गोपनिषदि " कैलासस्वरूपं धारणं देहं वेदस्वरूपं धारणं देहं ब्रह्मस्वरूपं धारणं देहं " इत्यादिना शिवसंस्कार संस्कृतानां शूद्रत्वाद्यभावः । अपि च वृद्धजाबालोपनिषदि—" शिवस्वरूपो भवति । शिवस्वरूपो भवति " इत्यादिना । तथा " ब्राह्मणा क्षत्रिया वैश्या शूद्रा ये चान्त्यजातयः । लिङ्गधारणमात्रेण शिवा एव न संशयः " ।

किंच—श्री लिङ्गधारणमहाविभवेन सर्वे रुद्रा बभूवुरत एव न तारतम्यम् । एतन्मते स जननीक सुता इव स्युर्वीराः परस्पर सहोदर भावभाजः " इत्यभियुक्तोक्तेश्च ।

" यथा हि रजतं ताम्रं रसयोगात्सुवर्णतां । तथा शिवज्ञानरसात् शूद्रादिश्शिवतां व्रजेत् " । " यस्यैवं शाम्भवी भक्तिर्गुरुकृपा-

वशात् पूर्वजात्यादिकं तस्य न स्मरेत्प्राकृतं हि तत्। अप्राकृतस्य भक्तस्य गुरुहस्तकृपाम्बुजात्। पुनर्जातस्यात्मजन्मजात्यादि न च कल्पयेत्। " पाषाणादि कृतं लिङ्गं यद्वत् पूज्यं प्रतिष्ठितम्। नीचवंशोद्भवश्चापि भक्तश्चेत् ईश्वरे तथा " इत्यादिना शूद्रत्वाद्यभावो कथ्यते।

किञ्च—भक्तस्य प्राक्तनं जन्म नाम जात्यादिकं च यत्। पृच्छेद्वा कथयेद्वापि स वै पातकिनां वरः॥" इत्यादिना संकृतस्य शूद्रत्वारोपणे निन्दापि निगद्यते। किंच—"न तत्र जातिभेदोऽस्ति न शुच्यशुचि कल्पना" इत्यादिना जातिभेदो निषिध्यते। किंच—स्त्रियो बालास्तथा वृद्धा खंजाः कुब्जाश्च पङ्गवः। उन्मत्ता बधिराः कुष्टाशठाधूर्ताश्च वंचकाः। चोरा जारास्तथा वेश्याआचण्डालान्तसंभवाः॥ मल्लिङ्गधारणादेव मद्रूपा एव ते शिवे॥" इत्यादिना चाण्डालादीनामपि संस्कृतत्वे शूद्रत्वाभावो अभिलप्यते। " अन्त्यजो वापि मूर्खो वा पतितो ब्राह्मणोऽपि वा। शिवभावं प्रपन्नश्चेत् पूज्यः सर्वसुरासुरैः" इति क्रियासार कारिकयापि तत्कथनात् शिवदीक्षासंस्कारेण शिवभावापन्नस्य शूद्रत्वाद्यभावोऽभिलप्यते। अत एव " संस्काराद्विज उच्यते। वेदाध्यायी तु विप्रः स्यात् ब्रह्म जानाति ब्राह्मणः" इति वज्रसूच्युक्तिरपि संगच्छते। इदमत्राशयः साक्षान्मोक्षसाधन विभूति-रुद्राक्ष-लिङ्गधारण-बोधक श्रुतिभिस्तद्धारकाणां सर्वेषां शिवत्वे प्रतिपादिते सर्वासां महानदीनां ऋजुकुटिलानां समुद्रं प्राप्तानां इयमियं नदीति भेदाप्रतीतिवत् ब्राह्मणादि शूद्राणां शिवसंस्कारसंस्कृतानां वीरशैवमतप्रविष्टानां वर्णभेदस्याप्रतीयमानत्वम्। किन्तु सर्वासां नदीनां समुद्रत्ववत् शिवत्वमेवेति निर्णीयते।

न च संस्कारकालावच्छेदेन शूद्रत्वाद्यभावेऽपि तदूर्ध्वं तत्संभव इति वाच्यम्। शिवदीक्षासंस्कारस्य यावज्जीवं सत्वात्। अत एव दीक्षाया एव मोक्षसाक्षात्कारणत्वेऽपि न ब्रह्मजिज्ञासाया वैयर्थ्यं तस्या यावज्जीव भावित्वं तु—

"आदेहान्तमियं दीक्षा पशुपाशविनाशिनी।
यावज्जीवमिदं दत्तमिष्टलिङ्ग समर्चयन्"
इत्यादिनावगम्यते।

किञ्च—"दीक्षया मुच्यते देही विविधात् भवबन्धनात्। शिवत्वं याति स तदा न पुनः पशुतां व्रजेत्" रसविद्धं यथा ताम्रं ताम्रभावाद्विमुच्यते। सुवर्णेन सहैकत्वं गतं तद्याति हेमताम्॥ "नवनीतं यथा तप्तं तत्स्वभावं परित्यजेत्। घृतस्वभावमापन्ने न पुनर्नवनीतता" यथा शुक्तिगतं तोयं मौक्तिकत्वं न मुञ्चति। एवं स शिवतां प्राप्तो न पुनः पशुता व्रजेत् "शिवत्वान्न च हीयेत-विमुक्तो दीक्षया भवेत्॥"

इत्यादिना संस्कृतस्य पशुत्वादि निषेधे शूद्रत्वाद्यभावस्य कैमुतिकन्यायसिद्धत्वं बोध्यम्।

चकारेण जीवत्व-प्रेतत्वाभावावपि ज्ञायेते।

ननु शूद्रत्वाद्यभावापादक शिवसंस्कारसंस्कृतानां अग्निदग्धानां सर्वेषां वस्तूनामिव पवित्रत्वे सिद्धे तैः साकं भोजनवासादिकं स्यादिति

चेदस्तु लिङ्गाङ्गसामरस्यापन्नैर्दीक्षितैः शिवज्ञानिभिः शिवारूढैः सिद्धैः साकं "सिद्धिभिर्लक्षयेत् सिद्धिं जीवन्मुक्तिं तथैव च" इत्युक्तेः। लिङ्गाङ्गसामरस्य विधुराणामदीक्षितानां लिङ्गधारणमात्रशालिनां शूद्रादीनां स्वैरिणां परिशुद्धत्वाभावात् तैस्साकं ये संप्रदायशुद्ध वीरशैवमतानुगा ब्राह्मणादयो न तत्र जातिभेदोऽस्ति" इति पारमेश्वरागमप्रामाण्यात् "——जाति विषयान् परित्यजेत्।" इति श्रुति प्रामाण्यात्। "अपि वा यश्चण्डालः शिवेति वाचं वदेत् तेन सह भुञ्जीत, तेन सह संवसेत्" इत्यस्य श्रीमरितोण्टदार्योद्धृतस्य श्रुतिवाक्यस्य प्रामाण्याच्च। "अभेद बुध्या भोजनादि संबन्धं कुर्वन्ति ते। शिवोक्तां जातिमर्यादां योऽतीत्य भुवि वर्तते। स चण्डाल इति ज्ञेयः सर्वकर्मबहिष्कृतः॥ इति वाक्यावगतप्रत्यवायबद्धा देहान्ते नरकयातनामनुभवन्तीति दिक्।

नत्वुत्तमकुलजानामेव तत्त्ववेतृत्वमिति नियमो दृश्यते, बहुषु ब्राह्मणेषु यस्यकस्यचिदेव तत्त्ववेतृत्वदर्शनात्। तिर्यग्गर्भसम्भवा अपि महान्तो दृश्यन्ते। तथा च ब्रह्मोत्तरखण्डे—"किं भाव्यं किमभाव्यं वा संसारेऽस्मिन् भ्रमात्मके। ईश्वरस्य तु या माया तस्या को वेत्ति चेष्टितम्" हरिणी गर्भिणी भूत्वा ऋष्यशृङ्गमसूयत। सुराष्ट्रस्य तथा राज्ञः करं स्पृष्ट्वा सुराङ्गना। क्षत्क्षणात् गर्भिणी भूत्वा मनुं प्रासूत तापसम् "तथा सत्यवती कन्या शफरीगर्भसम्भवा। तस्यां व्यासः समुत्पन्नः सर्वविज्ञानसागरः"

वज्रसूच्यां च—“ऋष्यशृङ्गो मृग्यां, कौशिकः कुशास्तीर्णे, गौतमः शशपृष्ठे, जम्बुको जाम्बुक्यां, वशिष्ठो ऊर्वश्यां, वाल्मीको वल्मीक्यां, व्यासः कैवर्तक कन्यायां, अगस्त्यः कलशोद्भवः, विश्वामित्रः क्षत्रियः, नारदो दासी पुत्रः” इति। एवमादिदर्शनात्। न हि जन्मस्थान मात्रेण तत्त्वज्ञानिनो भवन्ति, किन्तु शिवदीक्षाग्नितप्तानां शिवज्ञानित्वं स्पष्टम्।

ननु शूद्रत्वादीनां जातीनां नित्यत्वात् कथं संस्कारस्य तध्वंसरूपाभावकारणत्वमिति चेन्न। प्रलये सर्वेषां शूद्रादि व्यक्तीनां नाशे आधारं विना आधेयस्थायित्वप्रसङ्गात्। द्रव्यत्वव्याप्य व्याप्यजातेः परमाण्ववृत्तित्वनियमाच्च। न हि घटत्वादिकमाधेयं घटाद्याधारं विना स्थीयते। तस्मात् शूद्रत्वादीनामनित्यत्वात् तध्वंसो युज्यते। उक्तं च क्रियासारे—‘वेदाचारयुतो विद्वान् ब्राह्मणो नाम नामतः। वेदाचारयुतो विप्रो ह्येतेष्वेकतवान् (?) द्विजः॥ अल्पाचारोऽल्पवेदश्च क्षत्रियो राजासेवकः। किञ्चिदाचारवान् वैश्यः कृषिवाणिज्यतस्तथा॥ ‘शूद्रब्राह्मणः” इत्युक्तः स्वयमेव हि कर्षकः। असूयालुः परद्रोही चण्डालद्विज उच्यते॥ पृथिवीपालको राजा इतरे क्षत्रियास्तथा। धान्यादिक्रयवान् वैश्यः इतरे विश उच्यते॥ ब्रह्मक्षत्रियवैश्यानां शुश्रुषुः शूद्र उच्यते। कर्षको वृषलो ज्ञेय इतरे चैव दस्यवः॥ इत्यादिषु पुराणानां वचनेषु गुणैः पुनः। सम्बन्धात् ब्राह्मणादीनि नामानि न च जातितः। वैदिकत्वाद्वीरशैवा आचाराद्वैदिकोत्तमाः” इति।

तस्मात् शूद्रत्वादीनामागन्तुकत्वात् संस्कारवशात् तन्निवृत्ति-रुपपद्यते ।

नन्वस्तु शूद्रादीनां संस्कारार्हत्वे तद्वशात् तन्निवृत्तिः "न शूद्रे पातकं किञ्चित् न च संस्कारमर्हति । शूद्रश्चतुर्थो वर्णो एक जातिः" इत्यादि स्मृतिषु तेषां संस्कारानर्हत्वमेव ज्ञायते । तस्मादसंस्कृतानां शूद्रादीनां कथं ब्रह्मोपासने अधिकार इति चेत्—उक्त श्रुत्यागमैः स्वतः प्रमाणभूतैश्शूद्रादीनां संस्कारार्हत्वे सिद्धे तद्विरुद्धस्मृतिवाक्यानाम प्रामाण्यात् । शैवागमानान्तु स्वतः प्रामाण्यम् । "आगमानां तु सर्वेषां स्वतः प्रामाण्यमुच्यते" इत्यादिना क्रियासारे साधितम् । तत एवावगन्तव्यम् ।

किञ्च—न हि शूद्रादीनां संस्कारानर्हत्वं कुत्रापि प्रत्यक्षश्रुतिषु दृश्यते । अत एव शूद्रादि संस्कारानर्हत्वादिभिः तेषां संस्काराभावे स्मृतिरेव प्रमाणत्वेनोपन्यस्यते । नैतद्रोचते मनुष्यमात्रहितचिन्तकेभ्यो निष्पक्षपातबुद्धिभ्यः । "हृद्यपेक्षया तु मनुष्याधिकारत्वात् ।" इति सूत्रेण मनुष्यमात्रस्य ब्रह्मविद्यायामधिकारस्य सूत्रकाराभिप्रेतत्वेऽपि केषांचिदधिकारः केषांचिन्नेति कथनं रागद्वेषप्रयुक्तमिति वक्तुं शक्यते ।

ननु "तदभावाभिलापाच्चेत्यत्र तत्पदेन संस्कारस्यैव गृहीतुं शक्यत्वात् । तस्यैव पूर्वोक्तत्वात्, तत्पदस्य पूर्वोक्तपरामर्शकत्वात्

कथं पूर्वोक्त शूद्रत्वादिकं गृह्यते इति चेन्न। तत्पदं कण्ठतः पूर्वोक्तमेव परामृशतीति नवैत्र नियमाभावात्। अस्मिन्नधिकरणे शूद्रत्वस्यापि प्रसङ्गात्। पूर्वोक्तत्वस्य ज्ञायमानत्वात्। अन्यथा "तदभाव-निर्धारणे च प्रवृत्तेः" इति सूत्रघटक तत्पदेनापि शूद्रत्वं गृह्येत। शूद्रत्वस्य पूर्वानुक्तत्वात्। तस्मात् "आगमेषु पदार्था ये त एव व्याससूत्रके" इत्यादि वचनानुरोधेन श्रुत्यागमानुकूल्येनैव व्याससूत्र तात्पर्यं वर्णनीयमित्यस्माकमाशयः। अत एवोक्तमस्मिन्नधिकरणे "संस्कारैः सस्कृता ये तु ते सर्वेप्यधिकारिणः" इति। "शूद्रादीनां नाधिकार इति सम्यक् सुनिश्चितः" इत्यनेन असंस्कृतानां शूद्रत्वात् तेषामेव नाधिकारः इति तेषामाशयः ज्ञायते। अन्यथा "आगमेषु पदार्था ये त एव व्याससूत्रके" इत्यादि स्वोक्तेर्विरोधः स्यात्।

किञ्च—"श्वपचोऽपि द्विजश्रेष्ठः शिवभक्त्या द्विजाधिकः। शिवभक्तिविहीनस्तु ब्राह्मणःश्वपचाधमः। शिवसंस्कारहीनास्तु द्विजोऽपि श्वपचाधमः" ॥

काञ्चनं रजतं ताम्रं लोहं चेति चतुष्टयम्।
यद्वदेति सुवर्णत्वं रसवेध प्रभावतः ॥
तद्वत् शूद्रादि पात्रं हि शिवमात्रात्मकेन तु।
विद्धद्रसेन महता परब्रह्मत्वमेत्यलम्।
शिवसंस्कारसम्पन्ना ह्ययं शूद्रोह्ययं द्विजः।
लिङ्गभेदः कृतो येन रौरवं नरकं व्रजेत् ॥

इत्यादि शिवरहस्य वाक्यानां अप्रामाण्यं स्यात।

ननु अस्मिन्नधिकरणे कारिकाटीकाकारेण निर्वाणमन्त्रिणा श्रीकरभाष्यकारेण श्रीपतिपण्डितेन शूद्रादीनां संस्काराभावस्य दर्शितत्वात् तयोर्भवदभिमत शिवदीक्षासम्पन्नत्वात् तदभिप्रायानुसारेणौचित्यात् किं तदभिप्रायविरुद्ध व्याख्यानेनेति चेन्न। निर्वाणमन्त्रिणा कारिकाकारतात्पर्यगन्धलेशस्याप्यज्ञातत्वात् क्रियासारस्य साकल्येनाविचारितत्वात् मायावादिभिरिव शूद्रादिसंस्कारानर्हत्वं दर्शितम्! श्रीकरभाष्यकारेणापि पूर्वापरसूत्रपर्यालोचनाभावादेव दर्शितमिति मद्व्याख्यानपरिशीलनचतुरैः ज्ञायत एव। अनेन क्रियाङ्गभूत यज्ञोपवीत, मोक्षप्रयोजकविद्याङ्ग लिङ्गयोरुभयोरपि धृतत्वात् अनयोः स्वस्वकार्याजनौन्मुख्ये सति परस्परविरुद्ध प्रमदाकृष्टपुरुषस्येवान्येषां च एतदनुयायिनां न किमपि प्रयोजनं स्यात्। "नौकायामेकपादस्तु पादस्तीरं न मुञ्चति" इति न्यायेन अस्याधुनिकस्य भाष्यकारस्य भवसागरातिक्रमणं स्यात्। उक्तं च भृगुसंहितायां—"सदा सन्निहितः शैवश्चांण्डलो........नैव सर्वदा। गतं शूद्रस्याशूद्रत्वमन्यथा ब्राह्मणस्य तु"॥ शिवसंस्कारसम्पन्ने जातिभेदो न विद्यते"। उक्तं च गरुडपुराणे—"नमके चमके पञ्चब्रह्ममात्रे च वैदके। तेषामप्यधिकारोस्ति शिवदीक्षाप्रभावतः॥ उक्त च शिवपुराणे—

"यथा पङ्के सरोजं स्यात् यथा काष्ठे हुताशनः।
यथा सुवर्णं पाषाणे भक्तश्चाण्डालवंशजः॥
स्त्रीवाथ पुरुषष्षण्डश्चण्ड लो द्विजवंशजः।
न जातिभेदो लिङ्गार्चास्सर्वे रुद्रगणाः स्मृताः॥

शिवदीक्षाभिजातस्य पूर्वजातिं न चिन्तयेत् ।
सुप्रतिष्ठितलिङ्गे तु न यथा पूर्वभावना ॥

उक्तं च लैङ्गेऽपि—" दार्वश्मलोहमृद्रत्नजातलिङ्गं प्रतिष्ठितम् यथापूज्यं तथैव स्यात् भक्तश्चण्डलवंशजः ॥ उक्तं च शिवरहस्ये प्रदेशान्तरे—

" सर्ववेदेषु सर्वज्ञस्सर्व यज्ञेषु दीक्षितः ।
महापातककोटिघ्नः श्वपचो लिङ्गपूजकः ॥

उक्तं च महाभारतेऽपि —
" जन्मना जायते शूद्रः कर्मणा जायते द्विजः ।
वेदशास्त्रार्थविद्विप्रो ब्रह्मजानाति ब्राह्मणः ॥ "

उक्तं च स्कान्दपुराणे—
" ये रुद्रपिण्डसंजाता ये वेदक्रमपाठकाः ।
ये विदुर्ब्रह्मवाच्यं श्रीरुद्रं ते ब्राह्मणाः स्मृताः ॥ "

इत्याद्यसंख्यातवाक्यानां प्रामाण्यात् शूद्रादीनां संस्काराधिकारत्वात् तेषां संस्कृतत्वे वेदाध्ययन वेदार्थविचाराद्यधिकारत्वात्, न हि तेषां संस्काराधिकाराभावात् न ब्रह्मविद्याधिकार इति वादिनां मतं शिष्टादरणीयं भवितुमर्हति ।

अदीक्षितानां सर्वेषां महावाक्यश्रवणादौ शिवज्ञानिनो न प्रवर्तन्त

इत्याह—

सू. तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

वेदादि दीक्षात्रयेण योगाङ्ग-भोगाङ्गत्यागाङ्गापरनामक कारण-सूक्ष्म-स्थूल शरीरत्रयावच्छिन्न जीवत्रये भावादिलिङ्गत्रययोजनानन्तरं शिष्यस्य शूद्रत्वाभावं निश्चित्य गुरुः तस्य तत्त्वमस्याद्युपदेशे प्रवर्तते । तस्माद्दीक्षाभावे शूद्रादीनां महावाक्यश्रवणादौ नाधिकारः । अत्र "कोऽहमित्यब्रवीद्देही गुरुं परमकारणं गुरुस्तत्त्वमसीत्याह सत्यार्थं करुणानिधिः" इत्यादीनि वाक्यानि अनुसन्धेयानि ।

एवं च लिङ्गधारणशालिनां शिवज्ञानिनां गौतमादिमुनीनां दीक्षया शूद्रत्वादीनामभावस्य निर्धारणे सति शरणागतशिष्यविद्योपदेशे प्रवृत्तेर्दर्शनात् । गौतमादीनां लिंगधारणशालित्वे—" ब्रह्मविष्णवादयो देवा मुनयो गौतमादयः । धारयन्ति सदा लिंगमुत्तमांगे विशेषतः " इत्यादीनि प्रमाणानि द्रष्टव्यानि । तस्मात् दीक्षितस्य ब्रह्मविद्यायामधिकारः । अदीक्षितस्य मलत्रयविद्ध्वंसाभावात् । ' अतप्ततनुर्न तदामोऽश्नुते " इति श्रुतेः । अतप्ता वेधा-मनु-क्रियादीक्षात्रयेण निर्दग्धा पापपञ्जरा तनुर्यस्य सा न भवतीत्यतप्ततनुः, दीक्षात्रयरहितः, अत एव अामः—अपरिपक्वान्तःकरणः सन् तत् शिवस्वरूपं न अश्नुते । एतद्व्यतिरेकव्याप्त्या "अमृतस्य देवधारणो भूयासं" इत्याद्यनेक श्रुतिभिश्च मुक्त्यसाधारणकारणताग्राहक व्यतिरेकान्वयदर्शनात् । "लिंगांगसंगिनो वत्स पुनर्जन्म न विद्यते ' इति शङ्करसंहितावचनानुरोधेन च शिवदीक्षाया एव मुक्त्यसाधारणकारणत्वात् । तदभावे तत्कारणक वेदवाक्यश्रवण वेदाध्ययनादि प्रति पद्यते इत्याह ।

सू॰ श्रवणाध्ययनार्थ प्रतिषेधात् ॥ ३८ ॥

"ज्ञानादीनामुपायानां दीक्षाकरणमर्यते । दीक्षयैव विमोक्षः स्यादुपायस्तन्नियामकाः ॥" ज्ञानादीनां वेदार्थज्ञानादीनां, आदिपदेन श्रवणादेः गृह्यमाणात्वात्, दीक्षारूपकरणाभावे तत्कार्यरूप श्रवणाध्ययनादीनां अभावात् नैवादीक्षित शूद्रादेर्ब्रह्मविद्यायामधिकारः तस्मात् सर्वेऽपि मानवा दीक्षासम्पन्नाः सन्तः वेदश्रवण वेदाध्ययनादिना मुक्ता भवेयुरिति सूत्र तात्पर्यम् । अत एवोच्यते दीक्षारूपापि यस्य सर्वश्रेष्ठत्वम् । तथा च—"दीक्षैव मोक्षदा पुंसां चिदचित् शक्तिकारणम् । नास्ति दीक्षा समं तीर्थं नास्ति दीक्षासमं तपः । नास्ति दीक्षासम शीलं । नास्ति दीक्षासम् धनम् ॥ नास्ति दीक्षासमो धर्मो । नास्ति दीक्षासमो गुणः नास्ति दीक्षासमं ज्ञानं नास्ति दीक्षासमं कुलम् । सा दीक्षा तु गुरुणा कार्या तस्य भेद इहोच्यते" इति ।

शिवदीक्षायाः स्वीकाराभावे प्रत्यवायोऽपि दृश्यते । "लिङ्गस्य धारणं यस्य स्थूलदेहे न विद्यते । तद्देहं निष्फलं ज्ञेय जीवत्यक्तशरीरवत् । यथा श्मशानगं काष्ठ अनर्हं सर्वकर्मसु । तथा लिङ्गविहीनस्तु सर्वकर्मबहिष्कृत" यस्य वक्षस्थले लिङ्ग कण्ठे रुद्राक्षमालिका । न फाले भूतिरेखाश्च तं त्यजेदन्त्यजं यथा ॥ लिङ्गस्य धारणं विप्रा मनसापि न लङ्घयेत् । श्रुत्या विधीयते यस्मात् तत्यागी पतितो भवेत् ॥ ब्राह्मणानां शिवो देवस्तस्मात्तल्लिङ्गधारणम् । कर्तव्यं ब्राह्मणानान्तु वेदवेदान्तशासनात् इति । लिङ्गविहीनस्य सर्ववैदिक

कर्मबहिष्कृतत्वे सिद्धे वेदश्रवणाध्ययनादिकस्य सुतरां निषेधोऽवगम्यते । एव व्यवस्थिते पराहतानि " तस्माच्छूद्रसमीपे नाध्येतव्यम् " " शूद्रस्य न मतिं दद्यात् " इत्यदीन्यपि वाक्यानि अदीक्षित समीपेऽध्ययनादिकं निवारयन्तीति बोध्यम् । दीक्षैव मोक्षकारणमिति व्यतिरेकमुखेनोक्त्वान्वय-मुखेन " स्मृतितोऽपि दीक्षितस्यैव ब्रह्मविद्यालाभो भवति । तल्लाभे मोक्ष इत्याह ।

सू. स्मृतेश्च ॥ ३९ ॥

" कीटो भ्रमरयोगेन भ्रमरो भवति ध्रुवम् । मानवः शिवयोगेन शिवो भवति सर्वदा " इति स्मृतेश्चेत्यर्थः । तथा चोक्तरीत्या दीक्षात्रयेण शिवात्मकलिङ्गयोगे सति श्रवणाध्यनादिकं कृत्वा शिवो भवति, शिवस्वरूपो भवति इत्यर्थः । अत एवोक्तं " यदा गुरुवरः सम्यक् कथयेत्तत्र संशय । तदैव जायते मुक्तिर्यन्त्रस्तिष्ठति केवलः " इति । अत एवाम्नायेषु यदुच्यते—" शिवो भूत्वा शिवं यजेत् " इति तस्य शिवदीक्षासम्पन्नो भूत्वा शिवलिङ्गरूपं यजेत् इत्यर्थः संगच्छते ।

उक्तं च शिवधर्मेऽपि—" ना रुद्रः संस्मरेद्रुद्रं नारुद्रो रुद्रमर्चयेत् ॥ नारुद्रः कीर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् ॥ इति । तस्मात् दीक्षा सम्पन्नस्य शिवत्वसमावेशात् " यः शिवत्वसमावेशो वेधादीक्षेति सा मता " इत्युक्त्वा—" शिवो भूत्वा शिवं यजेदिति श्रुतिः शिवयजनं विधत्ते । दीक्षासंस्कारस्य लिंगधारणादि पञ्चाचाराष्टावरणयोग्यता निर्वहणांगत्वेन शेषशेषिभावदर्शनात् शिवत्व समावेशस्य वेधादीक्षात्व-

मुक्तमसंगतमिति चेन्न । स्वर्गकामो ज्योतिष्टोमेन यजेत ", " स्वर्गकामो इष्ट्या यजेत " इति । तत् स्वर्गसुखविशेषस्य वैलक्षण्यं । ज्योतिष्टोमेन अन्यत् स्वर्गरूपं सुखं अन्यत् सुखमिष्ट्या इतीव । शिवत्वसमावेशस्य वैलक्षण्यात् वेधादीक्षायां यत् किंचित्समावेशस्य अंशविरूपो उपचय क्रमेण सम्भवात्, दीक्षाभूतिधारण रुद्राक्षधारण पंचाक्षरोपदेशादिषु पूर्व पूर्वविलक्षण शिवत्वसमावेशस्य सुवचत्वात् । पूर्वतन्त्रानुरोधेनैव यश्शिवत्वसमावेशो । वेधादीक्षेति सा मता ॥ मन्त्रदीक्षेति सा चोक्ता मन्त्रमान्त्रोपदेशिनी । लिङ्गोपदेशिनी प्रोक्ता क्रियादीक्षा क्रियोत्तरा ॥ इति उक्तत्वात् । अथमेव उत्पलदेवाचार्येणाप्युक्तम् शिवस्तोत्रावल्यां —" शिवेभूत्वा यजतेति " भक्तोभूत्वेति कथ्यते । त्वमेव हि वपुस्सारं भक्तैरध्व सु शोधितम् इति । तथाचोक्तस्मृत्या शिवदीक्षासम्पन्नस्यैव शिवत्वसमावेशापन्नत्वात् स एव श्रवणाध्ययनादिकर्मार्हति नान्य इति सिद्धम् "

एवं च अदीक्षितानां पूर्वजात्यादि सत्वात् शिवत्व समावेशाभावात् " शिवो भूत्वा शिवं यजेदिति विधानाच्च न तेषां शिवलिङ्गरूपब्रह्मोपासने अधिकारः । यजनं चात्र धारणम् " त्र्यम्बकं यजामहे इत्यादेरुपबृंहणवाक्ये " यजामहे धारयामो " इत्युपबृंहणत्वात् माहेश्वर क्षेमराजसुधीभिरपि स्वस्वरूप शिवसमावेश भक्तिशाल्येव यजनमित्युक्त वाच्च ।

यद्यपि परादृतं " अथ हास्यवेदमुपशृण्वतः " इत्यादिकमपि वाक्यम् । तद्भाष्ये ....स्येतत् पदस्य दीक्षित परत्वेन व्याख्याने

नास्मकं विरोधः । तदप्यहिंसा परिपालनशालिनां वीरशैवानां तादृशवाक्योच्चरणस्याप्ययुक्तत्यात् । तदुच्चरणे तदुल्लङ्घने वा कस्याश्चिद्धिंसायाः संभवात् । किञ्चि—पाथकादीनामकस्मात् तच्छ्रवणे तादृशदण्डानर्हत्वात् । तस्यन्याय्यत्वाच्च " अदण्ड्यान् दण्डयन् राजा " इत्यादिना विचारमन्तरा दण्डकरणे प्रत्यवायदर्शनात् । धूर्तैरसूयान्धैः कल्पितं तादृशवाक्य विवेकहीनो उन्मत्तोक्तमिव नादरणीयमिति ।

एवं च श्रीमद्वीरशैवाचारनिरतैः सदा लिङ्गाङ्गसंयोगसन्निहितैः गुरुलिङ्गजङ्गम पादोदकप्रसादासक्तैः विभूतिधारण, रुद्राक्षधारण पञ्चाक्षर जपयुक्तैः वेदान्तागमोदित वीरमाहेश्वरोचित तत्त्वमस्यादि महावाक्यार्थ लिङ्गाङ्गसंयोगब्रह्मात्मैक्यज्ञाननिष्ठैः सदाचारप्रवर्तकैःशिवभक्तैः शिवेतरदेवतास्मरणसंस्तवन दर्शनस्पर्शनादि विमुखैः श्रीनन्दिनाथ श्रीभृङ्गनाथ श्रीवीरभद्रेश्वरादि प्रमथगणैः कलाविकरणरुद्र श्रीकण्ठरुद्र, नीललोहितरुद्रकालाग्निरुद्रादिरुद्रगणैः श्रीमरुलसिद्धरेवणसिद्धादि आचार्यगणैः गौतमदूर्वासगस्त्योपमन्युवामदेवादिमुनिगणैः शूद्रादिसंस्कारानर्हत्वस्यानभ्युपगतत्वात् ।

महाजनमार्गावलम्बिनो वय " यः स्थापयितुमुद्यक्तः श्रद्धयैवाक्षमोऽपि सन् । धर्मं स्थापयितु पुंसां यतमानः स हि द्विजाः । रक्षणं कुरुते यस्तु सोऽपीश्वरपदं व्रजेत् । यः शाम्भवमहाधर्मं स्थापनार्थं त्यजेदसून् । स गणेशत्वमाप्नोति शङ्करस्य प्रसादतः " इत्युक्तरीत्या वस्तुतो वीरशैवसिद्धान्तपरक ब्रह्मसूत्राणां तन्मात्रपरकतया व्याख्यानाद्यमनिरतास्मः । तस्मान्न स्वकपोलकल्पितत्व दिदोषस्पर्शलेशस्याप्यवकाशः इति ॥

प्रासङ्गिकमधिकारिनिरूपणं कृत्वा प्रकृतमनुसरति—

सू. कम्पनात् ॥ ३९ ॥

"यदिदं किञ्च जगत्सर्वं प्राण एजति निसृतम्" इति वाक्ये प्राणशब्देन परशिवब्रह्मोच्यते। कुतः कम्पनात्। उत्पन्नसकलप्रपंचस्य परशिवब्रह्मानुशासनेन कम्पनादित्यर्थः। प्राणवायोस्सकलप्रपञ्चकम्पनहेतुत्वाभावात्। परशिवस्य कल्याणमूर्तित्वेऽपि सर्वनियामकशक्तिमत्वात् सर्वभयदर्शकत्वं पवनादीनामीशशासनभयादेव। पवमानत्व दीनां श्रवणात्। तस्यैव सकलप्रपञ्च भयहेतुत्वम्।

एवं ज्योतिश्शब्दवाच्यत्वमपि परशिवस्यैवेति दर्शयति—

सू. ज्योतिर्दर्शनात् ॥ ४० ॥

"एष संप्रसादो अस्मात् शरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रुपेणाभिनिष्पद्यते" इत्यत्र ज्योतिश्शब्देन परशिवब्रह्मोच्यते, न तु भौतिकं ज्योतिर्गृह्यते। कुतः दर्शनात्। "तं देवा ज्योतिषां ज्योति रित्यादौ ज्योतिश्शब्दस्य परशिवब्रह्मणि प्रयोगदर्शनात्। "स उत्तमः पुरुष" इत्यनेन ज्योतिश्शब्दनिर्दिष्टस्य उत्तमपुरुषत्वाभिधानात् परशिवब्रह्मनिर्णयाच्च ज्योतिश्शब्दवाच्यत्वं परशिवस्यैवेनि सिद्धम्। हरिवंशे कृष्णं प्रति परमेश्वरवचनं च "यानि नामानि गोविन्द तव लोके महीयतो। तान्येव मम नामानि नात्र कार्या विचारणा" इति वाक्यदर्शनात् पुरुषोत्तमशब्दवाच्यत्वं तस्यैव सिद्धम्।

आकाशशब्दवाच्यत्वं शिवस्यैवेति दर्शयति—

सू. आकाशो अर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥

आकाशो वै नाम न मरूपयोर्निर्वहिता ; ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा इत्यत्र श्रुतौ नामरूपनिर्वोढुत्वेन श्रूयमाण आकाशः परमात्मैव न भूताकाशादि । कुतः "अर्थान्तरत्वादि व्यपदेशात् । अर्थानां-पदार्थानां, अन्तरत्वादिव्यपदेशात् नामरूपात्मक स्थूलसूक्ष्म चिदचित्प्रपञ्चान्तर्यामित्व कथनादित्यर्थः । आदिना "ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा" इत्यादिना निर्दिष्टस्य अमृतत्वादितद्धर्म-व्यपदेशोऽपि ग्राह्यः । न हि भूताकाशादौ अमृतत्वादि धर्मास्सम्भवन्ति । अतः परमेश्वर एव आकाशशब्दवाच्यः ।

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु, हृद्यन्तर्ज्योतिः पुरुषः इत्यत्र विज्ञानमयशब्दवाच्यत्वं मुक्तजीवस्य न तु बद्धजीवस्येति दर्शयति—

सू. सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥

व्यपदेशादित्यनुवृत्तिः । सुषुप्त्युत्क्रान्त्योः सुषुप्त्यवस्थाया-मुत्क्रान्त्यवस्थायां च जीवब्रह्माभेदस्य भेदेन द्विवारं प्रतिपादितत्वात् । तथाहि—अयं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेदनान्तरं इति "अयं शारीर आत्मा प्राज्ञेनात्मना न्वारूढ उत्सर्जन्याति" इति च जीवाद्व्यति रिक्ततया परमेश्वरस्य व्यपदेशात् इत्यर्थः ।

किञ्च हेत्वन्तरमाह—

सू. पत्यादिशब्देभ्यः ॥ ४३ ॥

"स सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपति स न साधुना कर्मणा भूयान् नो एवा साधुना कनीयान् एष सर्वेश्वर एष भूतपति-रेष भूतपालः" इत्युत्तरत्र ईशानादि पदप्रयोगादपि कतमात्मेत्यादि वाक्यस्य मुक्तजीवपरकत्वनिर्णयादित्यर्थः ।

इति श्री शाङ्करीवृत्तौ प्रथमाध्यायस्य तृतीयः पादस्समाप्तः

एवं वेदान्तानां सर्वेषां परशिवप्रतिपादकत्वे सिद्धेऽपि कासु चित् शाखासु प्रधानजगत्कारणत्व प्रतिपादकशब्दानां दृष्टत्वात् कथं तस्याशब्दत्वमित्याशंकायां चतुर्थः पाद आरभ्यते ।

नत्वा श्री सर्वविद्येशं धृत्वा शिवकलां हृदि ।
स्तुत्वा गुरूंश्च तुर्यस्य वृत्तिः पादस्य कथ्यते ॥

प्रथमाध्याये चतुर्थः पादः ।

सू. आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त-गृहीतेर्दर्शयति च ॥ १ ॥

अनुमानिक सांख्यपरिकल्पत प्रकृत्यादि, एकेषां, शाखिनां शाखासु "महतः परमव्यक्तं अव्यक्तात्पुरुषः परः" इत्यत्र प्रधानं अव्यक्तशब्देन प्रतिपाद्यते । एवं जातीयकेषु श्रुतिषु सांख्यमत पदार्थानां श्रूयमाणत्वात् कथं प्रधानस्याशब्दत्वमिति चेन्न । "शरीर-

रूपकविन्यस्तगृहीतेः " शरीरस्य, रूपकतिन्यस्तस्य पूर्ववाक्ये " आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यत्र रथत्वेन निरूदितस्य गृहितेः। अत्र अव्यक्तशब्देन ग्रहणादित्यर्थः । अव्यक्तशब्दस्य कथं शरीरपरकत्वं ? इत्याशंकायांमाह दर्शयति चेति" पूर्ववाक्यतात्पर्यं पर्यालोच्यमानं अव्यक्तशब्दस्य शरीरपरत्वं दर्शयिति इत्यर्थः । तथा हि—" आत्मानं रथिनं विद्धि शरीरं रथमेव च । बुद्धिन्तु सारथिं विद्धिं मनः प्रग्रहमेव च । इन्द्रियाणि हतनाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः "इति शरीरादेः रथादि क्लृप्तिं दर्शयति । अनन्तरं " इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिः बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित् । सा काष्ठा सा परा गतिः ।

ननु शरीरस्य व्यक्तत्वात् कथं तस्य अव्यक्तशब्देन ग्रहणमित्यत्राह ।

सू. सूक्ष्मन्तु तदर्हत्वात् ॥ २ ॥

तु शब्दः शङ्कानिरासार्थः सूक्ष्मं लिङ्गशरीरं अव्यक्तशब्देन गृह्यते ; कुतः तदर्हत्वात् , अव्यक्तशब्दार्हत्वादित्यर्थः । तत्कार्यत्वात् स्तूलशरीरस्य कार्यकारणयोरभेदात् अव्यक्तशब्देन तस्यापि ग्रहणे न दोषः ।

ननु "महतः परमव्यक्तं " इत्यत्र महतः आत्मनः परत्वं कथमव्यक्तस्य शरीरस्य इति चेदाह—

सू. तदधीनत्वादर्थवत् ॥ ३ ॥

तदधीनत्वात्, शरीराधीनत्वात्, अर्थवत्, शरीरस्य आत्मनः परत्वं अर्थवदित्यर्थः। इन्द्रियव्यापारस्य अर्थाधीनत्वाद्यथा इन्द्रियेभ्यः परत्वमर्थानां तथाआत्मनो बन्धमोक्षादि व्यवहारस्य शरीराधीनत्वाच्छरीरस्यात्मनः परत्वं अर्थवज्जायत इत्यर्थः।

प्रकृतिपुरुष विवेकज्ञानात् मोक्ष इत्यङ्गीकुर्वाणैस्सांख्यैः प्रधानमपि ज्ञेयत्वेनोक्तं स्यात्। न चात्रज्ञेयत्वेन प्रधानमुच्यते इत्याह—

सू. ज्ञेयत्वावचनाच्च ॥ ४ ॥

ज्ञेयत्वस्य अवचनात् अकथनादित्यर्थः, अव्यक्तमात्रशब्दश्रवणात् न प्रधानमिहाव्यक्तं भवति।

ननु ज्ञेयत्वमप्यस्योक्तमित्यत्राह —

सू. वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

"अशब्दमस्पर्शमरूपमव्ययं। तथाऽरसं नित्यमगन्धवच्च यत्" अनाद्यनन्तं महतः परं ध्रुवं। निचाय्य तं मृत्युमुखात्प्रमुच्यते ॥ इत्युत्तरवाक्य शब्दादिरहितस्य प्रधानस्य ज्ञेयत्वं वदतीति चेन्न। प्राज्ञो हि—अत्र निचाय्यत्वेनोच्यते। कुतः प्रकरणात्, प्राज्ञस्यैव प्रकरणात्, "पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः" इत्याद्युपक्रमात् न प्रधानस्य प्रकरणमस्ति। न हि" प्रधानमात्रं ज्ञात्वा

मृत्युमुखात् मुच्यते इति सांख्यै रङ्गीक्रियते। अङ्गीक्रियते च-चेतन पुरुषविज्ञानात् मृत्युमुखान्मुच्यत इति। तस्मात् शब्दादिविहीनस्य प्राज्ञस्यैवात्मनो ज्ञेयत्वं न प्रधानस्येति भावः।

इतश्च नाव्यक्त प्रधानमित्याह—

सू॰ त्रयाणामेव चैव मुपन्यासः प्रश्नश्च ॥ ६ ॥

त्रयाणां अग्निजीवेश्वराणां "सत्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्धधानाय मह्यम्।" इत्यग्निविषयः प्रश्नः। "योऽयं प्रेते विचित्रामनुष्येऽस्तीत्येके नायमस्तीति चैके" एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः" इति जीवविषयकः प्रश्नः। "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद"। इतीश्वरविषयः प्रश्नः। एवमुपन्यासोऽपि, प्रतिवचनमपीत्यर्थः "लोक दिमग्निं तमुवाच तस्मै या इष्टिका यावतीर्वा यथा वा" इति श्रुतेः। "योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुशयन्ति यथा कर्म यथाश्रुतम्"इति श्रुतेः। "न जायते म्रियते वा विपश्चित्" इति श्रुतेश्च। अग्निजीवेश्वराणां प्रतिवचनं दृश्यते प्रधानविषयक प्रश्नप्रतिवचनयोरसत्वात् न प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा।

किञ्च हेत्वन्तरमाह—

सू. महद्वच्च ॥ ७ ॥

"बुद्धेरात्मा महापरः" इत्यत्रा न प्रधानविकारो महान्भवति, आत्मशब्दप्रयोगात् । महच्छब्दस्य आत्मवाचकत्वात अव्यक्तशब्दस्यापि शरीरवाचकत्वमित्यर्थः । तस्मान्न सांख्याभिमतप्रधानस्य शब्दवत्वम् ।

नन्वन्यत्र जगत्कारणत्वेन श्रूयमाणस्य प्रधानस्य । अत्र तस्याप्रकृतत्वेऽपि शब्दवत्वमस्तु इति चेदाह—

सू. चमसवदविशेषात् ॥ ८ ॥

ननु "अजामेकां लोहितशुक्लकृष्णां" इत्यादि श्रुत्या सांख्यसिद्ध प्रधानस्य त्रिगुणात्मकस्योपदेशात् । तस्य कथमशब्दत्वमिति चेन्न । अविशेषात् । अस्मिन् वाक्ये प्रधानस्य कस्यचिद्विशेषकशब्दाभावात् ।

"अर्वाग्बिल ऊर्ध्वबुध्नश्चमसः" इत्यत्र चमसवत् यथात्रायमसौ चमस इति विशेषावगत्यभावात् न विशेषनिर्णयः तथेत्यर्थः ।

ननु इदं तच्छिर इत्यादि वाक्यशेषात् शिरश्चमसनिर्णयः । अत्र कथमिति चेदाह—

सू. ज्योतिरुपक्रमात्तु तथाह्यधीयत एके ॥ ९ ॥

"यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य" इत्येके शाखिनश्छान्दोग्येऽधीयते। तस्मात् परमशिवाविर्भूत ज्योतिः तेजोऽबन्नलक्षणाप्रकृतिरेवाजा शब्देन गृह्यते। अत्र प्रकृति शक्तिरेव, न तु तदतिरिक्तेत्यर्थः। कुतः? "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढां" इत्युपक्रमात्। वाक्यशेषेऽपि "मायान्तु प्रकृतिं विन्द्यात् मायिनं तु महेश्वरमिति" तस्या एव शैवशक्तेर्दर्शनात्। न प्रकृतिः प्रधानं सांख्यसिद्धं अजाशब्देनोक्तुं शक्यते। न वा मिथ्याभूता मायावादिसिद्धाऽविद्या। "परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुत्या शिवशक्तेः शिवरूपावगमात्। अत्रापि मं शिवं अयति गच्छत्यविनाभावसम्बन्धेन वर्तते इति व्युत्पत्तिमाश्रित्य मायां शिवसमवेतां विमर्शशक्तिं प्रकृतिं प्रकृष्टा कृतिः जगत् सृष्ट्यादि पञ्चकृत्यरूपा यस्या स्तमित्यर्थः तत्कार्यरूपेण गुणशक्तेस्त्रैरूप्यमुक्तम् (लोहित शुक्लकृष्ण पदत्रयेणेत्यर्थः) तथाचोक्तं कारिकाकारेण।

तेजोबन्नप्रकृतिश्चाप्यजा शब्देन गृह्यते।
तथ ह्येकेऽधीयतेऽत्र प्रकृतिश्शक्तिरेव च ॥

ननु परमशिवाविर्भूत तेजोबन्नात्मिकाया अवान्तरशक्तेः परशिवकार्यत्वात कथमजाशब्देन ग्रहीतुं सा शक्यतेत्याकांक्षायामाह—

सू. कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

च शब्दः पूर्वपक्षनिरासार्थः । अवान्तरकार्यरूपप्रकृतेः नाजात्वानुपपत्तिः । कल्पनोपदेशात् । साम्योपदेशात् । अविरोधः अजाशब्दस्य विरोधो नास्तीत्यर्थः । मध्वादिवत् । "असौ वा आदित्यो देवमधु" इत्यत्र यथादित्यस्य मधूत्वकल्पनमुच्यते तथात्रापि लोकप्रसिद्ध अजासादृश्यमुच्यते । न चात्र प्रकृतेः स्वातन्त्रेण कारणत्वमिति वाच्यम् । "छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भवायच्च वेदा वदन्ति"॥ "अस्मान्मायी सृजते विश्वमेतत् । तस्मिंश्चान्यो मायया सन्निरुद्धः ॥" इति श्रुत्या मायाविशिष्टस्यैव शिवस्य कारणत्व श्रवणात् । इच्छाशक्त्यंशाविर्भूतस्थूलमायाशक्तेरेव सृष्टिदशायां कार्यत्वम् । मोक्षदशायां विलीनत्वं च । न तु शिवाभिन्नेच्छाशक्तेः । तस्मात् शिवाविभिक्त शक्तेरजाशब्दवाच्यप्रकृतेः परशिव निष्ठकारणत्वं न विरुध्यते । इत्यपि बोध्यम् । शक्तेश्शिवाभिन्नत्वे शक्तिरस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः । शक्तिस्तु शक्तिम पाव्यतिरिक्ता हि न क्वचित् ॥ तादात्म्यमनयोर्नित्य वह्निदाहकशक्तिवत् ॥ शक्तिशक्तिमतो यस्माद भेदः सर्वदा स्थितः" इति ।

प्रधानस्य जगत्कारणत्वं निरस्य पञ्चविंशति तत्त्वानि वैदिकानीत्यङ्गीकृत्य निराकरोत्यधिकरणान्तरेण

सू. न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

संख्योपसंग्रहात् " यस्मिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः इत्यत्र पञ्चविंशति संख्या श्रवणात् ।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्त्वविकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ "

इति सांख्यसिद्धानि पंचविंशति तत्त्वानि वैदिकानीति वक्तुं शक्यत्वे कथं मूलप्रकृतेरवैदिकत्वमिति चेत् न । नानाभावात् नानात्वात् । पञ्चविंशति संख्याकपदार्थानां बहूनां सत्वात् । अतिरेकाच्च आकाश-पुरुषकालादीनां पंचविंशति संख्यातिरिक्त....न् षट्त्रिंशत् संख्योपपत्तेः । न पंचविंशतिसंख्या प्रतिपत्तिः । नन्वत्र कालादितत्त्वानामदर्शनात् कथं षट्त्रिंशत्तत्त्वसंख्या प्रतिपत्तिरिति चेन्न । बृद्धजाबालोपनिषदि पशुपाशपतिपदार्थनिरूपणानन्तरं शिवस्य पंचकृत्यकर्तृत्वं प्रसाध्य " पुनस्तगुँ होवाच कानि षट्त्रिंशत् तत्त्वानीति । स तस्मा आह शिव-शक्तिस्सदाशिव-ईश्वरशुद्धविद्या इत्येतानि शुद्धानीत्यादिना षट्-त्रिंशत्तत्वश्रवणात् । अपि च सिद्धान्तागमोपबृंहित श्रुतिवाक्यैरपि षट्त्रिंशत्तत्वानि वैदिकानीति ज्ञायन्ते । तथ हि—

षट्त्रिंशत् तत्त्वरूपत्वं तल्लिंगयेव सर्वदा ।
पञ्चब्रह्माभिधैर्मन्त्रैः प्रोच्यचे परमार्थतः ॥
सद्योजातस्वरूपाय भूतत्वाय नमोऽस्तु ते ॥

इत्यादिना " शिवतत्त्वात्मने तुभ्यं ओंकाराय नमो नमः" इत्यन्तेन तस्मान्न सांख्यसिद्ध पञ्चविंशति तत्त्वानि ।

नन्वत्र पंचजनशब्देन के विव....... त आह —

सू. प्राणादयो वाक्यशेषात् ॥ १२ ॥

" प्राणस्य प्राणमुत चक्षुषश्चक्षुः .... .. न्नस्यान्न मनसो.... "

पुनर्हेत्वन्तरमाह—

सू. ज्योतिषैकेषामसत्यन्ये ॥ १३ ॥

एतेषां कण्वादीनां अन्ये अन्न शब्दे असति सति तद्देवाज्योतिषां ज्योतिः "

इत्यत्र ज्योतिश्शब्देन पंचपंचजना इन्द्रियाणीति ज्ञायन्ते ।

आत्मन आकाशः सम्भूतः इत्यत्र आकाशस्यैव ब्रह्मकार्यत्वाव गमात् ब्रह्मकार्यत्वं पञ्चमहाभूतानामयुक्तमिति शङ्कायामाह—

सू. कारणत्वेनचाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

अकाशादिषु आकाशादिपञ्चमहाभूतेषु कारणत्वेन ब्रह्मणः साक्षात्कारणत्वेनोक्तत्वात् " एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च " इति श्रुतेः । यथा परशिवब्रह्मकार्यत्वं महाभूतानां तथा "आकाशाद्वायु"

रित्यादावपि तत्र कारणत्वेन व्यपदिष्टस्य परशिवस्य उक्तेः कथनादित्यर्थः तथा च "आकाशाद्वायुः वायोरग्निः"। इत्यादावपि स्वशक्त्यंश परिणता शुद्धमायावच्छिन्न ईश्वरादाकाशस्य जनिमत्त्वम्। तदाकाशावच्छिन्न शिवदेव वायोरुत्पत्तिरित्यादिकं ज्ञातव्यम्।

ननु "असद्वा इदमग्र असीदित्यत्र" असत एव शून्यस्य जगत्कारणत्वश्रवणात् कथं शिवस्य जगत्कारणत्वं इत्याह—

सू. समाकर्षात् ॥ १५ ॥

"सोऽकामयत" "बहुस्यां प्रजायेय" इति पूर्वनिर्दिष्टस्य सर्वज्ञस्य सर्वशक्तिकस्य शिवस्य "असद्वा इदमग्र आसीदिति" श्रुत्या समाकर्षात्। एवं च नामरूपव्याकृत वस्तुपरकत्वं सच्छब्दस्य, तदव्याकृतवस्तुपरकत्वं असच्छब्दस्येति निर्णयात् न शून्यपरकत्वं असच्छब्दस्योति बोध्यम्।

एतावता प्रधानजगत्कारणत्ववादं निरस्य निर्विशेष ब्रह्मसन्निधानात् प्रधानस्य जगत्कारणत्वव्यवस्थापकं सार्वत्रिकजीवब्रह्माद्वैतवादं निराकरोत्यधिकरणान्तरेण।

सू. जगद्वाचित्वात् ॥ १६ ॥

ब्रह्म ते ब्रवाणीयुपक्रम्य "यो वै बालाक एतेषां पुरुषाणां" कर्ता यस्य चैतत्कर्म सवै वेदितव्यः "इत्यत्र वेदितव्यत्वेन श्रूयमाणः परशिव एव न तु जीवः" तस्य सकलजगत्कर्तृत्वासम्भवात्।

नन्वत्र कर्मशब्दस्य धर्माधर्मरूपापूर्ववाचित्वात् । तस्य व्यपगत कर्मसम्बन्धे परशिवे सत्वायोगात् । कथं परशिवस्य वेदितव्यत्वेन वक्तुं शक्यते इति चेन्न । जगद्वाचित्वात् एतच्छब्दसमभिव्याहृत कर्मपदस्य क्रियते इति व्युत्पत्या जगद्वाचकत्वादित्यर्थः । एतेन जीवब्रह्मणोः पारमार्थिक भेदोपादानात् निरस्त एव शुद्धाद्वैतवाद इति बोध्यम् ।

शङ्करीवृत्तिः समाप्ता । इति ब्रं. श्री उमचिगी वृष्टिमठाध्यक्षेण शङ्करशास्त्रिणा विरचिता ब्रह्मसूत्र वृत्तिः समाप्ता ।

अथ क्रियासारे वाक्यान्वयादित्यादि सूत्रार्थविचारः

वाक्यान्वयात्परं ब्रह्म यल्लिङ्गं हृदयाम्बुजे ।
उपास्यं तत्परं ब्रह्म वेदितव्यं मनीषिभिः ॥ ४४३ ॥
लिङ्गं प्रतिज्ञासिद्धेश्च हृदब्जे धार्यमव्ययम् ।
आश्मरथ्यो मुनिस्तत्र मन्यते पुनरादरात् ॥ ४४४ ॥
एवं भावादौडुलोमिरित्येव ह्युक्तमिष्यते ।
अवस्थितेः काशकृत्स्न इति तद्ब्रह्मजीवयोः ॥ ४४५ ॥
न भेदोऽपि न चाभेदः सामरस्यात्तयोर्ध्रुवम् ।
भेदाभेदाभ्युपगमाद्विस्फुलिङ्गाग्निवत्तथा ॥ ४४६ ॥
जीवो ह्युपासकः साक्षादुपास्यं ब्रह्मकेवलम् ।
लिङ्गाङ्गसामरस्येन भेदाभेदौ व्यवस्थितौ ॥ ४४७ ॥

प्रकृतिश्चेत्यादि सूत्रार्थ विवरणम्

उपादानं हि प्रकृतिर्निमित्तं ब्रह्मकेवलम् ।
दृष्टान्तानुपरोधाच्च मृदादिवदिहेष्यते ॥ ४४८ ॥

तथाभिद्योपदेशाच्च प्रकृतित्वं विचार्यते ।
प्रकृतित्वं च कर्तृत्वं ब्रह्मणोवाक्यगौरवात् ॥ ४४९ ॥
साक्षादप्युभयाम्नानात्प्रकृतिः कर्तृ च श्रुतम् ।
योनिश्च हीति सूत्रेण ब्रह्मणो निश्चितं पुनः ॥ ४५० ॥
कर्तृत्वं प्रकृतित्वं च योनिशब्देन तत्तथा ।
परिणामादात्मकृतेरात्मानं स्वयमित्यतः ॥ ४५१ ॥
प्रकृतित्वं च कर्तृत्वं सिद्धं तस्मात् परस्य हि ।

एतेन सर्वे इत्यादि सूत्रार्थः

एतेन सर्वे व्याख्याता व्याख्याता इति सूत्रतः ॥ ४५२ ॥
एतैश्च हेतुभिस्सर्वे वेदान्ता ब्रह्मतत्पराः ।
तद्ब्रह्म हृदये धार्यं प्रतिसूत्रं व्यवस्थितम् ॥ ४५३ ॥
एतदैश्वर्यविभवं लिङ्गं ब्रह्म हृदम्बुजे ।
सामरस्यविधानेन धार्यं पूज्यं मुमुक्षुभिः ॥ ४५४ ॥
तस्मात्सर्वप्रयत्नेन सर्वकर्माणि मानवः ।
परिवृत्य यथाकालं करपीठे तु पूजयेत् ॥ ४५५ ॥
यतः पापार्णवात्त्रातुं भक्तिर्नौरिव निर्मिता ।
तस्माद्भक्त्युपपन्नस्य रजसा तमसा च किम् ॥ ४५६ ॥
अन्त्यजो वाधमो वापि मूर्खो वा पतितोऽपि वा ।
शिवभावं प्रपन्नश्चेत् पूज्यः सर्वसुरासुरैः ॥ ४५७ ॥
तस्मात्सर्वप्रयत्नेन हृदये धारयेच्छिवम् ।
अभक्तानां क्वचिदपि फलं नास्ति यतस्ततः ॥ ४५८ ॥

वेदैश्शास्त्रैर्वेदविद्भिर्विचार्याथ सुनिश्चितम् ।
ब्रह्मघ्नो वा सुरापो वा स्तेयी वा गुरुतल्पगः ॥ ४५९ ॥
मातृहा पितृहा वापि वीरहा भ्रूणहापि वा ।
सम्पूज्यामन्त्रकं भक्त्या शिवलिङ्गं परत्परम् ॥ ४६० ॥
तैस्तैःपापैः प्रमुच्येत सामरस्यमना यदि ।
तस्मात्सर्वप्रयत्नेन पतितोऽपि यजेच्छिवम् ॥ ४६१ ॥
भक्तश्चेन्नपरः कश्चित् भिक्षाहारो जितेन्द्रियः ।
कृत्वापि सुमहत्पापं भक्त्या पञ्चाक्षरेण तु ॥ ४६२ ॥
पूजयेद्यदि तल्लिङ्गं तस्मात्पापात्प्रमुच्यते ।
अब्भक्षा वायुभक्षाश्च येचान्ये व्रतकर्शिताः ॥ ४६३ ॥
तेषामेतैर्व्रतैर्नास्ति शिवलोकसमागमः ।
भक्त्या पञ्चाक्षरेणैव यो लिङ्गं सकृदर्चयेत् ॥ ४६४ ॥
सोऽपि गच्छेत् शिवस्थानं शिवलिङ्गस्य धारणात् ।
तस्मात्तपांसि यज्ञाश्च सर्वे सर्वस्व दक्षिणा ॥ ४६५ ॥
शिवलिङ्गार्चनस्यैते कोट्यंशेनापि नो समाः ।
अरुद्रो वा सरुद्रो वा शिवलिङ्गं समर्चयेत् ॥ ४६६ ॥
यः सकृत्पतितो वापि मूढो वा मुच्यते नरः ।
षडक्षरेण वा नित्यं तथा पञ्चाक्षरेण वा ॥ ४६७ ॥
एककाल द्विकालं वा त्रिकालं सर्वदाथवा ।
येऽर्चयन्ति महादेवं विज्ञेयास्ते गणेश्वराः ॥ ४६८ ॥

जातेनात्मद्रुहा येन नार्चन्ति लिङ्गमैश्वरम् ।
स चिरं सञ्चरत्यस्मिन् संसारे दुःखसागरे ॥ ४६९ ॥
दुर्लभं प्राप्य मानुष्यं तल्लिङ्गं यो न धारयेत् ।
निष्फलं तस्य तज्जन्म मोक्षाय न भवेद्यत ॥ ४७० ॥
हृत्प्रदेशे सदा धार्यं शिवलिङ्गं मनीषिभिः
दुर्लभं प्राप्य मानुष्यं यो लिङ्गं हृदि धारयेत् ॥ ४७१ ॥
तस्यैव सफलं जन्म कृतार्थः स नरोत्तमः ।
लिङ्गाङ्गसम्भवा ये च शिवलिङ्गैक तत्पराः । ४७२ ॥
शिवलिङ्गार्चनपरा न ते दुःखस्य भागिनः ।
ये वाञ्छन्ति महाभोगान् राज्यं च त्रिदशालयम् ॥ ४७३ ॥
तेऽर्चयन्ति सदाकालं हृदिस्थं लिङ्गमद्भुतम् ।
सौभाग्यं कान्तिमद्रूपं सत्यं त्यागः प्रभावता ॥ ४७४ ॥
शौर्यं च जगति ख्यातिर्लिङ्गमर्चयतो भवेत् ।
तस्मात्सर्वं परित्यज्य शिवैकाहितमानसः ॥ ४७५ ॥
सामरस्यविधिं कुर्यात् यदीच्छेच्छिवमात्मनः ।
सङ्ग्रहेण प्रमाणानि पुराणेष्वागमेषु च ॥ ४७६ ॥
अन्विष्य लिखितान्येतान्येतस्य विषये पुनः ।
पौनरुक्त्यमनादृत्य बुद्धिदार्ढ्याय सादरम् ॥ ४७७ ॥

प्रथमाध्यायस्य चतुर्थः पादः समाप्तः

श्री जगद्गुरु उज्जयनी सद्धर्मसिंहासनमहासंस्थानस्य ज्ञानगुरु-
विद्यापीठाश्रये प्रकाशिताः ग्रन्थाः

वे. ब्रं. लिं॥ डमहिगी शङ्करशास्त्रि विरचित ग्रन्थाः ।

१. सिद्धान्तशिखोपनिषत् वीरशैवभाष्यम्
२. ईशावास्योपनिषत् शाङ्करीव्याख्या
३. केनोपनिषत् ,,
४. मुण्डकोपनिषत् वीरशैवभाष्यन्
५. ब्रह्मसूत्रवृत्तिः (प्रथमोध्यायः)
६. श्रीकरभाष्यम् (चतुस्सूत्री—कन्नडभावार्थोपेता)
७. वीरशैवसिद्धान्तसुधाकरः ।
८. ब्रह्मोपदेशविधिः ।
९. शिवार्चनचन्द्रिका ।
१०. सद्धर्मज्योतिः ।
११. सिद्धलिङ्गशतकम् ।
१२. सिद्धलिङ्गशिवयोगिचरितम् ।
१३. श्री जगद्गुरु रेणुकागीता । (आंग्लभाषानुवादसहिता)

१. श्री जगद्गुरु महासंस्थानमठः ।
२. उज्जयिनीमठः—चित्रदुर्गः ।
३. शङ्करविळास संस्कृतपाठशाला, मैसूरु

955